લગભગ અર્ધી સદી સુધી તેમણે વિવિધ ગ્રન્થોનું સર્જન કરેલ છે એટલે તેમનો જીવનસમય આશરે પોણી સદી હોય એમ માની શકાય છે.

તેમનો વિહાર ને મોટે ભાગે ચાતુર્માસ ગુજરાતમાં થયાં હતાં. મારવાડ, માળવા વગેરેમાં પણ તેઓ વિચર્યા હતા.

તે સમયના મહાન્ તાર્કિક ઉપાધ્યાયજી શ્રી યશોવિજયજી મહારાજ તેમના પ્રત્યે સારું બહુમાન ધરાવતા હતા. બન્ને પરસ્પર પૂર્ણ વિશ્વાસપાત્ર હાર્દિક મિત્રો હતા.

તેમણે અધૂરા મૂકેલા શ્રી શ્રીપાલ રાસને પૂર્ણ કરી પ્રશસ્તિમાં ઉપાધ્યાયજી મહારાજ જણાવે છે કે—

સૂરિ હીરગુરુની કીરતિ, કીર્તિવિજય ઉવજ્ઝાયાજી;
શિષ્ય તાસ શ્રી વિનયવિજય વર, વાચક સુગુણ સોહાયાજી. ૭
વિદ્યા વિનય વિવેક વિચક્ષણ, લક્ષણ લક્ષિત દેહાજી;
સોભાગી ગીતારથ સારથ, સંગત સખર સનેહાજી. ૮
સંવત્ સત્તર અડત્રીશ વરસે, રહી રાંદેર ચોમાસેજી;
સંઘતણા આગ્રહથી માંડ્યો, રાસ અધિક ઉલ્લાસેજી. ૯
સાર્ધ સપ્ત શત ગાથા વિરચી, પહોતા તે સુરલોકેજી;
તેના ગુણ ગાવે છે ગોરી, મિલીમિલી થોકે થોકેજી. ૧૦
તાસ વિશ્વાસભાજન તસ પૂરણ, પ્રેમ પવિત્ર કહાયાજી;
શ્રી નયવિજય વિબુધ પય સેવક, સુજસવિજય ઉવજ્ઝાયાજી. ૧૧

ભાગ થાકતો પૂરણ કીધો, તાસ વચન સંકેતેજી;
તેણે વળી સમકિતદૃષ્ટિ જે નર, તેહ તણે હિત હેતેજી. ૧૨

શ્રી ધર્મપરીક્ષા ગ્રન્થની ટીકાની પ્રશસ્તિમાં પણ નીચે પ્રમાણે ઉલ્લેખ છે.

**महोपाध्यायश्रीविनयविजयैश्चारुमतिभिः ।**
**प्रचक्रे साहाय्यं तदिह घटनासौष्ठवमभूत् ॥**
**प्रसर्पत्कस्तूरी–परिमलविशेषाद्भवति हि,**
**प्रसिद्धः शृङ्गारस्त्रिभुवनजनानन्दजननः ॥ १ ॥**

આ બન્ને ઉલ્લેખોથી પરસ્પર પ્રેમસદ્ભાવ, ગ્રન્થોમાં મદદ કરવી વગેરે સ્પષ્ટ સમજાય છે.

પૂજ્ય વિનયવિજયજી મહારાજની હસ્તલિખિત પ્રત લખવાની કળા પણ સુન્દર હતી. તેમણે ૧૬૯૦ માં પોતાના ગુરુમહારાજે રચેલા વિચારરત્નાકરની એક પ્રત લખી હતી ને તે તેમના ગુરુભાઇ કાન્તિવિજયજીએ વડોદરાના ભંડારમાં સ્થાપન કરી હતી. બીજી પણ પ્રતો તેમણે લખી હશે તે કલ્પી શકાય છે.

## તેમની રચેલી કૃતિઓની ટૂંક નોંધ.

| અંક. | નામ. | ભાષા. | રચનાસમય. | રચનાસ્થળ. |
|---|---|---|---|---|
| ૧ | આનન્દ લેખ | સંસ્કૃત | ૧૬૯૪–ધનતેરસ | બારેજા |
| ૨ | શ્રી કલ્પસૂત્ર સુબોધિકા | ,, | *૧૬૯૬ જે. શુ. ૨ (ગુરુપુષ્પ) | ... |

---

* સુબોધિકા ટીકા આનન્દ લેખ લખ્યા પૂર્વે તૈયાર થઇ હશે ને પ્રશસ્તિ પાછળથી લખાણી હશે એમ લાગે છે, કારણ કે આનન્દ લેખમાં નીચે પ્રમાણે સ્પષ્ટ ઉલ્લેખ છે.

**‘ क्षणैः क्षणाढ्यैश्च निधानसङ्ख्यै–रर्थापनं कल्पसुबोधिकायाः ।**
**विचित्रवादित्रपवित्रनृत्यो–त्सवेन तत्पुस्तकपूजनञ्च ॥१४५॥ ’**

| | | | |
|---|---|---|---|
| ૩ શ્રી વિજયદેવસૂરિ વિજ્ઞપ્તિ | સંસ્કૃત પ્રાકૃત | ૧૭૦૫ ધનતેરસ | દેવપત્તન (પ્રભાસપાટણ) |
| ૪ લોકપ્રકાશ | સંસ્કૃત | ૧૭૦૮ વૈ. શુ. ૫ | ... |
| ૫ હૈમલઘુપ્રક્રિયા | ,, | ૧૭૧૦ વિજયાદશમી | રાધનપુર |
| ૬ શાન્ત સુધારસ | ,, | ૧૭૨૩ | ગાંધાર |
| ૭ જિન સહસ્ર નામસ્તોત્ર | ,, | ૧૭૩૧ | ... |
| ૮ હૈમપ્રકાશ | ,, | ૧૭૩૭ વિજયાદશમી | રતલામ |
| ૯ નયકર્ણિકા | ,, | ... | દીવ બંદર |
| ૧૦ ઈન્દુદૂત | ,, | ... | જોધપુર |
| ૧૧ ષટ્ત્રિંશત્ જલ્પ-સંગ્રહ | ,, | ... | ... |
| ૧૨ અર્હન્નમસ્કાર સ્તોત્ર | ,, | ... | ... |
| ૧૩ શ્રી આદિજિન સ્તવન | ,, | ... | ... |
| ૧૪ સૂર્યપુર ચૈત્ય-પરિપાટી | ગુજરાતી | ૧૬૮૯ | સુરત |
| ૧૫卐 શ્રી વિજયદેવસૂરિ લેખ | ,, | ૧૭૦૫ ધનતેરસ | પ્રભાસપાટણ |
| ૧૬ શ્રી નેમિનાથ ભ્રમર ગીતા | ,, | *૧૭૦૬ ભાદરવો માસ | ... |

---

卐 ૧૭૦૫ માં પ્રભાસપાટણથી અણહિલપુરપાટણ પૂ. વિજયદેવસૂરિજી મહારાજ ઉપર તેમણે પ્રાકૃત સંસ્કૃતમય એક વિજ્ઞપ્તિપત્ર લખેલ છે. સંભવ છે કે આ ગુજરાતી લેખ તેના ભાવાનુવાદ જેવો જ હોય.

* આ સંવત્ ગોઠવવામાં કવિએ ચાતુર્ય કર્યું છે. જુઓ તેની છેલ્લી ગાથા—

'ભેદ સંયમતણા ( ૧૭ ) ચિત્ત આણો, માન સંવતતણું એહ જાણો;
વરસ છત્રીસનો વર્ગ મૂલ ( ૬ ), ભાદ્રવે પ્રભુ થુણ્યો સાનુકૂલ. (૨૭)'

| | | | |
|---|---|---|---|
| ૧૭ શ્રી ધર્મનાથ જિન સ્તવન (લઘુઉપમિતિભવપ્રપંચ સ્તવન) | ,, | ૧૭૧૬ | સુરત |
| ૧૮ પંચકારણ ( પંચ સમવાય ) સ્તવન | ,, | ૧૭૨૩ ( ૧૭૩૨ પણ સંભવે ) | ... |
| ૧૯ શ્રી નેમિનાથ બાર માસ સ્તવન | ,, | ૧૭૨૮ | રાંદેર |
| ૨૦ પુણ્યપ્રકાશ (આરાધનાનું સ્તવન) | ગુજરાતી | ૧૭૨૯ વિજયદશમી | ... |
| ૨૧ શ્રી ઇરિયાવહી સજ્ઝાય | ,, | ૧૭૩૦ | ... |
| ૨૨ શ્રી ભગવતીજી સૂત્રની સજ્ઝાય | ,, ,, | ૧૭૩૮ (કોઇમાં ૧૭૩૧ પણ છે) | ... રાંદેર |
| ૨૩ શ્રી શ્રીપાલ રાસ | ,, | ૧૭૩૮ | ... |
| ૨૪ પટ્ટાવલિ સજ્ઝાય | ,, | ... | ... |
| ૨૫ ઉપધાન સ્તવન | ,, | ... | ... |
| ૨૬ ચૌદ ગુણસ્થાનક ગર્ભિત શ્રી વીરજિન સ્તવન | ,, | ... | ... |
| ૨૭ ષડાવશ્યક સ્તવન | ,, | ... | ... |
| ૨૮ શ્રી આદિજિન વિનતિ | ,, | ... | ... |
| ૨૯ પચ્ચક્ખાણની સજ્ઝાય | ,, | ... | ... |
| ૩૦ આયંબિલ તપની સજ્ઝાય | ,, | ... | ... |
| ૩૧ વિનયવિલાસ | ,, | ... | ... |
| ૩૨ ચોવીશી સ્તવન | ,, | ... | ... |
| ૩૩ વીશી સ્તવન | ,, | ... | ... |
| ૩૪ અધ્યાત્મ ગીતા | ,, | ... | ... |

| | | | |
|---|---|---|---|
| ૩૫ શાશ્વત જિનભાષા | ,, | ... | ... |
| ૩૬ શ્રી સીમન્ધર જિન ચૈત્યવંદન | ,, | ... | ... |

આ સિવાય બીજી પણ અનુપલબ્ધ–નહિં મળતી, અપ્રકટ, પ્રસિદ્ધિમાં નહિ આવેલી તેમની અનેક કૃતિઓ હોવાનો સંભવ છે.

યશોદેહે જીવન્ત ઉપાધ્યાયજી શ્રી વિનયવિજયજી મહારાજને સવિનય અનેકશઃ વન્દન હો !

સં. ૨૦૦૩<br>
મૌનએકાદશી<br>
રામનગર.

મુનિ ધુરન્ધરવિજય

# विनंतिपत्र.

स्वस्तिश्रीभवनं मनोज्ञवचनं, त्रैलोक्यलोकावनं,
विद्यावल्लिवनं प्रहृष्टभुवनं, सौभाग्यशोभावनम् ॥
कल्मषैनोलवनं शिवाध्वजवनं, श्रेयोवनीजीवनं,
सद्धर्मैकनिकेतनं सुवदनं, पार्श्वं स्तुवे पावनम् ॥ १ ॥

स्वस्तिश्रीरमणस्तनोतु सततं, प्रीतेः सतां सन्ततिं,
श्रीमत्पार्श्वजिनेश्वरः कमलिनी–नेतेव पङ्करुहाम् ॥
भोक्तेवायतचक्षुषां मधुरगी–र्दातेव वित्तार्थिनां,
छायेवोत्तमभूरुहां पथि चरत्, ग्रीष्मार्कतप्ताङ्गिनाम् ॥ २ ॥

સ્વસ્તિશ્રી આદિજિનં પ્રણમ્ય, સ્વસ્તિશ્રી શાન્તિજિનં પ્રણમ્ય, સ્વસ્તિશ્રી નેમિજિનં પ્રણમ્ય, સ્વસ્તિશ્રી મહાવીરજિનં પ્રણમ્ય, સકલ નગરશિરોમણિ, નર સમુદ્ર વાપી કૂપ તડાગ વાડી વન ખંડ આરામ સરોવર સુશોભિત શ્રી જિનપ્રાસાદ સુન્દર શિખર કનક કલશ ધ્વજ મનોહર ઉપાશ્રય સાધર્મિક જન સ્થાન નિત્યોત્સવમંડિત વિવિધ વસ્તુક્રયાણક સંપૂર્ણ અનેક વ્યાપારી વ્યવહારી વિરાજમાન ચોરાશી ચતુષ્પથ સુશોભિત ન્યાયપ્રવીણ નરપતિ મહારાજા શ્રી જસવંતસિંહજી પ્રતિપાલિત શુભ સન્નિવેશ મરુધરાસીમંતિની તિલકાયમાન નગર ઉત્તમ શ્રીપૂજ્યચરણકમલન્યાસપવિત્રિતે શ્રી **વગડી** મહાનગરે શુભસ્થાને પૂજ્યારાધ્ય ઉત્તમોત્તમ પરમપૂજ્ય

---

१ पापाब्दे पवनं भृशानि धुवनं ( પાઠાન્તર )

અર્ચનીયચરણ ચારિત્રપાત્રચૂડામણિ, કુમતાંધ્રકારનભોમણિ, કલિકાલગૌતમાવતાર, સરસ્વતીકંઠાભરણ, અબોધજીવપ્રતિબોધક, સકલશાસ્ત્રપારગામી, વાદિવિજય, લક્ષ્મીશરણ, ( ચ્યાર ગતિના દુઃખના ટાલનહાર, ) વાદિમદગંજન, વાદિમુખભંજન, વાદિકદલીકૃપાણ, વાદિતમભાણ, વાદિઘૂકભાસ્કર, વાદિસમુદ્રઅગસ્તિ, વાદિવૃક્ષઉન્મૂલનહસ્તિ, વાદિસુરઈંદ, વાદિગરુડગોવિંદ, વાદિહરિણહરિ, વાદિજ્વરધન્વંતરિ, વાદિયૂથમલ્લ, વાદિહૃદયશલ્ય, વાદિગોધૂમઘરટ્ટ, મર્દિતવાદિમરટ્ટ, જીત્યા અનેક વાદ, સરસ્વતીલબ્ધપ્રસાદ, એકવિધ અસંયમના ટાલનહાર, દ્વિવિધધર્મપ્રરૂપક, ત્રિણિ તત્વના જાણ, ચ્યાર ગતિના દુઃખના ટાલનહાર, પંચમહાવ્રત પાલણહાર, છકાયના પીહર, સાત ભય નિવારક, અષ્ટ મદચૂરક, નવવાડિ વિશુદ્ધ બ્રહ્મચર્યધારક, દસવિધ સાધુધર્મ આરાધક, અગ્યાર અંગના જાણ, બાર ઉપાંગના પાઠક, તેર કાઠિયાના જીપક, ચઉદ વિદ્યાનિધાન, પનર ભેદ સિદ્ધના જાણ, સોલ કલા સંપૂર્ણ સસિવદન, સત્તરભેદ સંયમના આરાધક, અઢાર સહસ સીલાંગ રથના ધારક, ઓગણીસ કાઉસ્સગના દોષ નિવારક, વીસવીસી દયાના પાલક, એકવીસ શ્રાવકના ગુણના પ્રરૂપક, બાવીસ પરીસહોના જીપક, ત્રેવીસ સુયગડાંગ અધ્યયનના જાણ, ચોવીસ તીર્થંકરની આજ્ઞાના આરાધક, પંચવીસ કિરિઆના નિવારક, છવ્વીસ દસાકલ્પ વ્યવહાર ઉદ્દેસણકાલના જાણ, સત્તાવીસ સાધુ ગુણે કરી વિરાજમાન, અઠ્ઠાવીસ લબ્ધિ વિરાજમાન, ઓગણત્રીસ પાપશ્રુત પ્રસંગ નિવારક, ત્રીસ મોહની થાનક નિવારક, એકત્રીસ સિદ્ધના ગુણના દેખાડણહાર, બત્રીસ યોગ સંગ્રહધારક, તેત્રીસ આશાતના ગુરુની તેહના નિવારક, ચોત્રીશ તીર્થંકરના અતિશયના

ઉપદેશક, પાંત્રીસ વાણીગુણે કરી સુશોભિત, છત્રીસ સૂરિ-ગુણે કરી વિરાજમાન, શ્રી કુંથુનાથના સાડત્રીસ ગણધરના પ્રરૂપક, શ્રી પાર્શ્વનાથના અડત્રીસ હજાર સાધવીના પ્રરૂપક, મનુષ્ય ક્ષેત્રમાંહિ ઓગણચાલીસ કુલપર્વતના પ્રરૂપક, શ્રી મેરુ-પર્વતની ચૂલિકા ચાલીસ જોયણ ઉન્નત તેહના પ્રરૂપક, શ્રી નમિનાથનિ એકતાલીસ હજાર સાધવીના પ્રરૂપક, શ્રી મહાવીરઇ બઇતાલીસ વરસ સાધુપણું પાલ્યું તેહના ઉપદેશક, ત્રઇંતાલીસ કર્મવિપાક અધ્યયનનાં જાણ, ધરણેન્દ્રના ચઉઆલીસ લાખ ભવનના પ્રરૂપક, શ્રી ધર્મનાથ પઈંતાલીસ ધનુષ ઉન્નત તેહના પ્રરૂપક, દૃષ્ટિવાદના છઇંતાલીસ માત્રિકા પદ તેહના જ્ઞાપક, શ્રી અગ્નિભૂતિ ગણધરનિ સડતાલીસ વરસ ગૃહસ્થપર્યાયના જાણ, અડતાલીસ હજાર પાટણના સ્વામી શ્રી ચક્રવર્તિ તેહનીં. પૂજ્યનીક, ત્રઇન્દ્રિનું ઉત્કૃષ્ટું ઓગણપચાસ દિવસનું આઉખું તેહના પ્રરૂપક, શ્રી મુનિસુવ્રતસ્વામીનિ પચાસ ધનુષનું શરીર માન તેહના પ્રરૂપક, સપ્રભનામિ બલદેવ તેહનું એકાવન લાખ વરસનું આઉખું તેહના જાણ, મોહની કર્મના બાવન નામ તેહના જાણ, સમૂર્છિમ ઉરપરિસર્પનું પ૩ હજાર વરસનું ઉત્કૃષ્ટું આઉખુ તેહના જાણ, શ્રી નેમિનાથના ચઉપ્પન દિવસ છદ્મસ્થપર્યાયના જાણ, શ્રી મહાવીરદેવઇ પંચાવન અધ્યયન કલ્યાણફલ વિપાકીઆં છેલી રાત્રે પ્રરૂપ્યાં તેહના જાણ, પહેલી, બીજી, પાંચમી, ત્રણ પૃથિવી મલિનિં અઠ્ઠાવન લાખ નરકા-વાસાના જાણ, શ્રી મલ્લિનાથનિ ઓગણસઠિસઇ અવધિજ્ઞાનીના જાણ, એક અહોરાત્રિની સાઠિ ઘડી તેહના જાણ, મેરુપર્વતનું પહિલુ કાંડ એકસઠિ હજાર જોયણ ઉન્નત તેહના જાણ, એક યુગનિ વિષે બાસઠિ પુનિમ તેહના જાણ, શ્રી ઋષભદેવપ્રભુએ

ત્રિસઠ લાખ પૂર્વ વરસ રાજ્ય પાલ્યું તેહના જ્ઞાપક, ચમરેન્દ્રને ચોસઠ હજાર સામાનિક દેવતાના જાણ, જમ્બૂદ્વીપને વિષે પાંસઠિ સૂર્યમાંડલીના જાણ, શ્રી શ્રેયાંસનાથને છાસઠિં ગણધરના જાણ, એક યુગને વિષે સડસઠિં નક્ષત્ર માસના જાણ, ધાતકી-ખંડને વિષે અડસઠિ રાજધાનીના જાણ, મનુષ્યક્ષેત્રને વિષે મેરુ વિના ઓગણોત્તર વર્ષધર પર્વતના જાણ, શ્રી પાર્શ્વનાથે સિત્તરિ વરસ સાધુપર્યાય પાલો તેહના જાણ, વીર્યવાદ પૂર્વના એકોત્તરિ પાહુડાના જાણ, બોહોત્તરિ કલા પુરુષની તેહના જાણ, વિજયબલદેવનું ત્રહોત્તરિ લાષ વરસનૂં આઉષું તેહના જાણ, અગ્નિભૂતિ ગણધરનું ચઉત્તર વરસનું આઉષું તેહના જાણ, શ્રી શાન્તિનાથ પંચોત્તરિ હજાર ગૃહસ્થપણાઇં રહ્યા તેહના જાણ, છહોત્તરિં લાષ વિદ્યુત્કુમારના ભવનના જાણ, એક મુહૂર્તના સત્તોત્તર લવના જાણ, અકંપિત ગણધર અટ્ઠોત્તરિ વરસનું આઉષું પાલ્યું તેહના જાણ, જમ્બૂદ્વીપના એક દ્વારથી બીજા દ્વારનું ઓગણાસી હજાર જોયણનું આંતરું તેહના જાણ, અચલ બલદેવ અસી ધનુષ ઉન્નત તેહના જાણ, શ્રી કુંથુનાથનિં એકાસી સત મનપર્યાયજ્ઞાનીના જાણ, શ્રી મહા-વીરદેવ બ્યાસી અહોરાત્ર દેવાનંદા બ્રાહ્મણીનિં કુંખઇં વસ્યા તેહના જાણ, શ્રી શીતલનાથના ત્રાસી ગણધરના જાણ, શ્રી ઋષભદેવનું ચોરાસી લાખ પૂર્વનું આઉષું તેહના જાણ, ધાતકીખંડના મેરુપર્વત પંચ્યાસી હજાર જોયણ ઉન્નત તેહના જાણ, શ્રી સુવિધિનાથનિં છાસી ગણધરના જાણ, મેરુ-પર્વતથી ગોસ્તૂપ આવાસપર્વત સત્યાસી હજાર જોયણ આંતરું હોઇ તેહના જાણ, એક ચન્દ્રમાનિં અટ્ઠાસી ગ્રહનો પરિવાર તેહનાં જાણ, શ્રી ઋષભદેવ ત્રીજા આરાના નવ્યાસી પષવાડા

થાકતે મુગતિ પધાર્યા તેહના જાણ, શ્રી શીતલનાથ નેઉ ધનુષ ઉન્નત તેહના જાણ, શ્રી કુંથુનાથનિં એકાણું અવધિજ્ઞાનીના જાણ, શ્રી ગૌતમસ્વામિનું બાણું વરસ આઉખું તેહના જાણ, શ્રી ચન્દ્રપ્રભસ્વામિના ત્યાણું ગણધર તેહના જાણ, શ્રી અજિતનાથના ચોરાણું શત અવધિજ્ઞાનીના જાણ, લવણ-સમુદ્રના બેહુ પાસે પંચાણું પંચાણું હજાર જોયણ અતિક્રમિનિ મહાપાતાલ કલશ છે તેહના જાણ, છન્નુ કોડી ગામના સ્વામી ચક્રવર્તિ તેહને પૂજ્યનીક, હરિષેણ ચક્રવર્તિ સત્તાણું સઈ વરસ ગૃહસ્થાવાસે રહી દીક્ષા લીધી તેહના જાણ, નંદનવનથી પંડકવન અઠાણું હજાર જોયણનું આંતરું તેહના જાણ, મેરુ પર્વત નવાણું જોયણ ઉન્નત તેહના જાણ, જમ્બૂદ્વીપ સો હજાર જોયણ આયામ વિષ્કંભ તેહના જાણ, એકોત્તરિઆના કુલદીપક, કુલમંડન, કુલઉદ્યોતકારક, જાઈસંપન્ને, કુલસંપન્ને, બલસંપન્ને, રૂપસંપન્ને, દંસણસંપન્ને, ચરિત્તસંપન્ને, લજ્જાલાઘવસંપન્ને, ઓયંસિ, તેયંસિ, વચંસિ, જસંસિ, જિયકોહે, જિયમાણે, જિયમાએ, જિયલોહે, જિઇંદિએ, જિયપરીસહે, જિવિઆ-સમરણ ભયવિપ્પમુક્કે, સમુદ્રનિં પરિ ગંભીર, મેરુની પરિ ધીર, ભારંડ પંખીનિં પરિં અપ્રમત્ત, સૂર્યનિં પરિં પ્રતાપવંત, ચન્દ્ર-માનિં પરિ સૌમ્ય, સીહનિં પરિ સૂરવીર, પરદેશપંચાયણ, વાચા-અવિચલ, ગંગાજલ પરિ નિર્મલ, મહિમાસમુદ્ર, મહાસોભાગી, મહાવઈરાગી, મહાગુણરાગી, મહાત્યાગી, મહાજ્ઞાની, મહાધ્યાની, મહાદાની, મહાતપસ્વી, મહામનસ્વી, મહાવચસ્વી, ધન્ય તે દેશ, ધન્ય તે ગામ, ધન્ય તે નગર, જિહાં શ્રીપૂજ્યજી વિહાર કરિં, ધન્ય તે રાજા, ધન્ય તે પ્રજા, ધન્ય તે માડંબિં કોડંબિ શેઠ સેનાપતિ ઇભ્ય વ્યવહારિઆ, ધન્ય તે શ્રાવક,

ધન્ય તિ શ્રાવિકા, જે પ્રાતઃકાલે શ્રી પૂજ્યજીના ચરણકમલ વાંદે, અનિ શ્રી પૂજ્યજીનિ અમૃતમય દેસના સાંભલે, શ્રીપૂજ્યજી નઈ મુહડઈ પોસહ સામાયિક વ્રતપચ્ચકખાણ કરેં, સંસારસમુદ્ર તરેં, પુણ્ય લક્ષ્મી વરે, પુણ્યભંડાર ભરેં, મનુષ્યાવતાર સફલ કરેં.

શ્રી પૂજ્યજીના ગુણ અનંત મેં એકે જીભેં કિમ વર્ણવ્યા જાઇ.

દૂહા—

ગયણંગણ કાગલ કરૂં, લેખણ કરું વનરાય;
સાયર ઘોલી મસિ કરૂં, તુમ્હ ગુણ લિખ્યા ન જાય. ૧
અમ હિયડું દાડિમ કલી, ભરિઓ તુમ્હ ગુણેણ;
અવગુણ એક ન સંભરઈ, વિસારા જે સેણ. ૨
કિંહા કોઇલ કિંહાં અમ્બવન, કિંહાં મોરા કિંહાં મેહ;
વિસારા નવિ વિસરે, ગિરુઆ તણા સનેહ. ૩
સમય સમય નિત સાંભરે, માસમાંહિં સો વાર;
તે સુહગુરુ કિમ વીસરેં, જસ ગુણનો નહિં પાર. ૪
દોય નારી અતિ સામલી, પાણિમાંહિં વસંત;
તે તુમ્હ દરિસણ દેખવા, અલજો અતિહિ કરંત. ૫
મન પસરિ જિમ માહરું, તિમ જો કર પસરંત;
ચરણ ગ્રહી સરણેં રહી, અમૃત વાણિ સુણંત. ૬

चित्तं तुह पासत्थं, तुह गुणसुणणेण सवणसंतोसो।
जीहा नामग्गहणे, एकागी दिट्ठी तडप्फडई ॥ ७ ॥
यथा स्मरति गोवच्छं, चक्रवाकी दिवाकरम्।
सती स्मरति भर्तारं, तथाहं तव दर्शनम् ॥ ८ ॥

**मरमझंमि जे वसे, आगलि कन्न ठविज्ज ।**
**ए दोइं अक्षर जोडी करि, अम्ह उपरिं चितिज्ज ॥ ९ ॥**

(म ने र ની વચમાં म ને य રહે છે તેની આગળ કાનો મૂકીએ એટલે मया થાય અર્થાત્ અમારા ઉપર કૃપા રાખજો )

ઇત્યાદિક શ્રી પૂજ્યજીના ગુણ કિમ વર્ણવ્યા જાઈં, યતઃ—

**यदि त्रिलोकी गणनापरा स्यात्,**
**तस्याः समाप्तिर्यदि नायुषः स्यात् ॥**
**पारे परार्धं गणितं यदि स्यात्,**
**भवद्गुणानां गणना तदा स्यात् ॥ १० ॥**

ઇત્યાદિ સર્વ ઉપમા યોગ્ય ભટ્ટારક શ્રીશ્રીશ્રીશ્રીશ્રી **વિજયપ્રભસૂરીસર** ચરણાનુકમલાન્ **શ્રી ઉજ્જેણિનગરાત્** સદા આદેશકારી ચરણુસેવક દાસાનુદાસ પાવરજરેણુ સમાન, સેવક સં. **જયંતસિંહ** પ્રમુખ સમસ્ત સંઘકેન ત્રિકાલવંદના અવધારવી. યત ઈહાં શ્રીપૂજ્યજીનિં પ્રસાદઇં કરી ધર્મકાર્ય સુખદ પ્રવર્તઈં છિં. શ્રી પૂજ્યજીના સુખ સંયમ નિરાબાધપણાના લેખ પ્રસાદ કરી સેવકનિં સંતોષ ઉપજાવવો. તથા શ્રીપૂજ્યજીનઈ આદેશઈં ઉપાધ્યાય શ્રી **વિનયવિજયગણિ** ઈહા ચોમાસું પધાર્યા. શ્રી ઉપાધ્યાયજી ઘણું બહુશ્રુત ઘણું સંવેગી ઘણું ગુણવંત કિરિઆપાત્ર જેહવા શ્રીપૂજ્યજીના ગીતાર્થ જોઇઈ તેહવા છિં. અને શ્રી ઉપાધ્યાયજીના સંઘાડાપતિ **પં. ઋદ્ધિવિજય** પ્રમુખ સર્વ યતિ ઘણું સંવેગી કિરિઆપાત્ર ભલા સાધ છે. તે દેષી સંઘનેં ઘણી શાંતિ ઉપની છે. સંઘ ઘણું અનુમોદન કરે છે. શ્રી ઉપાધ્યાયજી ઈંહાં પધારતાં ઘણા પચ્ચકખાણ સંવર કીધા છે. અને ઘણા શ્રાવક નિત્યપ્રતિ દેશના સાંભલિ છિં. તથા પર્યુસણ પર્વ મહામહોત્સવપૂર્વક નિર્વિઘ્નપણે

થયાં છિં. આ સમયમાંહિં પણિ માછિ કસાબ ધોબી સોનાર લુહાર ઘાંચી મોચી ભાડભુંજા પ્રમુખ સર્વ જીવની અમારી પલી છેં. તથા નવ વખાણ પર્યૂસણના મહામહોત્સવ મહા આડંબરપૂર્વકપણેં સુખ શાન્તિ થયાં છે. પાસખમણ અઠાઇ અઠમ છઠ પ્રમૂખ વિશેષ તપ થયાં છિ. તથા સાહમીવત્સલ પારણાં પ્રભાવના પ્રમુખ વિશેષ ઉત્સવ થયા છે. સંવત્સરીદાન પણિ વિશેષથી દેવાણાં છેં. બીજા પણિ ઉપધાન માલારોપણિ વ્રતઉચ્ચાર પ્રમુખ ધર્મકાર્ય થયાં તથા થાઇં છે. પાખી પાખીઇં પોસહતિનેં તે બોલ દેવાઇ છે. તથા ઉપાધ્યાય શ્રી વિનયવિજયગ, પં. ઋદ્ધિવિજયગ, પં. મતિવિજયગ, પં. માનવિજય, પં. હર્ષવિજય, ઋ. ભાણજી, મુ. ભાણવિજય, મુ. કેસરવિજય, મુ. પુણ્યવિજય, સાધ્વી સહજશ્રી પ્રમુખ સમસ્ત સંઘાડાની વંદના અવધારવી. પંડિત શ્રી હેમવિજયગ, પંડિત શ્રી વિમલવિજય, પંડિત શ્રી ઉદયવિજય, પં. સત્યવિજય, ગ. પ્રતાપવિજય પ્રમુખ સર્વ શ્રીપૂજ્યજીના પરિવારનિં સંઘની વંદના અવધારવી. તથા શ્રી ઉપાધ્યાયજી વખાણમાંહિં શ્રીપૂજ્યજીના ગુણ ઘણા વર્ણઇ છે. તેણે કરી અત્રના સંઘનિં શ્રીપૂજ્યજીના ચરણકમલ ભેટવાની ઘણી ઉત્કંઠા ઉપનિં છે. તે માટિં શ્રીપૂજ્યજીઇં ઊજેણિના સંઘ ઉપરિ કૃપા અવધારીનિ શ્રીમગસી પાર્શ્વનાથ જુહારવા સારુ પધારવું. માલવો દેશ પાવન કરવો. જિમ શ્રીપૂજ્યજીનેં વાંદવાના મનોરથ સફળ થાઇં. શ્રીપૂજ્યજી મેઘની પરિં ઉપગારી છો, તે માટે કૃપા કરીનિં ઇંહા અવશ્ય પધારવું જિમ સંઘના મનોરથ સફલ થાઇં તિમ અવધારવું. સેવક સરિખા કાર્ય કામ પ્રસાદ કરવાં, તીર્થયાત્રાઇં સેવકનીં સંભારવાં—

[આ વિનંતિ પત્ર ઉજ્જૈનીના શ્રી સંઘે ભટ્ટારકાચાર્ય મહારાજશ્રી પૂજ્ય વિજયપ્રભસૂરિજી મહારાજ પર લખેલ છે.

મહારાજશ્રી તે સમયે મારવાડ દેશમાં આવેલ વગડી ગામે ચાતુર્માસ વિરાજતા હતા. તે સમયે ત્યાં મહારાજા જસવંતસિંહજીનું રાજ્ય ચાલતું હતું.

જ્યારે આ કાગળ લખ્યો ત્યારે ઉજ્જૈનીમાં મહામહોપાધ્યાય શ્રી વિનયવિજયજી મહારાજ ચાતુર્માસ હતા. ઉપાધ્યાયજીને પૂજ્યાચાર્ય મહારાજ પ્રત્યે અથાગ પ્રેમ હતો. વારંવાર તેઓશ્રી પૂજ્યશ્રીના ગુણગાન કરતા હતા. ઉજ્જૈનીના સંઘ પર તેઓશ્રીની વિદ્વત્તા-સૌમ્યતા-ચારિત્રશીલતાની સારી છાયા પડી હતી. તે આ કાગળથી સ્પષ્ટ સમજાય છે.

ઉપાધ્યાયજી મહારાજની સાથેના સાધુઓ પણ ચારિત્રપાત્ર અને યોગ્ય હતા એ પણ આ પત્રમાં છે-પત્રની શરૂઆતનો શ્રી પૂજ્યજીના વર્ણનનો વિસ્તૃત ભાગ અને આદિના બે શ્લોકો ઉપાધ્યાયજીરચિત હોય એમ સમજાય છે. પત્રની શરૂઆતમાં બે શ્લોકો કાવ્યછટાવાળા અનુપ્રાસ અલંકારયુક્ત વિદ્વત્તાપૂર્ણ છે. પછીથી પૂજ્યાચાર્ય મહારાજશ્રીનું વર્ણન છે. તેમાં રાજ્ય, રાજા, દેશ ને નગરનું વર્ણન કરી ત્યાં વિરાજમાન શ્રીપૂજ્યજીના ભક્તિપૂર્ણ વિશેષણો છે. (આમાંના કેટલાએક વિશેષણોની શૈલી ઉપાધ્યાયજીરચિત કલ્પ-સુબોધકાના ગણધરવાદમાં મળે છે) પછીથી શ્રીપૂજ્યજીના વિશેષણોરૂપેજ એકથી સો સુધીના શાસ્ત્રીય બોલો ગુંથ્યા છે. તે બોલોમાં ઘણાએ આગમિક વિચાર જણાવ્યો છે. ત્યારબાદ ઓજસ્વી આગમ શૈલીના કેટલાએ વિશેષણો ગૂંથીને નવ દશ દૂહા ને શ્લોકો લખ્યા છે. તેમાં ભકિત, પ્રેમ, દર્શનેચ્છા, કૃપાભાવયાચના, પૂજ્યશ્રીની મહત્તા વગેરે સુન્દર કાવ્ય છટાથી દર્શાવ્યા છે. છેવટે વન્દનાસન્દેશ, ચાતુર્માસિક પર્યુષણા પર્વમાં થયેલ ધર્મપ્રભાવનાના સમાચાર, મુનિઓના વન્દનસન્દેશ ને આ પ્રદેશમાં વિહરવા વિનતિ કરી પત્ર પૂર્ણ કરેલ છે.]



સત્યવાદી શેઠ મણિલાલ હરિલાલ શાહ

# સત્યવાદી શેઠ મણીલાલ હરિલાલનો ટૂંક પરિચય

અમદાવાદની ગુસાપારેખની પોળમાં વસતા, દશાશ્રીમાળી જ્ઞાતિના, સત્યવાદી તરીકે પ્રસિદ્ધ થયેલા કુટુંબમાં સંવત્ ૧૯૨૮ની આસો શુદિ ૫ના દિવસે શ્રીહરિલાલભાઈને ત્યાં શ્રીમતી બાઈ વીજીબહેનની કુક્ષિથી શ્રીમણિભાઈનો જન્મ થયો હતો.

શ્રીહરિભાઈને શિવાભાઈ અને તેથી નાના મણિભાઈ એમ બે પુત્રો હતા. હરિભાઈ પોતે સબજજ્જ હતા, એટલે પુત્રોનો બાલ્યકાળ સંસ્કારપૂર્તિ માટે સારો જ હોય. મણિભાઈના સંસ્કારો સોનામાં સુગંધસમા હતા.

યુવાવસ્થામાં આવતા તેઓ વિનયાદિ ગુણોથી સુશોભિત બની વિદ્યાગ્રહણ કરવામાં કુશળ થયા, અને ઉચ્ચ અભ્યાસમાં ડૉકટરી લાઇનમાં એલ. એમ. એન્ડ એસ. સુધીનો અભ્યાસ કર્યો. આ શિક્ષણ તેમણે મુંબઈમાં શેઠ મનસુખભાઈ ભગુભાઈની મુંબઈની પેઢીમાં રહી મેળવ્યું હતું વ્યવહારિક શિક્ષણ સાથે તત્ત્વબોધક ધાર્મિક-શિક્ષણ પણ લીધું હતું અને છ કર્મગ્રન્થ જેવા દ્રવ્યાનુયોગના મહાન્ ગ્રંથનો અભ્યાસ કર્યો હતો. અધ્યાત્મપ્રિય તો તેઓ સ્વભાવથી જ હતા, જેથી અધ્યાત્મકલ્પદ્રુમ, ઉપમિતિ ભવપ્રપંચ કથા તથા શાંતસુધારસ ભાવના આદિ આધ્યાત્મિક ગ્રંથોએ તેમના જીવનને ઉન્નત અને નૈતિક બનાવ્યું હતું.

આવા ઉચ્ચ ગ્રંથોનું પરિશીલન કરવાથી અનુમોદનીય અડગ શ્રદ્ધા અને તપશ્ચર્યા આ બે ફળો મણિભાઈને પ્રાપ્ત

થયાં હતાં. તેમણે ચાલીસ વર્ષની યુવાવસ્થામાં ઉપધાન જેવી કઠિન તપશ્ચર્યા કરી માળા પહેરી હતી. અઠ્ઠાઇની તપશ્ચર્યા તો તેમની ધર્મશ્રદ્ધા અને અડગતાની કસોટીરૂપ હતી. પચ્ચખાણ કર્યા બાદ ટુંટીઉ થયું હતું, છતાં પણ કસોટીમાંથી પાર ઊતર્યા હતા. તેમણે પાંચમ, અગિયારસ અને વીશસ્થાનકની ઓળી તથા વિધિસહિત નવપદજીની ઓળી પણ કરી હતી.

તેઓ ધર્મશ્રદ્ધાની અડગતાના કારણે પ્રતિવર્ષ શત્રુંજય યાત્રા માટે જતા હતા. અને શ્રીસમ્મેતશિખરજી જેવા દૂર રહેલા તીર્થની પણ ચાર વખત યાત્રા કરી હતી. નજીકમાં રહેલાં ગિરનારજી, શંખેશ્વરજી, આબૂજી, પાનસર, ભોયણી અને માતર જેવાં તીર્થોની યાત્રા તો તેઓ વારંવાર કરતા જ હતા.

આવશ્યક ક્રિયામાં પ્રતિક્રમણનો શોખ યુવાવસ્થામાંથી જ લાગ્યો હતો. અને ડૉકટરના જેવો પ્રવૃત્તિમય ધંધો હોવા છતાં તેઓ પ્રતિક્રમણ હમેશાં કરતા હતા. અમદાવાદમાં આવ્યા બાદ પંદર વર્ષ સુધી તબિયત સારી રહી ત્યાંસુધી પ્રતિક્રમણ કરતા હતા, હમેશાં ઉકાળેલું પાણી વાપરતા હતા, પ્રતિદિન જિનપૂજા કરતા હતા, પૂજા ભણાવવાનો તેમનો શોખ અમદાવાદના તેમના મિત્રોમાં પ્રસિદ્ધિ પામ્યો હતો.

મણીભાઈ વિદ્યાર્થી અવસ્થામાં-ફક્ત સોળ વર્ષની ઉમ્મરના-હતા ત્યારે તેમના પિતાશ્રી ગૂજરી ગયા હતા, છતાં સતત પરિશ્રમ કરી તેઓ આગળ વધ્યા હતા. તેઓને ચાર સંતાન હતાં: બે દીકરાઓ અને બે દીકરીઓ, જેમાં મોટા

પુત્ર જસવંતલાલ અને નાના રસિકલાલ તથા મોટાં દીકરી શાન્તાબેન અને એથી નાના પ્રભાવતી બેન હતાં.

જસવંતલાલના પ્રાથમિક શિક્ષણનો પાયો શેઠ મનસુખભાઇ ભગુભાઇ સ્થાપિત શાળામાં રચાયો હતો. અંગ્રેજીમાં મેટ્રિકના ધોરણમાંની એક ટર્મ પ્રોપ્રાયટરી હાઇસ્કૂલમાં ભરી એટલામાં અસહકારની ચળવળ ઉપડતાં સ્વમાની અને દેશાભિમાની ભાઇ જસવંતલાલે સ્કૂલ છોડી દીધો અને વ્યવસાયમાં પડયા. ભાઇ જસવંતલાલે પણ પિતાના ઉચ્ચસંસ્કારને મેળવવા વ્યવહારિક શિક્ષણ સાથે ધાર્મિક અભ્યાસ પણ કર્યો હતો.

બેન શાન્તાને નાની ઉમ્મરથી જ વ્યવહારિક અને ધાર્મિક શિક્ષણ મળ્યું હતું. અને બેન પ્રભાવતીને છ ધોરણ ગૂજરાતીનો અભ્યાસ કરાવ્યો હતો. પરન્તુ નાના ભાઇ રસિકલાલની બિમારીના કારણે વારંવાર ઘરના કામકાજમાં રહેવું પડતું અને નિશાળમાં હાજરી આપી શકાતી નહોતી જેથી જોઇએ તેટલો વિકાસ કરી શકયાં નહોતાં અને શાળા છોડી દેવી પડી હતી.

મણીભાઈના નાના પુત્ર ભાઇ રસિકલાલ એ ત્રીજા સંતાન હતા. તેમના બન્ને પગની પાનીઓનાં હાડકાં સડતાં હતાં, જના ઉપચાર માટે અમદાવાદ, નડિઆદ, આણંદ વગેરે સ્થાનોના રોગના નિષ્ણાત તમામ ડોકટરોને બતાવતાં દરેકનો અભિપ્રાય કાંડાથી પગ કાપી નાખવાનો હતો. પરંતુ અનુભવી શ્રી મણીભાઇએ આત્મવિશ્વાસ અને અડગ શ્રદ્ધા રાખી તેમ ન કર્યું અને રસિકલાલને કલકત્તે લઇ ગયા. જ્યાં એક અમેરીકન ડોકટરના હાથે હોમીયોપેથીક દવા કરી અને ભાઇ

રસિકલાલની બિમારીનો સુગમ માર્ગ શોધી સાજા કરી અમદાવાદ આવ્યા. આ પછી શ્રીમણિભાઇ બિમાર પડયા અને તે બિમારી જીવનનો અંત લેનારી નીવડી. ચાર મહિના સુધી બિમારી ભોગવતાં ભોગવતાં ધાર્મિક ઉચ્ચ સંસ્કારને કારણે હમેશાં પુણ્યપ્રકાશનું સ્તવન, પોરસીનું પચ્ચકખાણ, સ્તવન, સ્તુતિદ્વારા જિનેશ્વર ભગવાનની ભક્તિ તથા માંદગીના બિછાને પડયા પડયા પણ સાંવત્સરિક પ્રતિક્રમણની પવિત્ર ક્રિયાદ્વારા જગતના સમસ્ત જીવોની સાથે ક્ષમાયાચના કરી અને જીવનના અંત સુધી પરમપવિત્ર નવકારમંત્રનું સ્મરણ કરતાં કરતાં સુવાસમય બગીચાના ફળ સમા યશસ્વી અને ઉદ્યમશીલ જસુભાઇ જેવા સંતાનોને મૂકી તેઓએ સં. ૧૯૮૫ના ભાદરવા વદિ ૧ ના રોજ દેહ છોડયો.

પિતા પ્રત્યેની પરમભક્તિ અને તેઓ તરફથી મળેલા ઉચ્ચ સંસ્કારદ્વારા જ્ઞાનપિપાસાની પૂર્તિ નિમિત્તે ભાઈ જસવંતલાલે આ પુસ્તકના પ્રકાશનમાં સંપૂર્ણ સહાય કરી છે, તે બદલ તેઓને ધન્યવાદ ઘટે છે.

—પ્રકાશક

ॐ अर्हं नमः ॥

श्रीगौतमस्वामिने नमः ॥

सर्वतन्त्रस्वतन्त्रसद्गुरुश्रीविजयनेमिसूरीश्वरेभ्यो नमः ॥

चातुर्वैद्यविशारद-महामहोपाध्याय-श्रीविनयविजयगणिवर-
विरचितम्

# इन्दुदूतम् ।

## ( खण्डकाव्यम् )

[ प्रकाशाख्यया व्याख्यया समुट्टङ्कितम् ]

चिज्ज्योत्स्नायां वचनकिरणैर्विश्वविश्वे प्रसारो,
दुर्वादीरं-मदघनघटा-भिर्न रुद्धः कदापि ॥
राजाभ्यर्च्यं समरसभृतं सत्कलं निष्कलङ्कं,
तं श्रीवीरं स्फटिकविमलं पूर्णचन्द्रं प्रणौमि ॥ १ ॥

जाड्यादिदोषान्मतिविप्रयुक्ताः, श्रीइन्दुदूतेन प्रतापिता ये ॥
सद्वृत्तिसख्या कृतसम्प्रयोगाः, प्रकाशपूर्णेऽत्र चिरं रमन्ताम् ॥२॥

इन्दुदूताभिधं खण्ड-काव्यं प्रकाशसंयुतम् ॥
उपदीक्रियते सम्यक्, सज्जनानां मुदे हितम् ॥ ३ ॥

स्वस्तिश्रीप्रभूतपरमपुरुषपरमात्मप्रासादपरिमण्डिते **श्रीसूर्यपुर**( सूरत )नगरे कृतज्येष्ठस्थितीनाचार्यपादान् निजानुपमानुभाववशीकृतविश्वजनान् विश्वजनीनान् **श्रीविजयप्रभसूरीश्वरमहाराजान्** प्रति श्रीमन्मरुधरदेशे मणिवन्मनोरमे सम्पत्समञ्चिते **श्रीयोधपुर**नगरे विहितचातुर्मासवासः साहित्य–व्याकरणागमादिसमस्तशास्त्रविद्वरेण्यः **श्रीविनयविजय**नामा महामहोपाध्यायः सांवत्सरिकक्षमापणसन्देशं प्रेषयितुमभीप्सुर्भाद्रपदराकारजन्यामुदितमिन्दुं दूतीकृत्य स्ववाचिकं व्याचक्षाणः प्रथमं विघ्नविघातनिघ्नं नमस्कारात्मकं मङ्गलमभिधेयादिकं च निबध्नाति । **स्वस्तीति—**

**स्वस्तिश्रीणां भवनमवनी–कान्तपङ्क्तिप्रणम्यं,**
**प्रौढप्रीत्या परमपुरुषं पार्श्वनाथं प्रणम्य ॥**
**श्रीपूज्यानां गुरुगुणवता–मिन्दुदूतं प्रभूतो–**
**दन्तं लेखं लिखति विनयो लेखलेखाननतानाम् ॥१॥**

अन्वयः–स्वस्तिश्रीणां भवनम् अवनीकान्तपङ्क्तिप्रणम्यं, परमपुरुषं पार्श्वनाथं प्रौढप्रीत्या प्रणम्य, विनयः लेखलेखाननतानां गुरुगुणवतां श्रीपूज्यानां प्रभूतोदन्तम् इन्दुदूतं लेखं लिखति ॥

**प्रकाशः–स्वस्तिश्रीणां भवनम्**–स्वस्ति-मङ्गलं तच्चासौ श्रीः-रमा तासां भवनम्–आस्थानम्, कल्याणकमलामन्दिरम्, श्रेयः-सम्पदामास्पदमिति यावत् । यद्वा स्वस्तीति पृथक् प्रारम्भे भूयोमङ्गलाय, ततः श्रीणां भवनम्–बाह्याभ्यन्तरसमृद्धीनामुत्पत्तिस्थानमित्यर्थः । 'आमो नाम् वा' ।१।४।३१। इति वैकल्पिक–नामादेशे

श्रीणामिति । भवन्त्यस्मिन्निति विग्रहे भूधातोराधारे 'करणाधारे' ।५।३।१२९। इत्यनेन 'अनटि' भवनम् । **अवनीकान्तपङ्क्तिप्रणम्यम्**–अवनेः-पृथिव्याः कान्तः-स्वामी तस्य पङ्क्तिः-श्रेणिः तया प्रणम्यः-वन्दनीयः तम्, राजराजीनमस्करणीयम्, अवति-रक्षति प्रजाः, अव्यते भूपैरिति वा अवनिः 'सदिवृत्य–' (उणादि-६८०) इत्यनिः 'इतोऽक्त्यर्थात्' ।२।४।३२। इति ङ्याम् अवनी। प्रणम्यते य इति विग्रहे प्र+नम् धातोः कर्मणि 'शकितकि–पवर्गात्' ।५।१।२९। इति यप्रत्यये 'अदुरुपसर्गा–' ।२।३।७७। इति णत्वे प्रणम्यः । **परमपुरुषम्**–परमात्मानम्, परं-परत्वं मातीति परावा उत्कृष्टा मा-लक्ष्मीर्यस्येति परमः । **पार्श्वनाथम्**–तदाख्यं त्रयोविंशं तीर्थपतिम् । **प्रौढप्रीत्या**–समधिकस्नेहेन, उल्लसद्भक्तिभरनिर्भरहृदयेनेति यावत् । **प्रणम्य**–अभिवन्द्य, **विनयः**–महामहोपाध्यायश्रीविनयविजयगणिनामा वाचकप्रवरः, **लेखलेखानतानाम्**–लेखः-लेखनीयः लेखो-निबन्धो येषां ते विबुधास्ते आनता येषु-तेषाम्, कोविदप्रणतानाम्, पण्डितपरिपूजितानामिति यावत्, लिख्यते यत् इति कर्मणि घञि प्रथमलेखपदेन लेखनीयस्य, लिख्यते यत्रेत्याधारे घञि सति द्वितीयलेखपदेन निबन्धस्यावबोधः, उभयत्र 'भावाऽकर्त्रोः' ।५।३।१८। इतिघञ् एवञ्च पण्डितानामेव लेखस्य लेखनीयतया लेखलेखपदेन यौगिकेन पण्डितरूपोऽर्थः स्पष्टतयोपलभ्यते । यद्वा लेखानां-देवानां लेखा-राजिः सा नता येषु तेषाम्, लिख्यन्ते चित्रादौ ध्यानार्थमिति लेखाः, हस्तादौ प्रशस्ता लेखाः सन्त्येषामिति वा अभ्रादित्वाद् अः, इति व्युत्पत्त्या लेखपदेन देवस्य

बोधनम् तथा च **हैमः** 'देवाः सुपर्वसुरनिर्जरदेवतर्भू-बर्हिर्मुखानि-मिषदैवतनाकिलेखाः ॥' 'राजिलेखा ततिर्वीथी, मालाल्यावलिपङ्क्तयः' इति **हैमः**। एवञ्च देवतालिनमस्कृतानाम्, **गुरुगुणवताम्**-गुरवो महान्तश्च ते गुणाः सद्गुणास्ते सन्ति येषु तेषाम्, महासद्गुणशालिनाम्, अथवा गुरोराचार्यस्य गुणाः षट्त्रिंशत्सङ्ख्याका विशिष्टा गुणाः 'पञ्चिन्दियसंवरणो, तह य नवविहबंभचेरगुत्तिधरो। चउविहकसायमुक्को, इअ अट्ठारस गुणेहि संजुत्तो ।१। पंचमहव्वयजुत्तो, पंचविहायारपालणसमत्थो। पंचसमिओ तिगुत्तो, छत्तीसगुणो गुरू मज्झ ॥२॥" इतिसूत्रप्रतिपादिताः सन्ति येषु तेषाम्, सूरिषट्त्रिंशद्गुणभाजाम् **श्रीपूज्यानाम्**—आचार्यप्रवराणाम्। **प्रभूतोदन्तम्**-प्रचुरवृत्तम्, "वार्ताप्रवृत्तिर्वृत्तान्त उदन्त" इति **हैमः**। **इन्दुदूतम्**-इन्दुश्चन्द्रः दूतः सन्देशवाहको यस्य तम्, तदभिधमिति-यावत्। लेखम्—सन्देशम्। लिखति—निबध्नाति। मन्दाक्रान्तावृत्तमाकाव्यम्, तथा च तल्लक्षणम्—'मन्दाक्रान्ता जलधिषडगैर्म्भौ तनौ ताद्गुरू चेत्' इति। यत्र वर्णानामनेकवारमावृत्तिस्तत्र वृत्त्यनुप्रासः इति प्रकृते वृत्त्यनुप्रासालङ्कृतिः ॥ १ ॥

( २ )

अथ सूक्तषट्केन श्रीयोधपुरनगरं वर्णयति, तत्रादौ श्रीजिनमन्दिरवर्णनम्। **यत्रेति**—

**यत्र व्योम-व्यतिगशिखरे-ष्वर्हतां मन्दिरेषु,**
**मूर्तीर्जैनी-र्नयनसुभगा-श्चन्द्रशालानिविष्टाः ॥**

**दर्शं दर्शं विनयविनतोऽ-धो विमानावतार-**
**क्लेशं नासा-दयति निकरो हृद्यविद्याधराणाम् ॥२॥**

(अन्वयः) यत्र व्योमव्यतिगशिखरेषु अर्हतां मन्दिरेषु चन्द्रशालानिविष्टाः नयनसुभगाः जैनीः मूर्तीः दर्शं दर्शं विनयविनतः हृद्यविद्याधराणां निकरः अधो विमानावतारक्लेशं नासादयति ॥२॥

(प्रकाशः) यत्र—यस्मिन्, नगरे इतिशेषः, **व्योमव्यतिगशिखरेषु**—व्योम्नि व्योम वा व्यतिगच्छतीति व्योमव्यतिगं तादृशं शिखरं येषां तेषु, गगनचुम्बिशृङ्गेषु, **अर्हतां मन्दिरेषु**—श्रीजिनेश्वरप्रासादेषु, **चन्द्रशालानिविष्टाः**—चैत्योपरितनभागस्थिताः 'चन्द्रशाला शिरोगृहम्' इति हैमः । **नयनसुभगाः**—नेत्राह्लादसम्पादिकाः, **जैनीः मूर्तीः**—अर्हत्प्रभोः प्रतिमाः, जिनस्येयमिति विग्रहे 'तस्येदम्' ।६।३।१६०। इत्यणि ' अणञेयेकण '—।२।४।२०। इति ङयाम्, जैनी ताः, **दर्शं दर्शं**—दृष्ट्वा दृष्ट्वा दृश्धातोः 'ख्णं चाभीक्ष्ण्ये' ।५।४।४८। इति ख्णमि ' भृशाभीक्ष्ण्या '—।७।४।७३। इति द्वित्वे दर्शं दर्शम्, ननु मूर्तीर्जैनीरित्यत्र दर्शं दर्शमिति कृद्योगे 'कर्मणि कृतः कर्तरि च' ।२।२।८३। इति षष्ठी कुतो नेति चेत्, न, दर्शमिति ख्णंप्रत्ययान्तस्य 'क्त्वातुमम्' ।१।१।३४। इत्यनेनाव्ययत्वात् 'तृन्नुदन्ताव्यय–' ।२।२।९०। इति सूत्रेण षष्ठ्या बाधे द्वितीयायाः सौलभ्यात् । **विनयविनतः**—शास्त्रजनितसंस्कारविशेषो विनयस्तेन विनतः विनम्रः **हृद्यविद्याधराणां निकरः**—हृद्याश्च ते विद्याधरास्तेषां निकरः—समूहः—मनोज्ञप्रज्ञप्तिरोहिणीप्रमुखविद्याशालिनां नरविशेषाणामोघः 'सङ्घाते प्रकरौघवारनिकरव्यूहाः समूहश्चयः' इति

हैमः । **अधः**–नीचैः भूमावितियावत्, **विमानावतारक्लेशं**–विमानस्य अवतरणम्–अवतारः तेन जनितः क्लेशस्तम्, स्वयामनंयनजन्यदुःखम्, **नासादयति**–नाधिगच्छति । यतश्च मूर्तयः चन्द्रशालानिविष्टाः सन्तीति उपरिष्टादेव विमानात् तासां दर्शनं भवति तेषामिति नीचैरागमनप्रयासायासो न विधीयतेतरां तैरितिभावः । अनुप्रासः ।

( ३ )

तत्र पुरपरिसरवर्तिपञ्चकूटपर्वतोपरिभागनिवसद्राजलोकमुत्प्रेक्षते । **यत्रेति—**

**यत्रोत्सर्प-च्छिक(ख)रकिरणैः शोभयन्नभ्रदेशं,**
**साक्षाल्लक्ष्मी-वसतिरनिशं राजते राजलोकः ॥**
**मेर्वारूढ-त्रिदशनगर-स्पर्धयेवाधिरूढं,**
**शैलाग्रण्यं कनकनिकष-स्निग्धभं पञ्चकूटम् ॥ ३ ॥**

(अन्वयः) यत्र उत्सर्पच्छिखरकिरणैः अभ्रदेशं शोभयन् साक्षाल्लक्ष्मीवसतिः राजलोकः मेर्वारूढत्रिदशनगरस्पर्धया इव कनकनिकषस्निग्धभं पञ्चकूटं शैलाग्रण्यम् अधिरूढम् अनिशं राजते ।

**( प्रकाशः )** यत्र–यस्मिन् पुरे **उत्सर्पच्छिखरकिरणैः**–शिखरः–मुकुटस्थितरत्नविशेषस्तस्य किरणाः–उत्सर्पन्तश्च ते शिखरकिरणाः तैः, उद्गच्छद्रत्नविशेषरश्मिभिः 'शिखरः–रत्नभेदे च' इति शब्दस्तोममहानिधिः । **अभ्रदेशं**–गगनप्रदेशम् । **शोभयन्**–

१ मुद्रितपुस्तके शिकरकिरणैरित्युपलभ्यते परं शिकरशब्दस्यानुपलम्भेनार्थविशेषाभावेन च स पाठः परित्यक्तः ।

विभूषयन्, **साक्षाल्लक्ष्मीवसतिः**–प्रत्यक्षश्रीनिवासस्थानम्, लक्ष्यते इति लक्ष्मीः 'लक्षेर्मोऽन्तश्च' (उणा० ७१५) इति ईः। **राजलोकः**–नृपजनः, **मेर्वारूढत्रिदशनगरस्पर्धया**–त्रिदशानां नगरं त्रिदशनगरं मेरुम् आरूढं मेर्वारूढं–तच्चादः तस्य स्पर्धा–तया कनकाचलवर्तिसुरपुरपराभवेच्छया, तिस्रो दशाः जन्मसत्ताविनाशाख्या न तु वृद्धिपरिणामक्षया मर्त्यानामिव दशा येषां ते, अथवा त्र्यधिकाः त्रिरावृत्ताश्च दश परिमाणमेषां ते एकस्यैव त्रिशब्दस्य तन्त्रतयोच्चारणादुभयार्थपरत्वम्, 'प्रमाणीसङ्ख्याड्डः' ।७।३।१२८। इति डः, शाकपार्थिवादित्वादधिकावृत्तयोर्लोपः, त्रयस्त्रिंशद्देवता यथा अर्का द्वादश रुद्रा एकादश वसवोऽष्टौ विश्वे देवौ द्वाविति, इदं च श्रुत्यनुसारेण, यद्वा त्रिंशद्वर्षा मनुष्ययुवानस्त्रिदशाः त इव त्रिदशाः इति अयमाशयः, वर्षशतायुष्काणां नृणां दशा दश भवन्ति ताश्चेमाः

**'बाला, किड्डा, मन्दा, बला, य पन्ना, य हायणी, पवंचा।**
**पब्भारा, मुम्मुही, सायणी, य दसमा य कालदसा ॥'**

तत्र तृतीया दशा भोगोपभोगार्हा, यदुक्तम्,

**'तइयं च दसं पत्तो, पञ्चकामगुणे नरो।**
**समत्थो भुंजिउं लोए, जइ से अत्थि घरे धुवा ॥'**

एवञ्च देवानां सर्वदा उक्ततृतीयदशानुभावकत्वात् त्रिदशत्वमिति। **इव**–किम्, **कनकनिकषस्निग्धभं**–कनकस्य निकषः तस्य स्निग्धस्तदिव भा यस्य तम्, स्वर्णपरीक्षकपाषाणमसृणप्रभम्, कमनीयकाञ्चनकषकान्तकान्तिकलितमितियावत्। **पञ्चकूटं**–पञ्च

कूटाः शिखराणि यस्य स तम्, तदाख्यगिरिविशेषम्, **शैलाग्रण्यं**-पर्वतप्रधानम्, **अधिरूढं**-प्राप्तं यथा स्यात्तथा, राजते इत्यस्य विशेषणम्, **अनिशं**-सततम्, **राजते**-शोभते, उत्प्रेक्षा ॥ ३ ॥

( ४ )

पर्वतीयप्रदेशत्वेन तद्देशस्योच्चावचत्वात्तत्र गृहाणां व्यवस्थाराहित्यमास्ते तदुत्प्रेक्षते । **यत्रेति**—

**यत्रेभ्यानां भवनततयः काश्चिदद्रेस्तटाग्रं,**
**प्राप्ताः काश्चित् पुनरनुपदं सन्ति तासामधस्तात् ।**
**काश्चिद्भूमा-वपि भृशवल-त्केतवः कान्तिदृप्ता,**
**निर्जेतुं द्या-मिव रुचिमदात् प्रस्थिता निर्व्यवस्थम् ॥४॥**

(अन्वयः) यत्र इभ्यानां काश्चित् भवनततयः अद्रेः तटाग्रं प्राप्ताः पुनः काश्चित् अनुपदं तासाम् अधस्तात् सन्ति काश्चित् भूमौ अपि (वर्तन्ते) (एताः) भृशवलत्केतवः कान्तिदृप्ताः रुचिमदात् द्यां निर्जेतुम् इव निर्व्यवस्थं प्रस्थिताः ॥ ४ ॥

**(प्रकाशः) यत्र**-यस्मिन् पत्तने, **इभ्यानां**-धनिनाम्, इभं हस्तिनम् अर्हन्तीति इभ्याः 'दण्डादेर्यः' ।६।४।१७८। इति 'यः' श्रेष्ठिनामितियावत् । **काश्चित्**-कियत्यः **भवनततयः**-वेश्ममालाः, **अद्रेः**-शिखरिणः अद्यते वज्रेण इत्यद्रिः 'तङ्किवङ्कि-' (उणा-६९२) इति रिः, 'शैलोऽद्रिः शिखरी' इति हैमः । **तटाग्रं**-शिखरम्, उपरिभागमिति यावत् **प्राप्ताः**-स्थिताः, **पुनः**-काश्चित्, **अनुपदं**-क्रमशः पदस्य पश्चादिति विग्रहे 'विभक्ति-समीप-'

।३।१।३९। इति समासे अनुपदम्, **तासाम्**-शिखरवर्तिभवनततीनाम्, **अधस्तात्**-अधोभागे-नीचैः, अधरे देशे इत्यधस्तात् 'पूर्वाधरावरेभ्यो-' ।७।२।११५। इत्यस्ताति अधादेशे च सिद्धम्, **सन्ति**-आसते, **काश्चित् भूमौ**-पृथिवीप्रदेशे अपि वर्तन्ते इति शेषः, एताः **भृशवलत्केतवः**-भृशं वलत् केतुर्यासां ताः अतिशयचञ्चत्पताकाः, चाय्यते लक्ष्यतेऽनेनेति केतुः 'चायः के च' (उणा० ७७८) इति तुः चायश्च के आदेशः 'वैजयन्ती पुनः केतुः पताका केतनं ध्वजः' इति हैमः। **कान्तिदृप्ताः**-द्युतिगर्विताः, **रुचिमदात्**-सौन्दर्याभिमानात् **द्यां**-स्वर्गम्, द्युक् अभिगमे द्यौति अभिगच्छति अमुं सुरजन इति 'द्युगमिभ्यां डोः' (उणा० ८६७) इति डोप्रत्यये द्योशब्दः ओकारान्तः तस्माद्द्वितीयैकवचने 'आ अम्-शसोऽता' ।१।४।७५। इत्यात्वे द्यामिति। 'स्वर्गस्त्रिविष्टपं द्योदिवौ' इति हैमः। **निर्जेतुं**-पराभवितुम्, **इव**-शङ्के इवेति उत्प्रेक्षासूचकम्, यदुक्तं 'मन्ये शङ्के ध्रुवं प्रायो, नूनमित्येवमादयः। उत्प्रेक्षाव्यञ्जकाः शब्दाः, इव शब्दोऽपि तादृशः॥' इति। **निर्व्यवस्थम्**-व्यवस्थारहितं यथा स्यात्तथा व्यवस्थायाः निष्क्रान्तमिति निर्व्यवस्थम्, 'प्रात्यवपरिनिरादयो-' ।३।१।४७। इति समासः इतस्तत इति यावत् **प्रस्थिताः**-कृतप्रयाणाः सन्तीति शेषः ॥ ४ ॥

( ५ )

तत्रत्यमुपवनं वर्णयति। **यत्रेति**—

**यत्र क्रीडो-पवनपदवी क्रीडतां नागराणां।**
**विष्वक्तौर्य-त्रिकपरिचय-प्रीतिमाविष्करोति ॥**

**नृत्यत्केकि-प्रकरसुभगा मञ्जुगुञ्जद्द्विरेफा ।**
**वातोद्धूत-द्रुमदलतति-ध्वानवादित्रहृद्या ॥ ५ ॥**

(अन्वयः) यत्र नृत्यत्केकिप्रकरसुभगा मञ्जुगुञ्जद्द्विरेफा वातोद्धूतद्रुमदलततिध्वानवादित्रहृद्या क्रीडोपवनपद्वी क्रीडतां नागराणां विष्वक् तौर्यत्रिकपरिचयप्रीतिम् आविष्करोति ॥५॥

(प्रकाशः) यत्र-यस्मिन् नगरे **नृत्यत्केकिप्रकरसुभगा**-नृत्यन्तश्च ते केकिनस्तेषां प्रकरस्तेन सुभगा, नृत्यं कुर्वन्मयूरसमूहसुन्दरा, मयूराणां लास्येन मनोरमेति यावत्, **मञ्जुगुञ्जद्द्विरेफा**-मञ्जु यथा स्यात्तथा गुञ्जन्तो द्विरेफा यत्र सा, मधुराव्यक्तध्वनिं विदधन्मधुकरकलिता, द्वौ रेफौ यस्य नाम्नि स द्विरेफः-भ्रमरः द्विरेफशब्दस्य भ्रमरपदार्थे लक्षितलक्षणा-स्ववाच्यरेफद्वयघटितपदवाच्यत्वसम्बन्धरूपावसेया । **वातोद्धूतद्रुमदलततिध्वानवादित्रहृद्या**-वातेन उद्धूतानि द्रुमाणां दलानि तेषां ततिस्तस्या ध्वानः स एव वादित्रं तेन हृद्या-पवनप्रकम्पितपादपपत्रपुञ्जनिस्वानवाद्यमनोज्ञा, वदति आहन्यमानं वादित्रम् 'भूगृवदिचरिभ्यो णित्' (उणा-४६०) इति 'इत्रः' 'वाद्यं वादित्रमातोद्यम्' इति हैमः । **क्रीडोपवनपद्वी**-समीपे वनम् उपवनं क्रीडायै उपवनं तस्य पदवी, विनोदवाटिकावर्त्म, 'पदव्येकपदी पद्या, पद्धतिर्वर्त्मवर्तनी' इति हैमः । **क्रीडताम्**-रममाणानाम् **नागराणाम्**-पौरजनानाम्, **विष्वक्**-परितः विश्वमञ्चतीति विष्वक् यथा 'विष्वग् व्याप्य स्थितो महीम्', 'परितः सर्वतो विष्वक्' इति हैमः, **तौर्यत्रिकपरिचयप्रीतिम्**-तूर्यस्येदं त्रिप्रमाणं तौर्यत्रिकं तस्य परिचयोऽनुभवस्तस्य

प्रीतिस्ताम्, सङ्गीतसाक्षात्कारस्नेहम्, 'गीतनृत्यवाद्यत्रयं नाट्यं तौर्यत्रिकं च तत्' इति हैमः। 'वनेऽपि तौर्यत्रिकम्' इति नैषधे, आविष्करोति-प्रकटयति, निर्दुर्बहिराविष्-' ।२।३।९। इति षत्वे आविष्करोति । अयं हि अभिप्रायः, तत्र क्रीडाकानने सर्वदा सर्वतो नैसर्गिकं सङ्गीतं प्रचलति तथाहि-'नृत्यं गीतं च वाद्यं च, त्रयं सङ्गीतमुच्यते' इत्यभियुक्तोक्तेः सङ्गीते नृत्यगीतवाद्यापेक्षा भवति इति प्रकृतेऽपि तत्रितयमस्त्येव यथा मयूराणां नृत्यम्, मधुकराणां मनोरमो ध्वनिः-गुञ्जारवो-गीतम्, समीरणसञ्चालितपादपपर्णप्रकराणां शब्दो वाद्यमिति ।

**अत्र विशेषमालोचयामः**-'क्रियान्वयेन शान्ताकाङ्क्षस्य विशेष्यवाचकपदस्य विशेषणान्तरेणान्वयार्थं पुनरनुसन्धानं' समाप्तपुनरात्तत्वदोषः, प्रकृते स हि काव्यदोषः, तथाहि 'क्रीडोपवनपदवी... प्रीतिमाविष्करोति' इत्यत्र आविष्करोति क्रियान्वयेन शान्ताकाङ्क्षस्य विशेष्यवाचक-क्रीडोपवनपदवीपदस्य नृत्यत्केकिप्रकरसुभगेत्यादिविशेषणत्रयान्तरेणान्वयार्थं पुनः सा क्रीडोपवनपदवी कीदृशीत्यनुसन्धानादिति **चेत्-उच्यते** आकाङ्क्षा द्विविधा भवति उत्थाप्याकाङ्क्षा उत्थिताकाङ्क्षा च तत्रोत्थाप्याकाङ्क्षया विशेषणान्तरान्वयस्थल एव स दोषो न तूत्थिताकाङ्क्षया विशेषणान्तरान्वयस्थले, प्रकृते च उपवने तौर्यत्रिकं किम्? इति उत्थिताकाङ्क्षयैव नृत्यत्केकीत्यादि विशेषणान्तरस्योपादानेन तद्दोषस्यानवकाशात् । समाप्तपुनरात्तत्वस्यानुगमस्तु-वाक्यविशिष्टत्वम्-वैशिष्ट्यं च स्वतादात्म्य-स्वविशिष्टविशेषणवाचकपदघटितत्वोभयसम्बन्धेन, तत्रापि वैशिष्ट्यं स्वघटकविशेष्य-

वाचकपदावधिकपूर्वत्वाभाववत्त्व-स्वघटकपदजनिताकाङ्क्षाशामकार्थाबोधकत्वोभयसम्बन्धेन, तथाहि 'नाशयन्तो घनध्वान्तं, तापयन्तो वियोगिनः । पतन्ति शशिनः पादा, भासयन्तः क्षमातलम्' ॥ इत्यत्र श्लोकात्मकं वाक्यं स्वपदार्थः तत्र स्वतादात्म्यं वर्तते अथ च स्वविशिष्टं विशेषणं भासयन्त इति तत्र विशेषणे स्वघटकविशेष्यवाचकपादा इति पदावधिकपूर्वत्वाभाववत्त्वस्य स्वघटकनाशयन्त इति पदजनित कथं नाशयन्त इत्याकाङ्क्षाशामकार्थाबोधकत्वस्य च सत्त्वेन तादृशोभयसम्बन्धेन वाक्यविशिष्टविशेषणवाचकभासयन्त इति पदघटितत्वं वर्तते इति ।

( ६-७ )

शिखरिशिखरस्थोपलरचितं हस्तिनमुत्प्रेक्षते श्लोकद्वयेन 'श्याममिति' 'स्थास्नुरिति'च-

**श्यामं यस्मि-न्नुपलरचितं दन्तिनं मत्तरूपं ।**
**पुंरूपाभ्या-मुपरि कलितं वीक्ष्य शङ्केऽद्रिशृङ्गे ॥**
**उत्तीर्यैत-त्पुरमनुपमं स्वर्गलोकादिहेन्द्रोऽ-**
**द्राक्षील्लोकै-रिति विरचितं चिह्नमेतच्चकास्ति ॥ ६ ॥**

**स्थास्नुः शुण्डा-युधमिव मदात् कुण्डलीकृत्य दन्तौ**
**कृत्वोत्ताना-वुपलरचितो यत्र हस्त्यद्रिशृङ्गे ॥**
**स्वर्गं जेतुं नभसि रभसा-दारुरुक्षोरमुष्य ।**
**शृङ्गस्येव स्फुटयति महा-धीरनासीरभावम् ॥ ७ ॥**

(अन्वयः) यस्मिन् अद्रिशृङ्गे उपलरचितं मत्तरूपं श्यामम्

उपरि पुंरूपाभ्यां कलितं दन्तिनं वीक्ष्य शङ्के (यत्) इन्द्रः स्वर्गलोकात् इह उत्तीर्य अनुपमम् एतत्पुरम् अद्राक्षीत् इति लोकैः विरचितम् एतत् चिह्नं चकास्ति ।६। यत्र अद्रिशृङ्गे स्थास्नुः उपलरचितः हस्ती मदात् शुण्डायुधं कुण्डलीकृत्येव दन्तौ उत्तानौ कृत्वेव जेतुं स्वर्गं रभसाद् नभसि आरुरुक्षोः अमुष्य शृङ्गस्य महाधीरनासीरभावं स्फुटयतीव ।७।

(प्रकाशः) **यस्मिन्**–नगरे, **अद्रिशृङ्गे**–गिरिशिखरे, **उपलरचितम्**–पाषाणनिर्मितम्, **मत्तरूपम्**–अतिशयेन मत्तं–मदोन्मत्तमितियावत्, 'त्यादेश्चप्रशस्तेरूपप्' ।७।३।१०। इति 'रूपप्' **श्यामम्**–श्यामलम्, **उपरि**–हस्तिनः पृष्ठप्रदेशे, **पुंरूपाभ्याम्**–पुरुषाकाराभ्याम्, **कलितम्**–युक्तम्, **दन्तिनम्**–करिणम्, **वीक्ष्य**–विलोक्य, **शङ्के**–उत्प्रेक्षे, (यत्) **इन्द्रः**–देवराजा, **स्वर्गलोकात्**–अमरनिवासस्थानात् **इह**–अस्मिन् प्रदेशे, **उत्तीर्य**–अवतीर्य **अनुपमम्**–न विद्यते उपमा यस्य तत्–अनुपमम्–असदृशम्, **एतत्पुरम्**–पुरो दृश्यमानं नगरम्, **अद्राक्षीत्**–अवालुलोचत्, **इति**–इतिहेतोः, **लोकैः**–जनैः, **विरचितम्**–सम्पादितम्, **एतत्**–समीपतरवर्ति, **चिह्नम्**–स्मारकाकृतिविशेषः, **चकास्ति**–राजतेतराम् ॥६॥ अथवा **यत्र**–यस्मिन् पुरे, **अद्रिशृङ्गे**–पर्वतोपरितनप्रदेशे, **स्थास्नुः**–स्थैर्यशीलः–स्थिर इति यावत् तिष्ठत्येवं शीलमिति स्थास्नुः 'स्थाग्लाम्ला–' ।५।२।३१। इति 'स्नुः' **उपलरचितः**–शिलासम्पादितः 'ग्रावा शिलोपलः' इति हैमः । **हस्ती**–दन्ती, **मदात्**–गर्वात्, **शुण्डायुधम्**–शुण्डा एव आयुधम्–शुण्डायुधम् निजहस्तरूपास्त्रम्, 'हस्तिनासा करः शुण्डा' इति हैमः । **कुण्डलीकृत्येव**–अकुण्डलं कुण्डलं कृत्वेति

कुण्डलीकृत्य 'कृभ्वस्तिभ्याम्–' ।७।२।१२६। इति 'च्विः' 'ईश्चावर्णस्या–'।४।३।१११। इति अस्य 'ईः' 'ऊर्यादिच्वनुकरण–' ।३।१।२। इति गतिसंज्ञा, 'गतिः' ।१।१।३६। इति अव्ययसंज्ञा, 'अनञः क्त्वो यप्' ।३।२।१५४। इति 'यप्' इति सिद्धम्, कुण्डलसदृशमिव विधाय, **दन्तौ**–विषाणौ '(अस्य) दन्तौ विषाणौ' इति हैमः। **उत्तानौ**–उन्नतौ, **कृत्वा**–प्रकल्प्य, **स्वर्गम्**–दिवम्, **जेतुम्**–जयाय, **रभसाद्**–सहसा, **नभसि**–गगने, **आरुरुक्षोः** आरोढुमिच्छोः, **अमुष्य शृङ्गस्य**–एतच्छिखरस्य, **महाधीरनासीरभावम्**–महाँश्चासौ धीरः स चासौ नासीरः तस्य भावस्तम्–श्रेष्ठतराग्रसरत्वम्–'नासीरोऽग्रसरे श्रेष्ठे' इति कोषः, **स्फुटयतीव**–प्रकटयतीव।

( ८ )

एवं श्लोकषट्केनोपवर्णितश्रीयोधपुरनगरे श्रीविनयविजयाभिधोपाध्यायप्रवरेणाचार्यवर्याज्ञया चातुर्मासी व्यधायि तत् तत्र चन्द्रदर्शनञ्च वर्णयति। तस्मिन्निति—

**तस्मिन् योधा–भिधपुरवरे श्रीमदाचार्यपादा–**
**देशान् मासाँ–श्चतुर उषितो यो विनीतो विनेयः ॥**
**साधुः सैष प्रहरविगमे भाद्रराकारजन्याः,**
**प्राचीशैलो–परि परिगतं शीतरश्मिं ददर्श ॥ ८ ॥**

( अन्वयः ) तस्मिन् योधाभिधपुरवरे यः विनीतः विनेयः श्रीमदाचार्यपादादेशात् चतुरः मासान् उषितः स एष साधुः भाद्रराकारजन्याः प्रहरविगमे प्राचीशैलोपरि परिगतं शीतरश्मिं ददर्श ॥ ८ ॥

( **प्रकाशः** ) **तस्मिन्**-यत्तदोर्नित्यसम्बन्धात् यच्छब्देन पूर्व-वर्णिते, **योधाभिधपुरवरे**-योधपुरनगरे, यः **विनीतः**-नम्रः **विनेयः**-शिष्यः 'शिष्यो विनेयोऽन्तेवासी' इति हैमः । **श्रीमदाचार्यपादादेशात्**-भट्टारकाचार्यश्रीपूज्यश्रीविजयप्रभसूरीश्वरमहाराजनिदेशात्, 'पादा भट्टारको देवः, प्रयोज्यः पूज्यनामतः' इति हैमः । **चतुरो मासान्**-मासचतुष्टयम्, **उषितः**-न्यवसत्, वस् 'श्लिषशीङ्स्थासवस-' ।५।१।९। इति कर्तरि क्तः 'यजादिवचेः किति' ।४।१।७९। इति य्वृत् 'क्षुधवसस्तेषाम्' ।४।४।४३। इति इट् उषितः । **सैष साधुः**-स एष मुनिः 'तदः से स्वरे पादार्था' ।१।३।४५। इति पादपूरणे गम्ये सेर्लुकि सैषः । **भाद्रराकारजन्याः**-नभस्यपूर्णिमाविभावर्याः, भद्रया युक्ता पौर्णमासी भाद्री साऽस्त्यस्य भाद्रः, 'सा राका पूर्णे निशाकरे' इति हैमः । **प्रहरविगमे**-गते यामे, एतेन सम्पादितावश्यकविधेः सन्देशप्रेषयितुः सन्देशकथने नैश्चिन्त्यं पर्वतपरिकलितप्रदेशत्वेऽपि दूतस्येन्दोः दर्शने श्रमाभावश्च सोसूच्यते । **प्राचीशैलोपरि**-उदयाचलस्योपरिष्टात्-प्राच्यां स्थितः शैलः प्राचीशैलस्तस्योपरि प्रथममस्यामञ्चत्यादित्य इति प्राची क्विपि 'अञ्चः' ।२।४।३। इति ङीः, ऊर्ध्वे देशे उपरि 'ऊर्ध्वाद् रिरिष्टातावुपश्चास्य' ।७।२।११४। इति साधुः 'उपरिष्टादुपर्यूर्ध्वे' इति हैमः । ननु प्राचीशैलोपरीत्यत्र 'तृप्तार्थपूरणाव्यया-' ।३।१।८५। इति षष्ठीसमासप्रतिषेधेन कुतः समासः ?, न चातृशादिप्रत्ययसाहचर्येण कृदव्ययस्यैव ग्रहणात् समासः सम्पत्स्यत इति वाच्यम्, राज्ञः साक्षादित्युदाहृतत्वेन कृदकृत्साधारणस्यैवाव्य-

यस्य सूत्रकृतोऽभिप्रेतत्वादितिचेन्न अपवादभूतेन 'सर्वपश्चादादयः' ।३।१।८०। इत्यनेन समासस्य सम्भवात्, **परिगतम्**- सर्वतोभावेन वर्तमानम्, **शीतरश्मिम्**-चन्द्रमसम्, **ददर्श**-अद्राक्षीत् ॥ ८ ॥

( ९ )

कविकृत इन्दु स्वागतव्याहारोपक्रमः । दृष्ट्वेति—

**दृष्ट्वा चैनं स परमगुरु-ध्यानसन्धानलीन-**
**स्वान्तः कान्तं तमिति रजनेः स्वागतं व्याजहार ॥**
**सद्यः साक्षाद् गुरुपदयुगं नन्तुमुत्कण्ठितोऽपि,**
**द्रागेतेन स्थितिपरवशो वन्दनां प्रापयिष्यन् ॥ ९ ॥**

( अन्वयः ) रजनेः कान्तं तम् एनं दृष्ट्वा परमगुरुध्यानसन्धानलीनस्वान्तः सः (सजातः) इति सद्यः गुरुपदयुगं साक्षाद् नन्तुम् उत्कण्ठितोऽपि स्थितिपरवशः एतेन द्राक् वन्दनां प्रापयिष्यन् (इन्दोः) स्वागतं व्याजहार ॥ ९ ॥

( प्रकाशः ) **रजनेः कान्तम्**-निशानाथम्, **तमेनम्**-प्राचीपर्वतोपरि परिगतमिन्दुम्, **दृष्ट्वा**-विलोक्य, **परमगुरुध्यानसन्धानलीनस्वान्तः**-परमश्चासौ गुरुस्तस्य ध्यानं तस्य सन्धानं तत्र लीनं स्वान्तं यस्य सः, श्रीमदाचार्यवर्यविजयप्रभसूरीश्वरचरणचिन्तनानुसन्धानसंसक्तचेताः, **सः**-वाचकवरश्रीविनयविजयगणी, सञ्जातः इति शेषः, **इति**-अस्मात् कारणात्, **सद्यः**-तत्क्षणमेव, समानेऽहनि सद्यः, 'सद्योऽद्यपरेद्यवि-' ।७।२।९७। इति साधुः, 'सहसैकपदे सद्योऽकस्मात् सपदि तत्क्षणे' इति हैमः । **गुरुपदयुगम्**-श्रीमदाचार्यचरणकमलयमलम्, **साक्षात्**-प्रत्यक्षतः, **नन्तुम्**-नमस्कर्तुम्,

**उत्कण्ठितोऽपि**–उत्कण्ठा संजाताऽस्य उत्कण्ठितः 'तदस्य सञ्जातं तारकादिभ्य इतः' ।७।१।१३८। इति इतः, समुत्सुकोऽपि, **स्थितिपरवशः**–स्थित्यधीनः, **एतेन**–चन्द्रमसा सह, **द्राक्**–झटिति द्रवति द्राक् 'द्रागादयः' ( उणा० ८७० ) इति निपात्यते यथा 'द्राग् विद्रुतं कातरैः' 'द्राक् स्रागरं झटित्याशु' इति हैमः। **वन्दनाम्**–प्रणामम्–वन्दनवाचिकमितियावत्, **प्रापयिष्यन्**–प्र+आप्+णिच्+इ 'शत्रानशावेष्यति तु सस्यौ' ।५।२।२०। इति स्य+शतृप्रत्यये प्रापयिष्यन्–सङ्गमयिष्यन्, **इन्दोः**--**स्वागतम्**–शुभागमनम्,— ( Wel-Come ) 'स्वागतं स्वानधीकारान्' इति कुमारः। **व्याजहार**–व्याचष्ट, कृतवानितियावत्। अयं हि भावः–तत्र चन्द्रदर्शनानन्तरं श्रीविनयविजयोपाध्यायस्य श्रीमदाचार्यपादानां स्मरणं सञ्जातमिति तदानीमेव श्रीमद्गुरुपादारविन्दद्वन्द्वमभिवादितुमभिलाषः समजनि परमाचातुर्मासीं ततोऽन्यत्र गन्तुमशक्ततयाऽचिरगामिनमिन्दुं दूतीकृत्य नैजिकं वाचिकमभिवन्दनं प्रेषयितुमीहमानस्तदीयं सुखागमनमकार्षीत्। जनप्रसिद्धिरपि–येन सह कार्यं स्यात् पूर्वं तस्य सत्कारोऽवश्यं कर्तव्यो येन स प्रसन्नः सन् शीघ्रं कार्यं कुर्यादिति ॥ ९ ॥

( १० )

तदेव स्वागतं व्याहरति–**दिष्ट्येति**—

**दिष्ट्या दृष्टः सुहृदुडुपते!ऽस्माभिरद्यातिथिस्त्वं,**
**पीयूषौघै-र्भृशमुपचरन् प्राणिनामीक्षणानि ॥**

**पुण्यैः प्राच्यैः फलितमतुलै-रस्मदीयैरुपेया—**
**न्नापुण्यानां नयनविषयं यत्प्रियः स्मर्यमाणः ॥ १० ॥**

( अन्वयः ) सुहृत् ! उडुपते ! भृशं पीयूषौघैः प्राणिनाम् ईक्षणानि उपचरन् अतिथिः त्वम् अद्य अस्माभिः दिष्ट्या दृष्टः अस्मदीयैः प्राच्यैः अतुलैः पुण्यैः फलितम् यत् स्मर्यमाणः प्रियः अपुण्यानां नयनविषयं न उपेयात् ॥ १० ॥

( प्रकाशः ) **सुहृत् !**–मित्र ! शोभनं हृदयमस्य सुहृत् 'सुहृद्दुर्हृद्–' ।७।३।१५७। इति हृदादेशः । **उडुपते !**–इयर्ति स्वमिति 'उड् च भे' ( उणा० ७३८ ) इति उः अर्तेरुडादेशश्च उडु–ग्रहस्तस्य पतिः–नाथः तत्सम्बुद्धौ उडुपते ! 'भमुडु ग्रहः' इति हैमः, ग्रहेशेतियावत् । **भृशम्**–नितान्तम्, **पीयूषौघैः**–अमृतसमूहैः सुधास्यन्दैरितियावत्, **प्राणिनाम्**–चैतन्यभाजाम्, **ईक्षणानि**–नयनानि 'ईक्षणं नेत्रं नयनम्' इति हैमः । **उपचरन्**–सिञ्चयन्, **अतिथिः**–अभ्यागतः अतति सततं गच्छतीत्यतिथिः 'प्राघुर्णोऽभ्यागतोऽतिथिः' इति हैमः, अत्रत्यविशेषविचारोऽस्मदुपज्ञमयूरदूतपञ्जिकायामालोचनीयः । **त्वम्**–श्रीमान्, **अद्य**–अस्मिन् अहनि 'सद्योऽद्यपरेद्यव्यह्नि' ।७।२।९७। इति साधुः, **अस्माभिः**–एतज्जनैः, **दिष्ट्या**–भाग्येन, दिशति दिष्टा 'वृमिथिदिशिभ्यः' ( उणा० ६०१ ) इति कित् ट्यादिः आमत्ययः यथा 'दिष्ट्या पुत्रो जातः' । **दृष्टः**–प्रत्यक्षमुपगतः, इति **अस्मदीयैः**–मामकीनैः, **प्राच्यैः**–पूर्वकालीनैः, **अतुलैः**–अपूर्वैः, **पुण्यैः**–सुकृतैः, पुणति पुण्यम् 'ऋशिजनि–' ( उणा० ३६१ ) इति किद् 'यः' 'धर्मः

पुण्यं वृषः श्रेयः-सुकृते ' इति हैमः । **फलितम्**-उदयावलिकाया-मागतम्, **यत्**-यस्माद्धेतोः,**स्मर्यमाणः**-स्मरणं क्रियमाणः, **प्रियः**-स्नेही, **अपुण्यानाम्**-न विद्यते पुण्यं येषां ते तेषाम्-अधन्यानाम्, **नयनविषयम्**-लोचनगोचरम्, **न**-नैव, **उपेयात्**-प्राप्नुयात्। अर्थान्तरन्यासः ॥ १० ॥

( ११ )

साम्प्रतं सपरिवारस्येन्दोः कुशलानुयोगः-'**देहे गेह**' इति ।

**देहे गेहे कुशलमतुलं वर्तते कच्चिदिन्दो !,**
**नीरोगाङ्गी सुभग ! गृहिणी रोहिणी तेऽस्त्यभीष्टा ॥**
**अन्याः सर्वा अपि सकुशला दक्षजाः सन्ति पत्न्यः,**
**पञ्चार्चिः शं कलयति हृदा-नन्दनो नन्दनस्ते ॥ ११ ॥**

(**अन्वयः**) इन्दो ! कच्चित् ते देहे गेहे अतुलं कुशलं वर्तते ? सुभग ! (ते) अभीष्टा गृहिणी रोहिणी नीरोगाङ्गी अस्ति ? अन्याः सर्वा अपि दक्षजाः पत्न्यः सकुशलाः सन्ति ? ते हृदानन्दनः पञ्चार्चिः नन्दनः शं कलयति ? ।

(**प्रकाशः**) **इन्दो !**-हे चन्द्र ! **कच्चित्**-किम् ? 'कच्चिदिष्टपरिप्रश्ने' इति हैमः, । **ते**-तव, **देहे**-शरीरे, **गेहे**-सदने, **अतुलम्**-निरुपमम्, **कुशलम्**-क्षेमम्, **वर्तते**-अस्ति ?, **सुभग !**-हे सौभाग्यशालिन् ! सुधांशो ! ते **अभीष्टा**-प्राणप्रिया, **गृहिणी**-सधर्मिणी, **रोहिणी**-रोहन्ति कार्याण्यस्यां रोहिणी 'द्रुहृवृहि-' (उणा० १९४ ) इत्यादिना बहुवचनाद् 'इणे' 'रेवतरोहिणाद्भे' ।२।४।२६। इति 'ङीः'-ब्राह्मीनक्षत्रम्, **नीरोगाङ्गी**-

रोगरहिता, **अस्ति**–आस्ते ? **अन्याः**–इतराः, **सर्वा अपि**–सकला अपि, **दक्षजाः**–दक्षसुताः दाक्षायण्यः, **पत्न्यः**–दाराः 'दाक्षायण्यः सर्वाः शशिप्रियाः' इति हैमः 'सर्वा अश्विन्यादयः सप्तविंशतिरपि शशिप्रियाश्चन्द्रदाराः इति तद्विवृतौ, **सकुशलाः**–कुशलकलिताः, सन्ति ? अत्र हि रोहिण्यादिभिः सह चन्द्रस्य परमार्थतः स्वामिसेवकभावेऽपि पतिपत्नीभावः प्रदर्शितः स कविसमयमनुरुध्यावसेयः । ते **हृदानन्दनः**–हृदयाह्लादकः, **पञ्चार्चिः**–पञ्चार्चिषोऽस्य पाञ्चर्चिः–रोहिणीसुतः, बुध इतियावत् **नन्दनः**–तनयः, **शम्**–सुखम्, **कलयति**–अनुभवति ? 'छेकोव्यञ्जनसङ्घस्य सकृत्साम्यमनेकधे'ति लक्षणलक्षितच्छेकानुप्रासः ॥ ११ ॥

( १२ )

साधोः कस्यचनासंयमिनः कुशलविषयकः प्रश्नो ह्याचारविरुद्ध इतिच्छलेन तादृशप्रश्नस्य विरुद्धत्वमपाकरोति–यद्वाऽयमिति–

**यद्वाऽयं ते स्फुटमनुचितो वार्तवार्तानुयोग–**
**स्त्वय्यायत्तां जगति सकले जानतो मे सुखाप्तिम् ॥**
**मन्तव्योऽयं तदपि सरसः स्नेहसाराञ्चितत्वात्,**
**स्वादीयः स्यात् कदशनमपि स्नेहधारोपसिक्तम् ।१२।**

( **अन्वयः** ) **यद्वा सकले जगति त्वय्यायत्तां सुखाप्तिं जानतः मे अयं ते वार्तवार्तानुयोगः स्फुटम् अनुचितः तदपि स्नेहसाराञ्चितत्वात् अयं सरसः मन्तव्यः (यतः) स्नेहधारोपसिक्तं कदशनम् अपि स्वादीयः स्यात् ॥ १२ ॥**

(प्रकाशः) **यद्वा**–अथवा, **सकले जगति**–समस्तसंसारे विश्वस्मिन् विश्वे इति यावत्, **त्वय्यायत्ताम्**–त्वदधीनाम्, **सुखाप्तिम्**–कुशलाधिगमम्, **जानतो मे**–अवगच्छतो मम, अखण्डब्रह्माण्डे जनास्त्वदुदये चञ्चच्चन्द्रिकायां विहरन्त आनन्दमनुभवन्ति इति त्वमेव सुखप्रदो लोकानां 'न हि स्वयं दरिद्रोऽपरानीश्वरीकर्तुमीश्वरः' इति श्रीमाँस्तु सुख्येवेति तत्रकः प्रश्नावकाशः, **अयम्**–'देहे गेहे' इत्यादिना विहितः, **ते**–तुभ्यम्, **वार्तवार्तानुयोगः**–वार्तस्य वार्ता तस्य अनुयोगः, कुशलोदन्तविषयकः प्रश्नः, 'स्वास्थ्ये वार्तमनामयम्' इति हैमः 'प्रश्नः पृच्छाऽनुयोजनम् (अनुयोगः)' इत्यपि हैमः, **स्फुटम्**–प्रकटं यथास्यात्तथा, स्पष्टम् इति यावत्, **अनुचितः**–असाम्प्रतम्, **तदपि**–तथापि, **स्नेहसाराञ्चितत्वात्**–प्रकर्षप्रेमपरिकलितत्वात्, **अयम्**–पूर्वप्रदर्शितः प्रश्नः, **सरसः**–समीचीनः, **मन्तव्यः**–ज्ञातव्यः, कुशलप्रश्नो मे प्रेम्णा प्रादुरभूत् प्रेमनिबद्धं च वचो विरुद्धमप्यविरुद्धमिव भवतीति स युक्त एवेत्याशयः, यतः **स्नेहधारोपसिक्तम्**–घृतप्रवाहैरञ्चितम्, 'स्नेहः प्रेम्णि घृतादिके' इत्यनेकार्थसङ्ग्रहः। **कदशनमपि**–गर्हितमपि अन्नम्, अश्यते एतदित्यशनं भुज्यादित्वादनट् 'भक्तमन्नं..........अशनम्,' इति हैमः कुत्सितम् अशनं 'कोः कत्तत्पुरुषे' ।३।२।१३०। इति कदादेशे कदशनम्, **स्वादीयः**–स्वादुसमञ्चितम्, अतिशयेन स्वादुः स्वादीयः 'गुणाङ्गाद्वेष्ठेयसू' ।७।३।९। इतीयस्, अतिमधुरमितियावत् **स्यात्**–भवेत्। अर्थान्तरन्यासः॥ १२॥

( १३ )

दूरदूरान्मृदुपादस्य ते कथमिहागमनं सञ्जातमितीन्दुं प्रश्नयति क्काहो इति—

**क्काहो ! शीतो-पगतमतनु प्राक्तनार्धं विदेह-**
**क्षेत्रं क्कायं चरमभरत-क्षेत्रयाम्यार्धभागः ॥**
**मार्गोऽतीतः कथमयमियान् कोमलैः स्वच्छपादैः,**
**प्रौढप्रौढैः शिखरिशिखरै-र्दन्तुरीभूतदेशः ॥ १३ ॥**

( अन्वयः ) अहो ! शीतोपगतम् अतनु प्राक्तनार्धं विदेह क्षेत्रं क्क, अयं चरमभरतक्षेत्रयाम्यार्धभागः क्क, अयमियान् प्रौढ प्रौढैः शिखरिशिखरैः दन्तुरीभूतदेशः मार्गः कोमलैः स्वच्छपादैः कथम् अतीतः ॥ १३ ॥

( प्रकाशः ) अहो !–आश्चर्यम्, **शीतोपगतम्**–सीतासरिल्लसितम्, नीलवन्तपर्वतवर्तिकेसरिह्रदनिःसृता पूर्वविदेहमभिव्याप्य-स्थिता प्रारम्भे पञ्चाशद्योजनायता योजनावगाहा सागरसङ्गमसमये पञ्चशतयोजनविस्तृता दशयोजनगभीरा पथि सम्मिलद्द्वात्रिंशत्सहस्राधिकपञ्चलक्षप्रमितसरितां सलिलप्रवाहपरिपूर्णा **सीतानामनदी** ताम्–उपगतम्, **अतनु**–महत्, चतुरशीतिषट्शताधिकत्रयस्त्रिंशत्-सहस्रयोजन–चतुष्कला( ३३६८४$\frac{४}{१९}$ )विस्तृतत्वादर्धलक्षयोजन-दीर्घत्वात्सनातनसुकृतसद्भावाच्च अतनु, **प्राक्तनार्धम्**–पूर्वार्धम्, **विदेहक्षेत्रम्**–महाविदेहनामकम्, जम्बूद्वीपवर्तिमेरुशिखरिणः पूर्व-पश्चिमप्रदेशः, **क्क?**–कुत्र ?, **अयम्**–असौ, **चरमभरतक्षेत्रयाम्यार्ध-**

**भागः**–अर्धं[1] चासौ भागः याम्यस्यार्धभागः भरतश्च तत् क्षेत्रं चरमं च तत् भरतक्षेत्रं तस्य याम्यार्धभागः, अन्तिमभरतक्षेत्रदक्षिणार्धप्रदेशः, **क्व?**–कुत्र? **अयम्**–असौ' **इयान्**–एतावान् ३३१५७ १७/१९ योजनपरिमितः, **प्रौढप्रौढैः**–अत्युन्नतैः, शतशो योजनोच्छ्रितैः, **शिखरिशिखरैः**–निषध–महाहिमवन्त–लघुहिमवन्त–वैताढ्यप्रमुखपर्वत (३७)कूटैः, **दन्तुरीभूतदेशः**–उच्चावचीभूतभूमिः उन्नता दन्ता सन्त्यस्य दन्तुरः 'दन्तादुन्नतात्' ।७।२।४०। इति 'डुरः' **मार्गः**–पन्थाः, **कोमलैः**–मृदुभिः, **स्वच्छपादैः**–विमलकिरणक्रमैः, **कथम्**–केन प्रकारेण 'कथमित्थम्' ।७।२।१०३। इति प्रकारार्थे किंशब्दात् थमन्तो निपात्यते, **अतीतः**–अतिक्रान्तः ? । 'यत्रासम्भावितस्यार्थस्य सम्बन्धः क्रियते स विषमालङ्कारः' इति लक्षणलक्षितोऽत्र 'विषमः' ॥ १३ ॥

( १४ )

अतिदूरात्समागमनेन पथि श्रान्तेन त्वया साम्प्रतमिह क्षणं विश्रामो विधेलिम इत्याह **मार्गश्रान्त** इति—

**मार्गश्रान्तः क्षणमिह सुखं तिष्ठ विश्रामहेतो-**
**रुत्तुङ्गेऽस्मिन् शिखरिशिखरे दत्तपादावलम्बः ॥**
**हृद्यः पद्मा-भिधवरसरःसम्भवस्त्वां समीरः,**
**सर्पन्नुच्चैः सुखयतु सखे ! केतकीगन्धबन्धुः॥१४॥**

---

[1] समविभागेऽर्धशब्दस्य नित्यनपुंसकत्वम् अत्र समविभागोऽपेक्षित इति अर्धं चासौ भाग इत्येव विग्रहः साधीयान्, यदुक्तम्–अभिधानचिन्तामणिविवृत्तौ 'समप्रविभागे त्वर्द्धं नपुंसकम्' इति ।

**( अन्वयः ) सखे ! अस्मिन् उत्तुङ्गे शिखरिशिखरे दत्तपादावलम्बः मार्गश्रान्तः ( त्वं ) विश्रामहेतोः क्षणम् इह सुखं तिष्ठ पद्माभिधवरसरःसम्भवः केतकीगन्धबन्धुः उच्चैः सर्पन् हृद्य समीरः त्वां सुखयतु ॥ १४ ॥**

( प्रकाशः ) **सखे !**–सुहृत् !, **अस्मिन्**–पुरोवर्तिनि, **उतुङ्गे**–अत्युन्नते, **शिखरिशिखरे**–पञ्चकूटाद्रिशृङ्गे, **दत्तपादावलम्बः**–पादस्यावलम्बः दत्तः पादावलम्बो येन सः स्थापितरश्मिरूपचरणावलम्बनः, **मार्गश्रान्तः**–पथखिन्नः, संततसञ्चरणसञ्जातश्रमश्रमित इति यावत्, त्वम्, **विश्रामहेतोः**–श्रमापाकरणाय, **क्षणम्**–ईषत्कालम्, **इह**–अत्र, **सुखम्**–आनन्दं यथास्यात्तथा, **तिष्ठ**–स्थितिं विदध्याः, सन्देशश्रावणे स्थैर्यस्यावश्यकत्वाद्व्याजेन स्थितयेह्वाऽऽमन्त्रयत्, **पद्माभिधवरसरःसम्भवः**–पद्मम् अभिधा यस्य तत् वरं च तत् सरःपद्माभिधञ्च तद्वरसरः ततः सम्भवः पद्माख्यश्रेष्ठसरसीसम्भूतः, **केतकीगन्धबन्धुः**–क्रकचच्छदाख्यपुष्पपरिमलपरीतः, ‘ केतकः, क्रकचच्छदः ’ इति हैमः, सद्गन्धिसुमनःसुरभिसुहृदितियावत्, **उच्चैः सर्पन्**–उद्गच्छन्, **हृद्यः**–हृदयाह्लादप्रदः, मनोज्ञ इतियावत्, हृदयस्य प्रियं हृद्यम् ‘ हृद्यपद्य–’ ।७।१।११। इति यः ‘हृदयस्य हृल्लास–’ ।३।२।९४। इति हृदादेशः, **समीरः**–पवनः, **त्वाम्**–श्रीमन्तम्, **सुखयतु**–आह्लादयतु, सुखं करोति सुखयति ‘णिज्बहुलं नाम्नः कृगादिषु’ ।३।४।४२। इति ‘णिच्’ । छेकानुप्रासः ॥ १४ ॥

( १५ )

अञ्जलिकर्मणा रञ्जयितुं रजनीपतेर्विश्वाभिवन्द्यत्वं व्यनक्ति नत्वेति–

**नत्वा सीमन्धरजिनपतिं प्राप्तपुण्यप्रकर्षो,**
**भूयो नन्तुं त्रिभुवनगुरुं बाहुदेवं सहर्षः ॥**
**मार्गे तीर्थ–प्रणतिविगलत्–पापपङ्कः स्वमौला–**
**वर्हच्चैत्या–श्रित इति जगद्वन्द्य ! वन्दामहे त्वाम् ॥१५॥**

( अन्वयः ) सीमन्धरजिनपतिं नत्वा प्राप्तपुण्यप्रकर्षः भूयः त्रिभुवनगुरुं बाहुदेवं नन्तुं सहर्षः *मार्गे तीर्थप्रणतिविगलत्पाप*-पङ्कः स्वमौलौ *अर्हच्चैत्याश्रितः ( त्वम् असि )* इति जगद्वन्द्य ! त्वां वन्दामहे ।

( प्रकाशः ) **सीमन्धरजिनपतिम्**–तदभिधानतीर्थाधिपतिम्, पूर्वमहाविदेहान्तर्गताष्टमपुष्कलावतीनामविजये विहरन्तं सत्यकी-श्रेयांससञ्जातं रुक्मिणीरमणं वृषाङ्कितं धनुष्पञ्चशतोच्छ्रितस्वर्ण-कायं चतुरशीतिलक्षपूर्वायुष्कं श्रीसीमन्धरजिनमितियावत् सीमानं मर्यादां धारयतीति **सीमन्धरः** ‘ धारेर्धर्च ’ ।५।१।११३। इति खः धारेर्धरादेशश्च ‘ खित्यनव्ययाऽ– ’ ।३।२।१११। इति मोऽन्तः, **नत्वा**–नमस्कृत्य, **प्राप्तपुण्यप्रकर्षः**–पुण्यस्य प्रकर्षः प्राप्तः पुण्यप्रकर्षो येन सः, आसादितसुकृतोत्कर्षः, **भूयः**–पुनरपि, **त्रिभुवनगुरुम्**–त्रयाणां भुवनानां समाहारस्त्रिभुवनं तस्य गुरुम्, समाहारे ‘ द्विगोः समाहाराद् ’ । २ । ४ । २२ । इति अकारा-न्तोत्तरपदस्य द्विगोः स्त्रियामिष्टत्वेन ‘ ङी ’ प्राप्तिसत्त्वेऽपि ‘ पात्रा-दिवर्जितादन्तो–त्तरपदः समाहारे । द्विगुरन्नाबन्तान्तो वाऽन्यस्तु

सर्वो नपुंसकः' इति हेमलिङ्गानुशासनात् पात्रादिगणान्तर्गतत्वेन त्रिभुवनशब्दस्य नपुंसकत्वान्न ङीत्वम्, जगत्त्रयपूज्यम्। **बाहुदेवम्**–तदाख्यजिनेश्वरम्, महाविदेहान्तर्गतवत्सविजय–सुसीमापुरीं पुनानं विजयासुग्रीवसम्भूतं मोहनामोहनं मृगाङ्कं श्रीबाहुदेवनामानमर्हन्तमितियावत्, **नन्तुम्**–अभिवादयितुम्, **सहर्षः**–हर्षेण सहितः सहर्षः –'सहस्य सोऽन्यार्थे'। ३। २। १४३। इति सहस्य सादेशः, उल्लासकलितः, उत्सुक इतिभावः, श्रीसीमन्धरस्वामिवन्दनान्तरमेव श्रीबाहुदेवजिननमनाय समुत्सुक इत्याशयः **मार्गे**–अध्वनि, **तीर्थप्रणतिविगलत्पापपङ्कः**–तीर्थानां प्रणत्या विगलन् पापपङ्को यस्य सः, पुण्यभूमिप्रणामप्रणश्यत्कलुषकर्दमः, **स्वमौलौ**–निजोत्तमाङ्गे, मूयते बध्यते मुकुटादिकमत्रेति मौलिः, पुंस्त्रीलिङ्गः 'धूमूभ्यां' (उणा० ७०१) इतिलिण्, 'उत्तमाङ्गं शिरो मूर्धा मौलिः' इति हैमः, **अर्हच्चैत्याश्रितः**–जिनबिम्बकलितः, चन्द्रमुकुटे जिनबिम्बचिह्नमिति मौलावर्हच्चैत्याश्रितत्वं संभाव्यते आधेयधर्म आधारे आरोप्यते इति ॥ 'चैत्यं जिनौकस्तद्बिम्ब'मिति वचनाच्चैत्यशब्दस्य जिनबिम्बवाचकत्वमपि, त्वमसीतिशेषः **इति**–पुरोदीरितकारणैः, **जगद्वन्द्य–!** हे विश्वाभिवन्दनीय!, **त्वाम्**-भवन्तम्, **वन्दामहे**–वयं नमामः,। काव्यलिङ्गालङ्कारः ॥१५॥

( १६ )

त्वत्सङ्गमेन मे सम्मदः सञ्जात इत्यभिव्यनक्ति–**खिन्ना**मिति–

**खिन्नां तीव्रा–तपपरिचयात् तोयदस्तोयवृष्ट्या,**
**सिञ्चन् यद्वत् सुखयति कृषिं शोषकालोपपन्नः ॥**

**प्रीतिं तद्वत् प्रियसख ! मम प्रापिता चित्तवृत्ति-**
**र्वार्तोत्पत्तौ रहसि भवता गच्छता बन्धुना द्राक् ॥१६॥**

( अन्वयः ) यद्वत् शोषकालोपपन्नः तोयदः तोयवृष्ट्या तीव्रातपपरिचयात् खिन्नां कृषिं सिञ्चन् सुखयति तद्वत् प्रियसख ! रहसि वार्तोत्पत्तौ मम चित्तवृत्तिः गच्छता बन्धुना भवता द्राक् प्रीतिं प्रापिता ॥ १५ ॥

( प्रकाशः ) **यद्वत्**–यथा, **शोषकालोपपन्नः**–ग्रीष्मसमयसम्भूतः, **तोयदः**–पयोधरः, **तोयवृष्ट्या**–वारिवर्षणेन, **तीव्रातपपरिचयात्**–निशितभानवीयभानुसम्पर्कतः, **खिन्नाम्**–परिभूताम्, खिद्+क्तः–' रदादमूर्च्छामदः–' । ४ । २ । ६९ । इति खिन्नाम्। **कृषिम्**–अनृतम्, 'अनृतं कृषिः' इति हैमः, **सिञ्चन्**–प्लावयन्, **सुखयति**–सुखं ददाति, **तद्वत्**–तथा, **प्रियसख !**–हे स्नेहिन् ! प्रियश्चासौ सखा प्रियसखः 'राजन्सखेः' ।७।३।१०६। इत्यट्, **रहसि**–एकान्ते, **वार्तोत्पत्तौ**–अभिवन्दनोदन्ताविर्भावे, **मम**–मदीया, खिन्नामित्यस्य विभक्तिव्यत्ययेन चित्तवृत्तावप्यन्वयः तथा च खिन्ना चित्तवृत्तिः–अभिभूतमनःप्रवृत्तिः, **गच्छता**–अतता, **बन्धुना**–सुहृदा, **भवता**–श्रीमता, **द्राक्**–शीघ्रम्, **प्रीतिम्**–प्रमोदम्, **प्रापिता**–गमिता, पूर्णोपमाङ्कारः ॥ १६ ॥

(१७)

सति स्वस्थे वार्तालापः सुखावह इति स्वास्थ्यं लभस्वेत्याह–
**शान्तिमिति**—

**शान्ति नीते श्रम इति ततश्चेतसि स्वास्थ्यमाप्ते,**
**दत्त्वा कर्णा–ववहितमनाः श्रोष्यसि प्रार्थनां मे ॥**
**न श्रान्तानां सुखयति कथा स्निग्धवर्गोदिताऽपि,**
**स्वस्थे चित्ते प्रणयमधुरा बुद्धयो ह्युद्भवन्ति ॥ १७ ॥**

(अन्वयः) इति श्रमे शान्ति नीते ततः चेतसि स्वास्थ्यम् आप्ते अवहितमना कर्णौ दत्त्वा मे प्रार्थनां श्रोष्यसि, श्रान्तानां स्निग्धवर्गोदिता अपि कथा न सुखयति हि चित्ते स्वस्थे प्रणयमधुरा बुद्धयः उद्भवन्ति ॥ १७ ॥

(प्रकाशः) इति–चतुर्दशसूक्तोक्तप्रकारेण, श्रमे–परिश्रमे, शान्ति नीते–सान्त्वनामाप्ते, अपगत इति भावः, ततः–तदनन्तरम्, चेतसि–मानसे, स्वास्थ्यमाप्ते–कुशलमधिगते–स्वस्थीभूते इति यावत्, अवहितमनाः–अवहितं मनो यस्यासौ, अव+धा+क्तः 'धागः' ।४।४।१५। इति ह्यादेशे अवहितम्, एकाग्रहृदयः, कर्णौ दत्त्वा–श्रवणौ प्रदाय सावधानीभूयेतियावत्, मे–मम, प्रार्थनाम्–निवेदनम्, श्रोष्यसि–अवकर्णयिष्यसि, श्रान्तानाम्–पथश्रमजनितखेदानाम्, स्निग्धवर्गोदिताऽपि–प्रियजनताकथिता अपि, कथा–वार्ता, न–नहि, सुखयति–प्रीतिं जनयति, हि–यतः, चित्ते स्वस्थे–चेतसि कुशलकलिते सति, प्रसन्ने स्वान्ते सतीतियावत्, प्रणयमधुरा–स्नेहसुन्दरा उल्लसद्रसतरङ्गतरङ्गिता इति यावत्, बुद्धयः–धियः, उद्भवन्ति–प्रादुर्भवन्ति । अर्थान्तरन्यासः ॥ १७ ॥

( १८ )

अथेन्दोः सावधानं करोति श्रुत्वेति—

**श्रुत्वा याच्ञां मम हिमरुचे! न प्रमादो विधेयो,**
**नो वावज्ञाऽभ्यधिकविभवो-न्मत्तचित्तेन कार्या ॥**
**प्रेमालापै-श्चतुरवनिता-निर्मितैर्विस्मृतिर्न,**
**प्राप्या प्रायः प्रथितयशसः प्रार्थनाभङ्गभीताः ॥१८॥**

( अन्वयः ) हिमरुचे! मम याच्ञां श्रुत्वा प्रमादो न विधेयः वा अभ्यधिकविभवोन्मत्तचित्तेन अवज्ञा नो कार्या, चतुरवनितानिर्मितैः प्रेमालापैः विस्मृतिः न प्राप्या ( यतः ) प्रथितयशसः प्रायः प्रार्थनाभङ्गभीताः।

( **प्रकाशः** ) **हिमरुचे!**–हे शीतकिरण! **मम**–मदीयाम्, **याच्ञाम्**–प्रार्थनाम्, याच् धातोर्नङ्प्रत्यये नङ्प्रत्ययान्तस्य 'पुंलिङ्ग कटण...। ननङौ...' इति हैमलिङ्गानुशासनेन पुंस्त्वेऽपि याच्ञेत्यत्र स्त्रीत्वं 'मृगयेच्छायाच्ञा' ।५।३।१०१। इति निपातनादवसेयम्। **श्रुत्वा**–निशम्य, **प्रमादः**–अनवधानता, 'प्रमादोऽनवधानता' इति हैमः। **न**–नहि, **विधेयः**–कर्तव्यः। **वा**–अथवा, **अभ्यधिकविभवोन्मत्तचित्तेन**–अभ्यधिकश्चासौ विभवस्तेनोन्मत्तं चित्तं यस्य स तेन चञ्चचन्द्रिकामृतप्रभृतिप्रचुरैश्वर्यगर्वगर्वितमानसेन, **नो**–नैव, **अवज्ञा**–अवहेलना, **कार्या**–विधातव्या, **चतुरवनितानिर्मितैः**–दक्षदयिताप्रयुक्तैः, **प्रेमालापैः**–प्रणयपूरितवचोभिः, पथि त्वद्दर्शनसञ्जाताह्लादाह्लादितरमणीप्रयुक्तप्रियचाटूक्तिभिरिति यावत्, **विस्मृतिः**–विस्मरणम्, **न प्राप्या**–नावलम्बनीया, यतः **प्रथितयशसः**–विश्रुतदिगन्तसमाज्ञाः, अश्नुते व्याप्नोति दिशः यशः 'अशेर्यश्चादिः' ( उणा० ९५८ ) इत्यसु

आदेश्च यकारादेशः ' श्लोकः कीर्तिर्यशोऽभिख्या समाज्ञा ' इति हैमः, **प्रायः**–बाहुल्येन, **प्रार्थनाभङ्गभीताः**–याचनास्खलनभीरवः, भवन्तीतिशेषः । अर्थान्तरन्यासः ॥ १८ ॥

( १९ )

अथ पीयूषरश्मेः परिवारस्य परोपकारपरायणतां प्रदर्शयन् प्रथमं तावत् तत्पितुः पयोधेः पयोधरद्वारा विश्वाय पयोदानं वर्णयति भ्रातस्तातेति–

**भ्रातस्तात–स्तव गुणनिधिः पश्य रत्नाकरोऽसौ,**
**वर्षे वर्षे नवजलधर–प्रापितैरम्बुपूरैः ॥**
**विश्वं विश्वं तरुणतपनो–द्दामतापाभितप्तं,**
**सेचं सेचं सुखयति सदाऽभीष्टविश्वोपकारः ॥१९॥**

(अन्वयः) भ्रातः! पश्य तव तातः अभीष्टविश्वोपकारः गुणनिधिः असौ रत्नाकरः नवजलप्रापितैः अम्बुपूरैः वर्षे वर्षे तरुणतपनोद्दामतापाभितप्तं विश्वं विश्वं सेचं सेचं सदा सुखयति ॥ १९ ॥

**(प्रकाशः) भ्रातः !**–बन्धो !, **पश्य**–अवलोकय, **तव तातः**-तावकीनो जनकः, **अभीष्टविश्वोपकारः**–विश्वस्य उपकारः, अभीष्टः विश्वोपकारः यस्य सः, समीप्सितजगदुपकृतिः, **गुणनिधिः**–सद्गुणसेवधिः, **असौ**–विश्वविख्यातः, **रत्नाकरः**–वारांनिधिः, **नवजलधरप्रापितैः**–धरतीतिधरः जलानां धरः नवश्चासौ जलधरस्तेन प्रापितास्तैः *प्रावृट्पयोदनीतैः*, **अम्बुपूरैः**–*अम्बुवृद्धिभिः*, ' **अम्बुवृद्धौ** पूरः प्लवोऽपि च ' इति हैमबलेन पूरशब्दादेव अम्बुवृद्धिरूपार्थ–

प्रतीतौ व्यर्थमम्बुविशेषणमिति चेत् सत्यम्, परं 'विशिष्टवाचकपदानां सति पृथग्विशेषणवाचकपदसमवधाने विशेष्यमात्रपरत्वम्' इतिनियमेन पूरशब्दस्य वृद्धिमात्रबोधकत्वेन विशेषणसङ्गतेः, अतएव 'सकीचकैर्मारुतपूर्णरन्ध्रैः' इति कविकालिदासकवनमपि सङ्गच्छते। **वर्षेवर्षे**–प्रतिवर्षम्, 'वीप्सायाम्' ।७।४।८०। इतिद्विः, **तरुणतपनोद्दामतापाभितप्तम्**–तरुणश्चासौ तपनः, उद्दामा चासौ तापः तरुणतपनस्योद्दामतापस्तेनाभितप्तम्–चण्डार्कप्रचण्डप्रतापपीडितम्, **विश्वं विश्वम्**–समस्तसंसारम्, **सेचं सेचम्**–सिक्त्वा सिक्त्वा 'ख्णं चाभीक्ष्ण्ये' ।५।४।४८। इति पौनःपुन्ये गम्ये ख्णम् 'भृशाभीक्ष्ण्या–' ।७।४।७३। इति द्विरुक्तिः अत्र बहुत्र सेकं सेकमितिपाठः समुपलभ्यते परं ख्णमित्यस्य घित्वाभावात्सिच्धातोश्चस्य कत्वाभावेन स त्यक्तः, **सदा**–सततम्, **सुखयति**–सान्त्वयति, नन्वत्र 'पश्ये'त्यस्य कर्मत्वेन 'रत्नाकरोऽसा'वित्यत्र द्वितीया कथं नेति चेत्सत्यम्, परं 'रत्नाकरोऽसौ....सुखयती'ति वाक्यस्य नामत्वाभावेन द्वितीयाया अप्राप्तेः, अत एव 'पश्य मृगो धावती' त्यादि बहुशः उपलभ्यते प्राचां प्रयोगः ॥ १९ ॥

( २० )

देवराजादिदेवेभ्यः पीयूषाश्वादिप्रदानेन पारावारस्य वदान्यतां वर्णयति–**किंनु** इति–

**किं नु ब्रूम–स्तव जनयितु–स्तस्य दानप्रियत्वं,**
**यो देवानां सततममृतैः कल्पयामास वृत्तिम् ॥**

**अश्वं चोच्चैः-श्रवसमसमं नागमैरावतं च,**
**दत्त्वेन्द्रस्य त्रिभुवनपतेः पूरयामास वाञ्छाम् ॥२०॥**

(अन्वयः) नु तव जनयितुः तस्य दानप्रियत्वं किं ब्रूमः यः देवानाम् अमृतैः सततं वृत्तिं कल्पयामास च असमम् उच्चैः-श्रवसम् अश्वम् ऐरावतं च नागं दत्त्वा त्रिभुवनपतेः वाञ्छां पूरयामास ।

(**प्रकाशः**) **नु**-वितर्के, **तव जनयितुः**-पितुस्ते पाथोधेः, **तस्य**-रत्नाकरस्य, **दानप्रियत्वम्**-वदान्यत्वम्, **किं ब्रूमः**-किंस्वित् कथयामः, **यः**-तत्पदोपस्थाप्याकाङ्क्षायामाह यः इति योऽब्धिः, **देवानाम्**-सुधाशनानां सुराणाम्, **अमृतैः**-पीयूषैः, **सततम्**-अनारतम्, **वृत्तिम्**-जीविकाम्, **कल्पयामास**-निर्वाहयाञ्चकार, **च**-पुनः, **असमम्**-अनुपमम्, **उच्चैःश्रवसम्**-वृषणश्वम् 'उच्चैः-श्रवा हयः' इति हैमः 'वृषणश्वो हरेर्हये' इति शेषः, **अश्वम्**-तुरगम्, **ऐरावतञ्च**-अभ्रमातङ्गञ्च, **नागम्**-द्विरदम्, 'स्तम्बेरम-द्विरद-सिन्धुरनागदन्तिनो' इति हैमः । **दत्त्वा**-समर्प्य, वितीर्येतियावत्, **त्रिभुवनपतेः**-स्वर्गपतेः, तृतीयं भुवनं त्रिभुवनम्, 'भूर्भुवः स्वः' इतिश्रुतेः अत्र मयूरव्यंसकादित्वात् समासे पूरणप्रत्ययलोपः, स्वर्गस्तस्य पत्युः, ननु पत्युरितिवत् त्रिभुवनपतेरित्यत्रापि 'खितिखितीय उर्' । १ । ४ । ३६ । इत्युरादेशः कुतो नेति चेन्न दृष्टान्ते 'ङित्यदिति' ।१।४।२३। इति विहितस्यैत्वस्य 'ननाङिदेत्' ।१।४।२७। इति निषेधेऽपि दार्ष्टान्तिके केवलविरहेण निषेधाप्राप्त्या एत्वप्रवृत्तेः सुवचत्वेन यत्वाभावादुरभावात् । **इन्द्रस्य**-देवराजस्य, **वाञ्छाम्**-अभिलाषम्, **पूरयामास**-अपीपुरत् ॥ २० ॥

( २१ )

अप्ययपांनिधेर्विष्णवे वितरणं वर्णयति-**कन्यामिति**—

**कन्यां दत्त्वा जगति विदितां यौतके कौतुकी च,**
**योऽदान्मोदा-द्युगपदमलं कौस्तुभं पाञ्चजन्यम् ॥**
**एवं विश्वम्भरमतितमां प्रीणयामास लोभाद्,**
**यन्नाद्यापि श्वशुरवसतिं संत्यजत्युत्तमोऽपि ॥ २१ ॥**

(अन्वयः) यौतके कौतुकी यः मोदाद् युगपत् जगति विदितां कन्यां दत्त्वा अमलं कौस्तुभं पाञ्चजन्यं च अदात् एवं विश्वम्भरम् अतितमां प्रीणयामास यत् लोभाद् अद्यापि उत्तमोऽपि श्वशुरवसतिं न सन्त्यजति ॥ २१ ॥

(**प्रकाशः**) **यौतके**—दम्पत्योर्देये, दाये तथा च हैमः 'यौतकं युतयोर्देयं सुदायो हरणञ्च तत्' इति, 'यौतकादिधनं दायो दयो दानमुदाहृतम्' इति शाश्वतः, **कौतुकी**-कुतूहलवान्, अत्युदार इति यावत्, **यः**-समुद्रः, **मोदात्**-आनन्दात्, **युगपत्**-एकदैव, **जगति विदिताम्**-विश्वविश्रुताम्, **कन्याम्**-कुमारीम्, कनति दीप्यते कन्या 'स्थाछा-' (उणा० ३५७) इति यः, 'कन्या कनी कुमारी च' इति हैमः। लक्ष्मीमितियावत्, **दत्त्वा**-उद्वाह्य, **अमलम्**-स्वच्छम्, **कौस्तुभम्**-कुं भुवं स्तोभते व्याप्नोति कुस्तुभोऽब्धिस्तस्यायं कौस्तुभस्तम् 'कौस्तुभस्तु महातेजाः कोटिसूर्यसमप्रभः' इत्यभिवर्णितं मणिविशेषम्, अयं हि विराजते विष्णोर्वक्षःस्थले यदुक्तं हैमे-'भुजमध्ये तु कौस्तुभः' इति।

**पाञ्चजन्यञ्च**–शङ्खविशेषमपि, पञ्चजने पाताले भवः पाञ्चजन्यः 'गम्भीर–पञ्चजनबहिर्देवात्' ।६।३।१३५। इति ञ्यः, 'पाञ्चजन्यं हृषीकेशः' इति गीता, **अदात्**–समर्पयत्, **एवम्**–अमुना प्रकारेण, विशिष्टवस्तुवितरणद्वारेतियावत्, 'एवं वादिनि देवर्षौ' इति कुमारः । **विश्वम्भरम्**–श्रीधरम्, विश्वं बिभर्ति–विश्वम्भरस्तम् 'भृवृजि–' ।५।१।११२। इति खः, 'विश्वम्भरः श्रीधरविश्वरूपौ' इति हैमः । **अतितमाम्**–अत्यन्तम्, अतिशब्दात् 'प्रकृष्टे तमप्' ।७।३।५। इति तमप् 'किन्त्याद्येऽव्यया–' ।७।३।८। इति आम्–अतितमाम्, **प्रीणयामास**–सन्तोषयामास, **यत्**–यतः, **लोभात्**–भूयोभूयो निनीषया, **अद्यापि**–साम्प्रतमपि, **उत्तमोऽपि**–महानपि, **श्वशुरवसतिम्**–पत्नीपितृनिवासम्, सुशोभनमश्नुते अश्नाति वा श्वशुरः 'श्वशुरकुकुन्दर–' (उणा० ४२६) इत्युरे निपात्यते, **न सन्त्यजति**–नैव जहाति, भावार्थस्त्वयम्–हे चन्द्र ! बहुदिनं यावदेकत्र स्थाने स्थितेऽतिपरिचयाज्जनानां माननीयताऽपगच्छति अतः कोविदैर्बहुदिनमेकत्र न स्थेयम् 'सन्तत–गमनादनादरो भवति' इति उक्तिरपि, तत्रापि विशेषेण श्वशुरालये यदुक्तम्–'श्वशुरगृहनिवासः स्वर्गतुल्यो नराणां, यदि भवति विवेकी पञ्च वा षड् दिनानि । दधिघृतमधुलोभान्मासमेकं वसेच्चेत्, स भवति खरतुल्यो मानवो मानहीनः ॥' परं तव तातपादेन समुद्रेण तथा निजजामातुः सन्मानमकारि येन विवेक्युत्तमोऽपि सन् स तत्रैव चिरवासं वसति पूर्वोक्तकथनञ्च विपर्यास्ते चरितार्थयति च 'असारे खलु संसारे, सारं श्वशुरमन्दिरम् । महोदधौ हरिः शेते, हरः शेते हिमालये' इति ॥ २१ ॥

( २२ )

अथ चन्द्रभ्रातरं कल्पतरुं वर्णयति–जीयासुरिति ।

**जीयासुस्ते जगति विदिता भ्रातरः पञ्च चञ्चन्–**
**माहात्म्यास्ते वितरणभटाः पारिजातद्रुमाद्याः ॥**
**द्राक्संकल्पो–पनतसकला–भीप्सिता अप्यभीष्टं,**
**याचन्ते यान् विनयविनता नाकिनो वासवाद्याः।२२।**

( अन्वयः ) ते जगति विदिताः चञ्चन्माहात्म्याः वितरणभटाः पारिजातद्रुमाद्याः ते पञ्च भ्रातरः जीयासुः, यान् द्राक् संकल्पोपनतसकलाभीप्सिताः अपि विनयविनताः वासवाद्याः नाकिनः अभीष्टं याचन्ते ॥ २२ ॥

( प्रकाशः ) ते–अग्रे वर्णनीयाः, **जगति विदिताः**–भुवनप्रसिद्धाः, **चञ्चन्माहात्म्याः**–विलसत्प्रभावाः, **वितरणभटाः**–दानशौण्डीराः, वदान्या इतियावत्, **पारिजातद्रुमाद्याः**–तत्तदभिधेयविटपिविशेषाः ते च यथा–'वृक्षाः [1]कल्पः पारि[2]जातो, म[3]न्दारो हरि[4]चन्दनः । स[5]न्तानश्च' इति हैमः, पारिणः पारवतोऽब्धेर्जातः पारिजात इति, **ते पञ्चभ्रातरः**–त्वदीयपञ्चसहोदराः, पारिजातस्य समुद्रसुतत्वेन सहजत एवेन्दोः सहजत्वमायातम्, एवञ्च पारिजातस्य पञ्चभ्रातृतया चन्द्रमसोऽपि ते पञ्चभ्रातर इतिभावः । **जीयासुः**–जयन्तुतराम्, **यान्**–ते के इत्याकाङ्क्षापूरकान् यान् कल्पतरून्, **द्राक्संकल्पोपनतसकलाभीप्सिताः अपि**–द्राक् संकल्पेन उपनतं सकलम् अभीप्सितं येषां ते, तत्क्षणमेव समीहामात्रसमाप्तसमस्तसमीहिता अपि, **विनयविनताः**–विनयविनम्राः, **वासवाद्याः**–इन्द्र-

प्रमुखाः, वसति स्वर्गे वासवः ‘मणिवसेर्णित्’ (उणा० ५१६) इत्यवः, वसुरेव वा प्रज्ञाद्यण्, वस्वपत्यं वा, ‘इन्द्रो हरिः…….. पुरुहूतवासवौ’ इति हैमः। **नाकिनः**–स्वर्गवासिनः देवता इति यावत्, **अभीष्टम्**–आकाङ्क्षितम्, अभिलषितमितियावत्, **याचन्ते**–प्रार्थयन्ते, याच्धातोः ‘नीहृवहिकृषो ण्यन्ता, दुहिब्रूप्रच्छिभिक्षिचिरुधिशास्त्वर्थाः। पचियाचिदण्डिकृग्रह–मथिजिप्रमुखा द्विकर्माणः’ इति द्विकर्मकतया यच्छब्दान्मुख्ये कर्मणि अभीष्टशब्दाच्च गौणे कर्मणि द्वितीया सूपपन्ना ॥ २२ ॥

(२३)

अथेन्दुभगिनीप्रभावं प्रदर्शयति **मूर्खमिति**—

**मूर्खं प्राज्ञी–यति च कुतनुं कामरूपीयति द्राक्,**
**दीनं शूरी–यति च कुटिलं प्राञ्जलीयत्यवश्यम्।**
**क्रूरं शान्ती–यति गतकलं सत्कलीयत्यजस्रं,**
**लोकं सोऽयं जयति निखिल–स्त्वद्भगिन्याः प्रभावः॥**

(अन्वयः) (यः) मूर्खं लोकं प्राज्ञीयति (लोकमित्यस्य सर्वत्र द्वितीयान्तेनान्वयः कर्तव्यः) कुतनुं च द्राक् कामरूपीयति दीनं शूरीयति कुटिलं च अवश्यं प्राञ्जलीयति, क्रूरं शान्तीयति गतकलम् अजस्रं सत्कलीयति सोऽयं निखिलः त्वद्भगिन्याः प्रभावः जयति ॥ २३ ॥

(प्रकाशः) (यः प्रभावः) **मूर्खं लोकम्**–अज्ञानिनं जनम्, पामरमितियावत्, **प्राज्ञीयति**–प्राज्ञमिवाचरति,-मूर्खं प्राज्ञत्वेनोपचरतीत्यर्थः अन्तर्भावितण्यर्थत्वे तूपचारयतीत्यर्थोऽवसेयः। तथा

च श्रियः प्रभावात् मूर्खमपि मनुष्यं जनः कोविदं मनुते इति फलितम्। अस्यां सूक्तावग्रेऽप्येवमेवावसेयम्। प्राज्ञशब्दाद् 'आधाराच्चोपमानादाचारे' ।३।४।२४। इतिक्यन् 'क्यनि' ।४।३।११२। इत्यस्य ईत्वम्–प्राज्ञीयति। **कुतनुं च**–कुत्सितकायं च, लावण्यरहितशरीरमपीतियावत्। **द्राक्**–शीघ्रम्, **कामरूपीयति**–कन्दर्पसौन्दर्येणोपचरति, **दीनम्**–रङ्कम्, प्रतापहीनमितियावत्, **शूरीयति**–वीरतया व्यवहरति, **कुटिलं च**–वक्रम् अविनीतमपि, **अवश्यम्**–निश्चितम्, यद्वा वशे तिष्ठतीति वश्यः न वश्यः अवश्यस्तम्, स्वैरिणमिति कुटिलस्य विशेषणतयाऽन्वेयम्, **प्राञ्जलीयति**–सरलतयोपचरति, ऋजुस्तु प्राञ्जलोऽञ्जसः' इति हैमः, प्राञ्जलयति अञ्जलिं प्रबध्नाति प्राञ्जलः। **क्रूरम्**–अशान्तम्, क्रोधितमित्यर्थः, **शान्तीयति**–शान्तमिवाचरति, **गतकलम्**–कलाविहीनम्, **अजस्रम्**–अनवरतम्, न जस्यतीत्येवं शीलम् अजस्रम् 'स्म्यजस–' ।५।२।७९। इति रः, 'नित्यानवरताजस्रा–' इति हैमः। **सत्कलीयति**–सत्कलमिवाचरति, कुशलकलाकलितत्वेनोपचरतीतियावत्, **सोऽयम्**–कथितोऽसौ प्रभावः, **निखिलः**–समस्तः, **त्वद्भगिन्याः**–श्रीमत्सोदरायाः, लक्ष्म्या इत्यर्थः **प्रभावः**–माहात्म्यम्, **जयति**–विजयतेतराम्। उपमा ॥ २३ ॥

( २४ )

अथेन्दुप्रियां यामिनीं वर्णयति या ते इति—

**या ते श्यामा सुभग ! दयिता वर्धयत्युग्रलक्ष्मीं,**
**पङ्कं पर्णं तुलयसि यया विप्रयुक्तस्त्वमिन्दो ! ॥**

**साऽपि श्रान्तं भुवनमखिलं स्वस्वकर्मश्रमेण,**
**निद्रादानात् सुखयति सदाऽ-भीष्टविश्वोपकारा ।२४।**

( अन्वयः ) सुभग ! या ते दयिता श्यामा उग्रलक्ष्मीं वर्धयति, इन्दो ! यया विप्रयुक्तः त्वं पक्वं पर्णं तुलयसि, सा अपि सदा अभीष्टविश्वोपकारा स्वस्वकर्मश्रमेण श्रान्तम् अखिलं भुवनं निद्रादानात् सुखयति ॥ २४ ॥

**( प्रकाशः ) सुभग !**–हे ऐश्वर्यशालिन् ! **या**–या यामिनी, **ते**–तव, **दयिता**–प्रेयसी 'प्रेयसी दयिता कान्ते' ति हैमः । **श्यामा**–रजनी 'रजनी वसतिः श्यामा....दोषेन्दुकान्ते'ति हैमः । अत्र श्यामापदप्रयोगेण 'शीतकाले भवेदुष्णा, ग्रीष्मे च सुखशीतला । तप्तकाञ्चनवर्णाभा, सा स्त्री श्यामेति कीर्तिते' त्युक्तलक्षणलक्षितललनाविशेषो व्यज्यते । **उग्रलक्ष्मीम्**–प्रकृष्टशोभाम्, ते इत्यस्येहाप्यन्वयस्तथा च तव पूर्णप्रभामितिफलितम्, **वर्धयति**–एधयति, सत्यां रजन्यामेव रजनीनाथस्य तव प्रभा प्रसरतीति यावत् । **इन्दो !**–हे शशिन् ! **यया**–श्यामया, **विप्रयुक्तः**–विरहितः, **त्वम्**–निशापतिः, **पक्वं पर्णम्**–परिणतपत्रम्, पाण्डुरदलमितियावत्, पच्यते स्म पच् + क्तः 'क्षैशुषिपचो मकवम्'। ४।२।७८। इति तस्य वकारादेशे पक्वम् । 'पक्वे परिणतम्' इति हैमः । **तुलयसि**–सादृश्यमातनोषि, रजनीरमणीविरही चन्द्रः दिवसारण्ये पाण्डुरतामासाद्य परिणतपत्रेण सादृश्यमनुभवतीतिभावः, यदुक्तं 'यद्वासरे भवति पाण्डुपलाशकल्पम्' इति । **साऽपि**–पूर्वोपवर्णितश्यामाऽपि, **सदा**–अनिशम्, **अभीष्टविश्वोपकारा**–ईप्सितजगदुपकृतिः, **स्वस्वकर्मश्रमेण**–निजनिजकार्यजनितक्लेशेन,

**श्रान्तम्**–अशान्तम्, खिन्नमित्यर्थः, **अखिलं भुवनम्**–समस्तसंसारम्, **निद्रादानात्**–शयनसम्प्रदानात्, 'यदा तु मनसि क्लान्ते, कर्मात्मानः क्लमान्विताः। विषयेभ्यो निवर्तन्ते, तदा स्वपिति मानवः।' इत्युक्तहेतुके शयने। नियतं द्रान्तीन्द्रियाण्यस्यां निद्रा 'निद्रा प्रमीला शयनम्' इति हैमः। **सुखयति**–विश्रामयति आदिवसं व्यापारं विधाय परिश्रान्तः संसारस्त्रियामायामागतायां नन्दीमुखीमागृह्यानुभवति सुखमितिभावः ॥२४॥

( २५ )

अथेन्दुमेवाभिष्टौति पीयूषार्द्रैरिति—

**पीयूषार्द्रै-स्त्वमपि किरणै-र्जङ्गमस्थावराख्यं,**
**भूतग्रामं सुखयसि सुतं संस्पृशन् द्राक् पितेव ॥**
**क्रूरैः शूर-प्रकटितकरै-र्निर्भरं क्लिष्टलोकां,**
**विष्वग्निर्वा-पयसि वसुधां सत्यमेवासि राजा॥२५॥**

( अन्वयः ) त्वमपि पीयूषार्द्रैः किरणैः जङ्गमस्थावराख्यं भूतग्रामं पिता सुतमिव संस्पृशन् द्राक् सुखयसि, क्रूरैः शूरप्रकटितकरैः क्लिष्टलोकां वसुधां निर्भरं विष्वग् निर्वापयसि (इति) सत्यमेव राजा असि ॥२५॥

( **प्रकाशः** ) **त्वमपि**–श्रीमानपि, **पीयूषार्द्रैः**–सुधास्तिमितैः, अर्दति आर्द्रः 'चिजि–' ( उणा० ३९२ ) इतिरः दीर्घत्वञ्च 'स्तिमितक्लिन्नसार्द्रा–द्रोन्नाः' इति हैमः। **किरणैः**–करैः, **जङ्गमस्थावराख्यम्**–चराचररूपम्, गच्छतीति जङ्गमः 'गमेर्जम् च वा' ( उणा० १३ ) इति अप्रत्यये द्वित्वे पूर्वस्य च जमादेशे

सिद्धम् । ‘ जङ्गमं तु त्रसं चरम् ’ इति हैमः । तिष्ठतीत्येवं शीलं स्थावरं पृथिव्यादि ‘ स्थेशभास–’ ।५।२।८१। इति वरः, **भूतग्रामम्**–प्राणिसमूहम्, **पिता**–जनकः, **सुतमिव**–पुत्रं यथा, **संस्पृशन्**–स्पर्शं कुर्वाणः, **द्राक्**–शीघ्रम्, **सुखयसि**–आनन्दयसि, यथा तनयं तातः स्वहस्तेन संस्पृशन्नानन्दयति तथा त्वमपि सर्वं जन्तुजातं निजशीतलकरैराह्लादयसीति भावः । **क्रूरैः**–तीक्ष्णैः, अतिशयैः उग्रैश्च, **शूरप्रकटितकरैः**–दिनकरप्रसारितकिरणैः, वीरविस्तारितैः शुल्कैः, हस्तैः, **क्लिष्टलोकाम्**–पीडितजनाम्, **वसुधाम्**–वसुन्धराम्, **निर्भरम्**–बाढम् अत्यर्थमितियावत्, **विष्वक्**–सर्वतोभावेन, **निर्वापयसि**–सान्त्वयसि–( इति–इतिहेतोः ) **सत्यमेव**–नूनमेव, **राजा**–राजपदाभिधेयः, **असि**–वर्त्तसे, ‘ राजा निशो रत्नकरौ च चन्द्रः ’ इति कोषाद्राजपदवाच्यश्चन्द्रमास्तच्च तदीयं नाम सार्थकम् ,तथाहि–यथालोके धनगृध्नुभी राजाभासैः स्थापितैरतिशयैर्धट्टैः अतिमर्यादैर्बलिष्ठैः प्रसारितहस्तैः वसुधातलवासिजनपीडनद्वारा प्रपीड्यमानां पृथिवीं पालयन् सत्यो हि भूपालो राजपदभाक् भवति तथा त्वमपि प्रखरदिनकरकिरणैरुपद्राव्यमानां विश्वम्भरां निर्वापयन् सत्यमेव राजपदवाच्योऽसीतिभावः । उपमा ‘ अन्यन्निषिध्य प्रकृत–स्थापनं निश्चयः पुनः ’ इति लक्षणलक्षितो निश्चयश्चालङ्कारौ प्रकृते ॥२५॥

( २६ )

पूर्ववर्णितपरिवारस्य परोपकारपरायणतायां निदानं भवानेवेत्याह **एवमिति** ।

**एवं विश्वो-पकृतिकुशलः कः कुटुम्बे न तेऽस्ति,**
**प्रायः सद्भिः प्रथितचरितै-स्त्वादृशैर्वर्णनीये ॥**
**यद्वा रत्ना-कर इति यशः प्राप युष्माभिरेवाऽ-**
**म्भोधिर्वप्तु-र्भवति महिमो-दारसत्त्वैस्तनूजैः ।२६।**

( अन्वयः ) एवं प्रथितचरितैः प्रायः सद्भिः त्वादृशैः वर्णनीये ते कुटुम्बे कः विश्वोपकृतिकुशलः नास्ति, यद्वा अम्भोधिः युष्माभिरेव रत्नाकर इति यशः प्राप ( यतः ) उदारसत्त्वैः तनूजैः वप्तुः महिमा भवति ॥२६॥

( प्रकाशः )—**एवम्**–पूर्वदर्शितप्रकारेण, **प्रथितचरितैः**–विततवृत्तान्तैः, **प्रायः सद्भिः**–प्रायशः सज्जनैः, प्रायः पदोपादानेन कदाचित्केषांचिच्चन्द्राद्या उपतापकरा अपि भवन्तीति सर्वथा सज्जनत्वं व्यावर्त्यते, अतएव 'रजनिनाथ ! निशाचर ! दुर्मते !, विरहिणां रुधिरं पिबसि ध्रुवम् । उदयतोऽरुणता कथमन्यथा, तव कथञ्च तके तनुताभृतः ॥' इत्यादिकवनमपि सङ्गच्छते । **त्वादृशैः**–तव तुल्यैः युष्मद् + दृश् ' त्यदाद्यन्य– ' ।५।१।१५२। इति टक् ' अन्यत्यदादेराः ' ।३।२।१५२। इति आत्वं त्वादृशः । **वर्णनीये**–वर्णनयोग्ये, प्रशंसनीय इति यावत्, **ते**–तव, **कुटुम्बे**–परिवारे, **कः विश्वोपकृतिकुशलः**–जगदुपकारदक्षः कः, **नास्ति** ?–न वर्तते, अपितु सर्व एवास्तीतिभावः । **यद्वा**–अथवा, **अम्भोधिः**–सागरः, **युष्माभिरेव**–श्रीमद्भिरेव, **रत्नाकर इति**–रत्नानां निधिरिति, **यशः**–ख्यातिं, **प्राप**–लेभे, भवादृशानां रत्नानामुत्पादनादेव लवणोदः रत्नाकरत्वेन प्रसिद्ध इतिभावः । यतः, **उदारस-**

स्वैः–प्रकृष्टपराक्रमैः, तनूजैः–आत्मजैः, वप्तुः–जनकस्य ‘ वप्ता तु जनकस्तातः ’ इति हैमः । महिमा–महत्त्वम्, भवति–जायते, अर्थान्तरन्यासः ॥ २३ ॥

( २७ )

अतः प्रार्थनां मे स्वीकुरु इत्याह तस्मादिति–

**तस्माद्बन्धो ! जलधितनय ! प्रार्थनां मे समर्थ,**
**व्यर्थीकर्तुं न खलु कथमप्यर्हसि प्रौढवंश्य ! ॥**
**येनोत्कृष्टं जगति विदितं याचमानस्य जन्तो–**
**र्याच्ञाभङ्गे भवति लघुता नैव सा किन्त्वमुष्य ॥२७॥**

( अन्वयः ) बन्धो ! जलधितनय ! तस्मात् मे प्रार्थनां समर्थ, प्रौढवंश्य ! कथमपि व्यर्थीकर्तुं न खलु अर्हसि, येन जगति उत्कृष्टं विदितं याच्ञाभङ्गे याचमानस्य जन्तोः लघुता नैव भवति किन्तु सा अमुष्य ( भवति ) ॥ २७ ॥

( प्रकाशः ) बन्धो !–अङ्ग आत्मीय ! बध्नाति स्नेहं बन्धुः ‘ भृमृतॄ–’ ( उणा० ७१६ ) इत्युः । जलधितनय–सागराङ्गज ! तस्मात्-पूर्वोक्तहेतोः, मे–मदीयाम्, प्रार्थनाम्-याचनाम्, समर्थ–स्वीकुरु, सफलीकुर्वितियावत्, प्रौढवंश्य !–प्रवरकुलप्रसूत । प्र+ऊढः ‘ प्रस्यैषैष्योढो ’ १ । २ । १४ । इति प्रौढः, कथमपि–कथङ्कारमपि, व्यर्थीकर्तुम्–विफलयितुम्, न खलु–नैव, अर्हसि–प्रभवसि, योग्योऽसीतियावत्, कुतो न व्यर्थयितुं योग्य इत्याह येनेति येन–यत्कारणात्, जगति–विश्वे, उत्कृष्टं विदितम्–प्रचुरप्रसिद्धम्, किं तत् ? याच्ञाभङ्गे–प्रार्थनातिरस्कारे याचमानस्य जन्तोः–

याचकजनस्य लघुता-अपकीर्तिः अवहेलनेत्यर्थः, नैव-नह्येव, भवति-जायते, किन्तु-परन्तु, सा-लघुता, अमुष्य-तदस्वीकर्तुः भवतीतिशेषः । अर्थान्तरन्यासः ॥ २७ ॥

( २८ )

तव सामर्थ्याद्बहिर्भूतं न किञ्चिदप्यालोचयामीत्याह-नाशक्यमिति—

**नाशक्यन्ते भुवनवलये मित्र ! पश्यामि किञ्चि-**
**त्तेजःपुञ्जै-रनतिजरठै-रक्रमाक्रान्तविश्व ! ॥**
**पादान् मूर्ध्नि त्रिपुरजयिनः कौतुकेनोपधाया-**
**ह्नाय स्मेरी-कृततजग-द्व्यापिशौर्यप्रतापः ॥२८॥**

( अन्वयः ) मित्र ! अनतिजरठैः तेजःपुञ्जैः अक्रमाक्रान्तविश्व ! ते भुवनवलये अशक्यं न किञ्चित् पश्यामि, कौतुकेन त्रिपुरजयिनः मूर्ध्नि पादान् उपधाय अह्नाय स्मेरीकृततजगद्व्यापिशौर्यप्रतापः ( असि ) ॥ २८ ॥

( **प्रकाशः** ) **मित्र !**-हे सखे ! **अनतिजरठैः**-नातिकठिनैः, जीर्यति जरठः 'मृजॄशॄ-' ( उणा० १६७ ) इत्यठः 'दृढः कठोरः कठिनो, जरठः,' इति हैमः, मृदुभिरितियावत् । **तेजःपुञ्जैः**-प्रभूतप्रभाभिः, किरणकलापैरित्यर्थः, **अक्रमाक्रान्तविश्व !**-न क्रमः अक्रमस्तेनाक्रान्तं विश्वं येन तदामन्त्रणे, युगपदभिव्याप्तभुवन !, **ते**-तव, **भुवनवलये**-ब्रह्माण्डभाण्डोदरे, **अशक्यम्**-असाध्यम्, **न**-नैव, **किञ्चित्**-किमपि, **पश्यामि**-आलोचयामि, **कौतुकेन**-कुतूहलात्, विनोदेनेतियावत्, **त्रिपुरजयिनः**-रुद्रस्य,

त्रिपुरस्य जयी तस्य, शम्भोराग्नेयबाणेन त्रिपुरस्य प्लुष्टत्वात्तस्येयमभिधा, मूर्ध्नि–शिरसि, पादान्–चरणान्, किरणानितियावत्, उपधाय–स्थापयित्वा, अह्नाय–झटिति, अह्नायेति विभक्तिप्रतिरूपकमव्ययम्–यथा 'अह्नाय सा नियमजं क्लमसुत्ससर्ज' 'झटित्याशु मङ्क्ष्वह्नाये'ति हैमः, स्मेरीकृततजगद्व्यापिशौर्यप्रतापः–ततश्च तत् जगत्, अस्मेरं स्मेरं कृतं स्मेरीकृतं स्मेरीकृतञ्च तत् ततजगत् तत्र व्यापी शौर्यस्य प्रतापो यस्य सः, विस्मयितविस्तृतविश्वव्यापकवीर्योत्साहः, त्वमसीतिशेषः। विस्मयः ॥ २८ ॥

( २९ )

त्वत्प्रभावादेव ते भागिनेयो जयन्तो विश्वविजेता भगिनीपतिः कृष्णश्च त्रिखण्डाक्रान्तविक्रमः संवृत्त इति वर्णयति काममिति।

**कामं क्षामा–कृतिमपि जग–ज्जयन्तं न कोऽपि,**
**च्छेत्तुं शक्त–स्तदिह भवतो मातुलस्यानुभावात् ॥**
**गोपालोऽपि त्रिभुवनमिदं क्रान्तवान् यत् त्रिपद्या,**
**तत्राप्येतत् प्रभवति तव श्यालकस्यैव तेजः ॥ २९ ।**

( अन्वयः ) यत् क्षामाकृतिम् अपि जगत् जयन्तं कामं कोऽपि छेत्तुं न शक्तः तत् इह मातुलस्य भवतः अनुभावात्, यत् गोपालोऽपि इदं त्रिभुवनं त्रिपद्या क्रान्तवान् तत्रापि एतत् श्यालकस्य तवैव तेजः प्रभवति ॥ २९ ॥

(प्रकाशः) यत्–यतः, क्षामाकृतिमपि–क्षीणकायमपि अतनुमितियावत् क्षै+क्तः 'क्षैशुषिपचो मकवम्' ।४।२।७८। इति तस्य मत्वम्, क्षामः। जगत्–संसारम्, जयन्तम्–पराभवन्तम्,

**कामम्**–प्रद्युम्नम् ‘ दर्पककामहृच्छयाः प्रद्युम्नः श्रीनन्दनश्च ’ इति हैमः **कोऽपि**–कश्चनापि, **छेत्तुम्**–पराजेतुम्, विनाशयितुमित्यर्थः, **न शक्तः**–न प्रभुः, **तत्**–तत्र, **इह**–अस्मिन्, ‘ ककुत्रात्रेह ’– ।७।२।९३। इति निपात्यते, **मातुलस्य**–मातुर्भ्रातुः, ‘ पितृमातुर्व्यड्डुलं भ्रातरि ’ ।६।२।६२। इति डुलः मातुलः, **भवतः**–तव, **अनुभावात्**–प्रभावात् । अयमाशयः–अनङ्गोऽप्ययं मदनो यथाकामं समस्तसंसारं शास्ते मोहयति च तत्र त्वमेव तस्य मातुलः सन् साहाय्यं वितरसीति, यदि उद्दीपकस्त्वं[1] न स्यास्तदाऽङ्गिनोऽनङ्गविजये कियान् विलम्बः, विष्णुप्रिया पद्मा ते भगिनी सहजत्वात् तत्सूनुरयं प्रद्युम्नः इति स्पष्ट एव त्वं तस्य मातुलः । **यत्**–यतः, **गोपालोऽपि**–गोविन्दोऽपि, **इदं त्रिभुवनम्**–एतज्जगत्रितयम्, **त्रिपद्या**–पादत्रयेण, त्रयाणां पदानां समाहारस्त्रिपदी ‘ द्विगोः समाहारात् ’ ।२।४।२२। इति ङीः । **क्रान्तवान्**–अक्रमीत्, **तत्राप्येतत्**–तदपीदम्, **श्यालकस्य**–श्यायति श्यालः ‘ श्यामाश्या–’ ( उणा० ४६२ ) इति लः स्वार्थे के श्यालकः, पत्नीभ्रातुः, **तवैव**–श्रीमतः शशिन एव, **तेजः**–प्रतापः, **प्रभवति**–जागर्ति, अत्रेदं तात्पर्यम्–अतिदानिनं बलिनामधेयमसुरं निर्जेतुं सुरप्रार्थनया विष्णुना वामनावतारः सम्पादितः, प्रार्थितेन तेन रञ्जितेन बलिना पादत्रयप्रमितः प्रदेशः प्रदत्तस्तस्मै ब्रह्मचारि–( वेष )भूषणविभूषिताय भिक्षुकाय, तदा विराट्रूपमाविष्कृत्य वामनेन त्रिपद्या विश्वविश्वमाक्रान्तमिति पुराणप्रसिद्धम् ॥२९॥

---

१ चन्द्रचन्दनरोलम्ब–रुताद्युद्दीपनं मतम् । सा० द० ।

( ३० )

सरोजिनीनिवासिनी त्वद्भगिनी लक्ष्मीः सदोषाऽपि त्वदनुभावादेव विश्वमान्येत्याह–येति—

**या चाञ्चल्या–द्भुवि विजयते विद्युतो नीचसङ्गात्,**
**सिन्धूरन्ध–ङ्करणगुणतो श्यामलां धूमलेखाम् ॥**
**साऽपि भ्रातु–र्भवति भवतो माननीयाऽनुभावा–**
**द्विश्वे दोषान् गणयति जनः को हि राज्ञो भगिन्याः ॥**

( अन्वयः ) या भुवि चाञ्चल्यात् विद्युतः नीचसङ्गात् सिन्धूः अन्धङ्करणगुणतः श्यामलां धूमलेखां विजयते साऽपि भ्रातुः भवतः अनुभावात् माननीया भवति, हि विश्वे कः जनः राज्ञः भगिन्याः दोषान् गणयति ॥३०॥

( प्रकाशः ) या–लक्ष्मीः, भुवि–जगत्याम्, चाञ्चल्यात्–चपलतायाः, अस्थिरत्वादितियावत्, विद्युतः–सौदामनीः, नीचसङ्गात्–निम्नगमनात्, सिन्धूः–निम्नगाः, नदीरितियावत्, 'सिन्धुः शैवलिनी वहा च ह्रदिनी, स्रोतस्विनी निम्नगा' इति हैमः, अन्धङ्करणगुणतः–आन्ध्यसम्पादकस्वभावात्, श्यामलां धूमलेखाम्–नीलामनलध्वजराजीम्, 'श्यामलः, श्यामः कालो नीलः' इति हैमः। विजयते–पराभवति, 'परावेर्जेः' । ३ । ३ । २८ । इत्यात्मनेपदम् । विदितमेतद्विश्वे यत् चञ्चला चपलैव, निम्नगा निम्नगैव, श्यामला धूमलेखैव । नातिक्रामति कश्चनापि ताः । यदि ता अभिभवितुमभिलषति कश्चित्तदा तत्तद्गुणानाधिक्येन स्वायत्ती-

कुर्यात् । श्रिया सम्पादितमेतत्, लक्ष्म्यां विद्युतोऽधिकं चाञ्चल्यं, नदीभ्यो विशेषेण निम्नगतिः धूमाद्विशिष्यते श्यामलतेतिभावः ।

**साऽपि**–सा श्रीरपि, **भ्रातुर्भवतः**–सहोदरस्वरूपस्य श्रीमतः, **अनुभावात्**–प्रभावात् **माननीया**–अभिलषणीया, सम्मान्येति-यावत्, **भवति**–जायते, **हि**–यतः, **विश्वे**–संसारे, **कः जनः**–को लोकः, 'लोको जनः प्रजा' इति हैमः । **राज्ञो भगिन्याः**–प्रजा-पालस्वसुः, **दोषान्**–दुर्गुणान्, **गणयति**–सङ्ख्याति । व्यतिरेकग-र्भितार्थान्तरन्यासः ॥३०॥

( ३१ )

इतस्ते गन्तव्यत्वेन निर्णीतमस्ति नगरं सूर्य्यपुरमित्याह-**गन्तव्य इति**—

**गन्तव्यस्ते तपनतनया-तीरकोटीरमिन्दो !,**
**सूर्य्यद्रङ्गो गुरुपदयुग-स्पर्शसम्प्राप्तरङ्गः ॥**
**गत्वा तत्र त्रिभुवनजन-ध्येयपादारविन्दो,**
**द्रष्टव्यः श्री-तपगणपति-र्भाग्यसम्भारलभ्यः॥३१॥**

( अन्वयः ) इन्दो ! गुरुपदयुगस्पर्शसम्प्राप्तरङ्गः तपनतनया-तीरकोटीरं सूर्य्यद्रङ्गः ते गन्तव्यः, तत्र गत्वा भाग्यसम्भार-लभ्यः त्रिभुवनजनध्येयपादारविन्दः श्रीतपगणपतिः द्रष्टव्यः॥३१॥

( **प्रकाशः** ) **इन्दो !**–हे चन्द्र ! इन्दति इन्दुः 'भृमृ–' ( उणादि–७१६ ) इत्युः । **गुरुपदयुगस्पर्शसम्प्राप्तरङ्गः**–गुरोः-पदं तस्य युगं तस्य स्पर्शस्तेन सम्प्राप्तो रङ्गो येन सः, सूरिक्रम-

यमलविहरणलब्धोल्लासः, **तपनतनयातीरकोटीरम्**–तपनस्य तनया तस्यास्तीरं तस्य कोटीरम्, तापीतटोष्णीषम्, 'तापी तपनी तपनात्मजा' 'तटं तीरं प्रतीरं च' 'कोटीरमुष्णीषम्' इति हैमः । **सूर्य्यद्रङ्गः**–सूर्यपुरम्, (सुरतनगरम्) द्रमन्त्यत्रेति द्रङ्गः 'द्रमो णिद्वा' (उणा० ९५) इति गः, पूः पूरी द्रङ्गः,' इति हैमः, **ते**–तव, **गन्तव्यः**–यातव्यः इतस्त्वया सूर्य्यपुरं गमनीयमितियावत् 'कृत्यस्य वा' ।२।२।८८। इति षष्ठी, **तत्र**–तस्मिन्, सूर्यपुर इतियावत्, **गत्वा**–समेत्य, **भाग्यसम्भारलभ्यः**-सुकृतसञ्चयसङ्गम्यः, पुण्यप्रकर्षप्राप्य इत्यर्थः, **त्रिभुवनजनध्येयपादारविन्दः**–त्रयाणां भुवनानां समाहारस्तत्र तस्य वा ये जनास्तैः ध्येयं पादञ्च तदरविन्दं तत् यस्य सः त्रिजगज्जनमननीयपदपङ्कजः, **श्रीतपगणपतिः**–श्रीमत्तपागच्छाधीश्वरः, आचार्यभट्टारकश्रीविजयप्रभसूरीश्वरमहाराज इतियावत्, प्रकृते तपशब्दस्तपाशब्दश्च रूढाववसेयौ तेन कथं न श्रीतपोगणपतिरिति न शङ्क्यम्, यद्वा तपति तपः अदन्तो यौगिको विज्ञेयः स एव ग्रीष्मे रूढः, **द्रष्टव्यः**–दर्शनीयः । अनुप्रासः ॥३१॥

( ३२ )

सूर्यपुरगमनाय पथपरिचयावधारणायोन्मुखीकरोतीन्दुं **मार्गमिति**—

**मार्गं तस्य प्रचुरकदली–काननैः कान्तदेशं,**
**स्थाने स्थाने जलधिदयिता–सन्ततिध्वस्तखेदम् ॥**

**आकर्ण्यान्तः–करणविषये स्थापयोक्तं मयेन्दो !ऽ**
**भीष्टं स्थानं व्रजति हि जनः प्राञ्जलेनाध्वना द्राक् ।३२।**

( अन्वयः ) इन्दो ! मया उक्तं प्रचुरकदलीकाननैः कान्तदेशं स्थाने स्थाने जलधिदयितासन्ततिध्वस्तखेदं तस्य मार्गम् आकर्ण्य अन्तःकरणविषये स्थापय हि जनः प्राञ्जलेन अध्वना अभीष्टं स्थानं द्राक् व्रजति ॥ ३२ ॥

( प्रकाशः ) **इन्दो !**–अयि शीतकर ! **मयोक्तम्**–मत्कथितम्, अस्माभिरुपदर्शितमितियावत्, **प्रचुरकदलीकाननैः**–कदल्याः काननानि प्रचुराणि च तानि कदलीकाननानि तैः, भूरिरम्भाविपिनैः, कदिः सौत्रः कद्यते कदली ' मृदिकन्दि–' ( उणा० ४६५ ) इत्यलः, केन वायुना दल्यते वा, के दलमस्या इति वा, 'रम्भा मोचा कदल्यपि ' इति हैमः, **कान्तदेशम्**–मनोरमप्रदेशम्, **स्थानेस्थाने**–प्रतिस्थलम्, **जलधिदयितासन्ततिध्वस्तखेदम्**–जलधेर्दयिता तस्याः सन्ततिस्तया ध्वस्तः खेदो यत्र तम्, सरित्सङ्घातशमितपरिश्रमम्, 'नदी...समुद्रदयिते 'ति हैमः । **तस्य मार्गम्**–सूर्यपुरपत्तनपन्थानम्, **आकर्ण्य**–निशम्य, **अन्तःकरणविषये**–मानसदेशे, 'अन्तःकरणं मानसं मनः' इति हैमः, **स्थापय**–निधेहि, **हि**–यतः, **जनः**–लोकः, **प्राञ्जलेन**–ऋजुना, ' ऋजुस्तु प्राञ्जलोऽञ्जसः ' इति हैमः, **अध्वना**–निगमेन अतन्ति अत्र पान्था अध्वा, ' अतेर्धच् ' ( उणा० ९०९ ) इति क्वनिप् ' मार्गोऽध्वा पन्था निगमः ' इति हैमः, **अभीष्टं स्थानम्**–ईप्सितस्थलम्, **द्राक्**–अञ्जसा, **व्रजति**–प्रयाति । अर्थान्तरन्यासः ॥ ३२ ॥

( ३३ )

श्रीयोधपुरनगरात् सूर्यपुरं दक्षिणस्यां दिशि वर्तत इति तां दिशमुद्दिश्य गमनायाह शैलादिति ।

**शैलादस्मा-दुपसर पथा दाक्षिणात्येन बन्धो !,**
**गन्धोद्रेको-ल्लसितकुसुम-स्तम्भितेन्दिन्दिरेषु ॥**
**स्थाने स्थाने सरससरसः काननेष्वंशुपूरै-**
**र्मोदं सम्पा-दय कुमुदिनी-फुल्लपुष्पेक्षणानाम् ॥३३॥**

( अन्वयः ) बन्धो ! अस्मात् शैलात् दाक्षिणात्येन पथा उपसर, स्थाने स्थाने गन्धोद्रेकोल्लसितकुसुमस्तम्भितेन्दिन्दिरेषु काननेषु सरससरसः कुमुदिनीफुल्लपुष्पेक्षणानाम् अंशुपूरैर्मोदं सम्पादय ॥ ३३ ॥

( प्रकाशः ) **बन्धो !** भ्रातः, **अस्मात् शैलात्**–पुरोवर्तिपर्वतात्, **दाक्षिणात्येन पथा**–अवाचीनेनाध्वना, याम्यदिशि गच्छता मार्गेणेति यावत्, दक्षिणस्यां भवो दाक्षिणात्यः 'दक्षिणापश्चात्पुरसस्त्यण्' ।६।३।१३। इति त्यण्, **उपसर**–प्रयाहि, **स्थानेस्थाने**–अन्तराऽन्तरा, **गन्धोद्रेकोल्लसितकुसुमस्तम्भितेन्दिन्दिरेषु**–गन्धस्योद्रेकस्तेनोल्लसितं तादृशं च तत् कुसुमं तत्र स्तम्भिता इन्दिन्दिरा यत्र तेषु, परिमलप्रकर्षप्रकाशितप्रसूनसंसक्तचञ्चरीकेषु, इन्दति कुसुमैरिन्दिन्दिरः 'स्थविर–'। (उणा० ४१७) इतीरे निपात्यते, 'चञ्चरीकः शिलीमुखः; इन्दिन्दिरः'। इति हैमः, **काननेषु**–षण्डेषु, 'षण्डं काननं वनम्' इति हैमः, **सरस-**

**सरसः**—रमणीयसरस्याः, **कुमुदिनीफुल्लपुष्पेक्षणानाम्**—फुल्लानि च तानि पुष्पाणि कुमुदिन्याः फुल्लपुष्पाणि तेषामीक्षणानि तेषाम्, कैरवकुलविकचकुसुमाक्ष्णाम्, कुमुदानां समूहः कुमुदिनी 'खलादिभ्यो लिन्' ।६।२।२७। इति लिन् लित्वात्स्त्रीत्वम्, फलति विशीर्यते फुल्लम् 'अनुपसर्गाः क्षीव–' ।४।२।८०। इतिक्तान्तो निपात्यते, यद्वा विकसनार्थकफुल्ल धातोः कर्तरि अचि ज्ञेयम्, **अंशुपूरैः**—किरणजालैः, **मोदम्**—हर्षम्, **सम्पादय**—जनय । यमकप्रायोऽनुप्रासः ।

अत्रायं विशेषः—ननु चन्द्रमसः पूर्वस्या दिशः प्राचीप्रदेशं प्रति गमनमेवाबालगोपालप्रसिद्धमिति कथं सन्देशयिता तं व्यवहारविरुद्धं दक्षिणां दिशं गन्तुमादिशतीति चेत्सत्यम्, कवीनां सर्वत्र लोकव्यवहाराननुसारित्वात्, अन्यत्वात् कविसमयस्य, अन्यथा कविचक्रवर्तिकालिदासप्रमुखाणामपि मेघपवनप्रमुखैः साकं सन्देशप्रेषणमघटितमेव स्यात्, दिव्यानुभावादिन्दोर्यस्यां कस्याञ्चिद्दिशि प्रयातुमीशत्वात्, स्नेहाञ्चितस्वान्तत्वात्सुहृदनुकम्पयाऽऽचार्यपादाभिवन्दनार्थं याम्याशायामस्य स्वेच्छयैव यातव्यत्वात्, प्रौष्ठपदपौर्णमास्याः समयो दक्षिणायन इति तदानीं ग्रहेशानां दक्षिणस्यामयनस्य स्वभावसिद्धत्वात्, अक्षांशभेदेन श्रीयोधपुरसूर्यपुरयोश्चन्द्रोदयस्य पूर्वापरभावात्वात्, प्रचुरमयूखत्वेनेन्दोः कैश्चित्पादैरुभयत्र गतेरविरुद्धत्वात्, सन्देशप्रेषणजन्यात्यौत्सुक्येन सन्देशप्रेषयित्रा तदानीमेतद्विचारस्यापरिगणितत्वाच्चेति प्रकृतं प्रकृतेऽतिप्रपञ्चेनेति ॥ ३३ ॥

( ३४ )

अथ त्रिभिः श्लोकैः श्रीयोधनपुरनगरतो नवयोजनदूरस्थित-जालन्धरनगरनिकटवर्ति सुवर्णगिरिनामधेयं गिरिराजं वर्णयति तुङ्गे इति ।

**तुङ्गे तिष्ठ क्षणमुडुपते ! त्वं सुवर्णाचलस्य,**
**क्रीडावापी-सवनसरसै-र्मारुतैः शान्ततापः ॥**
**तत्रत्यानां सकलदिवस-क्षुद्व्यथापीडितानां,**
**सौहित्यं त्वत्किरणकवलैः स्ताच्चकोराङ्गनानाम् ॥३४॥**

( अन्वयः ) उडुपते ! सुवर्णाचलस्य तुङ्गे ( शृङ्गे ) क्रीडावापीसवनसरसैः मारुतैः शान्ततापः त्वं क्षणं तिष्ठ, तत्रत्यानां सकलदिवसक्षुद्व्यथापीडितानां चकोराङ्गनानां त्वत्किरणकवलैः सौहित्यं स्तात् ॥ ३४ ॥

( **प्रकाशः** ) **उडुपते !**–नक्षत्रेश !, **सुवर्णाचलस्य**–तदभिधेयस्य कञ्चनगिरेः, अद्यत्वेऽपि तत्रत्यप्राकारत्रितयप्रमुखप्रभूतप्रेक्ष्यपदार्थप्रकरः प्राचीनगौरवं स्मारयति तथा च श्रूयतेऽभियुक्तोक्तिः–'[1]नवनवइलक्खधणवइ–अलद्धवासे सुवण्णगिरिसिहरे; नाहडनिवकालीनं, *थुणिमो वीरं जक्ख–वसहीए ॥* इति । **तुङ्गे**–उन्नते, अष्टशतकरोच्छ्रिते, शृङ्गे इति शेषः **क्रीडावापीसवनसरसैः**–क्रीडायै वापी तत्र सवनं तेन सरसैः, विनोददीर्घिकास्नानरुचिरैः,

---

१ नवनवतिलक्षधनपत्यलब्धवासे सुवर्णगिरिशिखरे ।
नाहडनृपकालीनं, स्तुमो वीरं यक्षवसतौ ॥

'दीर्घिका वापी' इति हैमः, 'अथ स्नानं सवनमाप्लवः' इत्यपि हैमः । मारुतैः–समीरणैः, मरुदेव मारुतः प्रज्ञादित्वादण्, शान्ततापः–विगलितस्वेदः, त्वम्–श्रीमान्, क्षणम्–निमेषम्, ईषत्कालमित्यर्थः, तिष्ठ–स्थितिं कुरु, तत्रत्यानाम्–तत्पर्वतवासिनाम्, सकलदिवसक्षुद्व्यथापीडितानाम्–सकलश्चासौ दिवसः तत्र या क्षुद्व्यथा तया पीडितानाम्, दिवसमभिव्याप्यबुभुक्षाजनितक्लेशानाम्, चकोराङ्गनानाम्–ज्योत्स्नाप्रियप्रियाणां, चकते ज्योत्स्नया तृप्यति चकोरः 'कठिचकि' ( उणा० ४३३ ) इत्योरः 'ज्योत्स्नाप्रिये चलचञ्चु–चकोरविषसूचकाः' इति हैमः, त्वत्किरणकवलैः–भवदीयकौमुदीग्रासैः, सौहित्यम्–तृप्तिः, 'नातिसौहित्यमाचरे' दितिस्मृतिः स्तात्–भवतु, अस् + तुः 'आशिषि तुह्योस्तातङ्' ।४।२।११९। इति तातङ् 'श्नास्त्योर्लुक्' ।४।२।९०। इत्यल्लोपः स्तात् ॥ ३४ ॥

( ३५ )

**तस्मिन् शैलेऽन्तिमजिनवरा–वामवामेयदेव–**
**प्रासादौ यौ तरुणकिरणैः सङ्गरं निर्मिमाते ॥**
**मध्यस्थः सन् सुघटितरुची तौ कुरु प्रायशो यत्,**
**प्रोत्तुङ्गानां भवति महतै–वापनेयो विरोधः ॥३५॥**

( अन्वयः ) तस्मिन् शैले यौ अन्तिमजिनवरावामवामेयदेवप्रासादौ तरुणकिरणैः सङ्गरं निर्मिमाते ( तत्र ) मध्यस्थः सन् तौ सुघटितरुची कुरु, यत् प्रायशः प्रोत्तुङ्गानां विरोधः महतैव अपनेयो भवति ॥ ३५ ॥

( प्रकाशः ) **तस्मिन् शैले**–तत्र सुवर्णगिरौ, **यौ अन्तिमजिनवरावामवामेयदेवप्रासादौ**–जिनेषु जिनानां वा वरः जिनवरः, अन्तिमश्चासौ जिनवरः, न वामः अवामः स चासौ वामेयदेवः, अन्तिमजिनवरश्च अवामवामेयदेवश्च तयोः प्रासादौ, श्रीमहावीरस्वामि–प्रभुपार्श्वनाथचैत्ये, अन्ते जातः अन्तिमः ' पश्चादाद्यन्त– ' ।६।३।७५। इतीमः । वामाया अपत्यं वामेयः 'ङ्याप्त्यूङः' ।६।१।७०। इत्येयण्, प्रसीदन्ति नयनमनांस्यस्मिन्निति प्रासादः ' घञ्युपसर्गस्य ' ।३।२।८६। इतिदीर्घः । ' प्रासादो देवभूपानाम् ' इतिहैमः, **तरुणकिरणैः**–तीक्ष्णतेजोभिः, दिनकरकरनिकरैरितियावत्, **सङ्गरम्**–सङ्ग्रामम्, **निर्मिमाते**–विदधतः, तत्र **मध्यस्थः सन्**–निर्णायको भूत्वा, **तौ**–पूर्ववर्णितप्रासादौ, **सुघटितरुची**–अनुरूपच्छवी, अविरोधावितियावत्, **कुरु**–सम्पादय, **यत्**–यस्मात्, **प्रायशः**–बहुशः, **प्रोत्तुङ्गानाम्**–महताम्, **विरोधः**–कलहः, **महतैव**–विशिष्टजनेनैव, **अपनेयः**–दूरीकरणीयः, **भवति**–जायते, अस्यायमाशयः–तत्र श्रीसुवर्णाचले गगनचुम्बि–श्रीवीरपार्श्वविहारौ रत्नमणिघटितकनककलशध्वजदण्डादिसमृद्धि–समृद्धावासते, तत्र चादिवसं मार्तण्डरश्मिसम्पातेन समुच्छलत्किरणानां भवति मध्ये सङ्गमः, स हि सङ्ग्रामसदृशश्चकास्ति रजनीनाथागमे तु सङ्ग्रामसादृश्यसम्पादकस्य तिग्मरुचेरस्तङ्गतत्वात् सुधाधवलितौ तौ चन्द्रकिरणैरतिशयेनप्रशान्तशोभौ भासेयाताम् । उत्प्रेक्षानुप्रासार्थान्तरन्यासाः ॥३४॥

( ३६ )

**तत्र क्रीडो–पवनसरसी–स्वच्छनीरान्तरेषु,**
**स्नात्वा स्वैरं प्रतिकृतिमिषान् नव्यधौतांशुकः सन् ॥**

**ज्योत्स्नाजालैः स्नपयमधुरै-र्वीरवामेयदेवौ,**
**कर्पूराच्छै-स्तदनु च करै-रर्जयाभ्यर्च्य पुण्यम् ॥३६॥**

(अन्वयः) तत्र क्रीडोपवनसरसीस्वच्छनीरान्तरेषु प्रतिकृतिमिषात् स्वैरं स्नात्वा नव्यधौतांशुकः सन् मधुरैः ज्योत्स्नाजालैः वीरवामेयदेवौ स्नपय तदनु च कर्पूराच्छैः करैः अभ्यर्च्य पुण्यम् अर्जय ॥ ३६ ॥

(**प्रकाशः**) **तत्र**–तस्मिन् पर्वते, **क्रीडोपवनसरसीस्वच्छनीरान्तरेषु**–क्रीडायै उपवनं तत्र सरसी तस्याः स्वच्छनीरं तस्यान्तरेषु, रमणारामसरोवरधवलजलमध्येषु, **प्रतिकृतिमिषात्**–प्रतिबिम्बच्छलेन, **स्वैरम्**–यथेच्छम्, स्वस्य ईरं स्वैरं 'स्वैरस्वैर्यक्षौहिण्याम्' ।१।२।१५। इत्यैत्त्वम्, **स्नात्वा**–स्नानं विधाय, **नव्यधौतांशुकः सन्**–धौतञ्च तदंशुकमत एव नव्यं धौतांशुकं यस्य सः नूतनप्रक्षालित(धौतशब्दस्य भाषाप्रसिद्धधोतीरूपार्थवाचकत्वात्तदपि सूच्यते) किरणरूपोत्तरीयशुभ्राम्बरो भूत्वा, नहि जिनाभ्यर्चना धवलधौतोत्तरीयवसनमन्तरा भवतीति व्यक्तमनेन तद्द्वयमप्यत्र सम्पादितम्, धाव्धातोः क्तप्रत्यये 'अनुनासिके च च्छ्वः शूट्' ।४।१।१०८। इति धुडादिपरे धातोर्वस्य ऊट् तथा च 'ऊटा' ।१।२।१३। इति अवर्णस्य ऊटा सह औकारे धौतम्, 'अंशुकं श्लक्ष्णवाससि। उत्तरीये वस्त्रमात्रेऽपि' इति हैमानेकार्थसङ्ग्रहः। **मधुरैः**–मनोहरैः, **ज्योत्स्नाजालैः**–चन्द्रिकाचयैः, ज्योतिरस्त्यस्यां ज्योत्स्ना 'तमिस्रार्णवज्योत्स्ना' ।७।२।५२। इति निपात्यते, 'समूहश्चयः........जालं निवहसञ्चयौ' इति

हैमः, वीरवामेयदेवौ–श्रीवर्धमानपार्श्वनाथजिनौ, स्नपय–अमृताभिषेकं कुरु, स्ना+णिः 'अर्तिरी–' ।४।२।२१। इति पुः 'ज्वलह्वलह्मलग्लास्ना–' ।४।२।३२। इति ह्रस्वः स्नपय, तदनु च–तदनन्तरन्तु, कर्पूराच्छैः–घनसारसारैः, चन्द्रप्रसन्नैरितियावत्, 'कर्पूरो हिमवालुकाघनसारः सिताभ्रश्च चन्द्रः' इति हैमः 'अच्छं प्रसन्ने' इत्यपि हैमः, करैः–किरणरूपहस्तैः, अभ्यर्च्य–प्रपूज्य, पुण्यम्–धर्मम् 'धर्मः पुण्यं वृषः श्रेयः सुकृते' इति हैमः, अर्जय–संचिनु, स्वायत्तं सम्पादयेतियावत् । काव्यलिङ्गम् ॥ ३६ ॥

( ३७ )

तदुपत्यकास्थितजालन्धरपुरप्रेक्षणाय प्रेरयन्निन्दुं तद्वर्णयति तस्येति—

**तस्याधस्तान् नगरमपरः स्वर्ग एवास्ति यस्य,**
**प्रौढेभ्यानां भवननिकरै–र्ध्वस्तमाना विमानाः ॥**
**क्काप्येकान्ते कृतवसतयः सज्जलज्जाभिभूता,**
**भूमीपीठा–वतरणविधौ पङ्गुतामाश्रयन्ति ॥३७॥**

( अन्वयः ) तस्य अधस्तात् अपरः स्वर्ग एव नगरम् अस्ति यस्य प्रौढेभ्यानां भवननिकरैः ध्वस्तमानाः विमानाः सज्जलज्जाभिभूताः क्कापि एकान्ते कृतवसतयः भूमिपीठावतरणविधौ पङ्गुताम् आश्रयन्ति ॥ ३७ ॥

( प्रकाशः ) तस्य–सुवर्णाचलस्य अधस्तात्–नीचैः प्रदेशे, अपरः–द्वितीयः, स्वर्ग एव–त्रिदशालय एव, नगरम्–पत्तनम्,

नगाःसन्त्यस्मिन् नगरं मध्वादित्वाद् रः, **अस्ति**–वर्तते, **यस्य**–यत्स-म्बन्धिनः, **प्रौढेभ्यानाम्**–श्रेष्ठश्रेष्ठिनाम्, **भवननिकरैः**–सदनस-मूहैः, **ध्वस्तमानाः**–निहताहङ्काराः, पूर्वमासीत्तेषामहङ्कारो यद्वयमे-वात्युन्नता रमणीयतायां लब्धप्रतिष्ठा इति परन्ततोऽप्यधिकमुच्चैस्त-रत्वं रामण्यञ्चात्रत्यानां भवने निभाल्य विगलितमहन्त्वमेतेषामिति-भावः, **विमानाः**–देवयानानि, ध्वस्तमानत्वादेव विमाना अभूवन्, विगतं मानमस्येति विमानशब्देन यौगिकेन स एवार्थो बोध्यते, **सज्जलज्जाभिभूताः**–सज्जा चासौ लज्जा तयाऽभिभूताः, उद्युक्तह्री-पराभूताः, सन् जायते सज्जः 'क्वचित्' ।५।१।१७१। इति डः, **क्वापि**–कुहचनापि, **एकान्ते**–रहसि, **कृतवसतयः**–विहितनिवासाः, **भूमिपीठावतरणविधौ**–भूम्याः पीठस्तत्रावतरणं तस्य विधौ, पृथि-वीतलागमनप्रवर्तनायाम्, 'चिकीर्षाकृतिसाध्यत्वहेतुधीविषयो विधिः' इत्युक्तनियोगरूपो विधिः, **पङ्गुताम्**–श्रोणताम्, पादवैकल्यमिति-यावत्, 'पङ्गुः श्रोणः, इति हैमः, **आश्रयन्ति**–अभ्युपयन्ति, नहि-देवाः स्वयानमन्तरा क्वचनापि यातुमीशाः, अत्र न ते समागच्छन्ति तत्र तेषां विमानानां मानहानिर्जाताऽस्तीतिहेतुः 'सतां माने म्लाने-मरणमथवा दूरसरणम्', इतीतो दूरसृता विमाना नात्रागन्तुमु-त्सहन्ते इत्याशयः, । उत्प्रेक्षा ॥ ३७ ॥

( ३८ )

त्वद्गमनेन भविष्यति परितापस्तत्रत्यानां पान्थप्रियाप्रमुख-प्रमदानामिति वर्णयन्नाह **यद्यप्येति**—

**यद्यप्याशु ग्लपितनयना हस्तविन्यस्तवक्त्रा,**
**दूयन्ते चेत् किरणनिकरै-र्निर्भरं विप्रयुक्ताः ॥**

**विघ्नो यद्य-प्यभिसृतिकृतां योषिताञ्च त्वदीयै-**
**र्ज्योत्स्नाजालै-स्तिमिरनिकरे दूरनिर्वासिते स्यात् ।३८**

( अन्वयः ) यद्यपि आशु ग्लपितनयनाः हस्तविन्यस्तवक्त्रा विप्रयुक्ताः ( तव ) किरणनिकरैः निर्भरं दूयन्ते चेत्, च यद्यपि त्वदीयैः ज्योत्स्नाजालैः दूरनिर्वासिते तिमिरनिकरे अभिसृतिकृतां योषितां विघ्नः स्यात् ॥ ३८ ॥

( प्रकाशः ) **यद्यपि**-यदपि, **आशु**-तत्क्षणमेव, **ग्लपितनयनाः**-क्लमितेक्षणाः, प्रियविरहप्रयुक्तातिरुदितेन ग्लानिमापादितविलोचना इति भावः, **हस्तविन्यस्तवक्त्राः**-करतलनिहिताननाः, यदुक्तं विरहिणीवर्णने 'करतले लीना कपोलस्थली' **विप्रयुक्ताः**-विरहिन्यः, तव **किरणनिकरैः**-करकलापैः, **निर्भरम्**-अत्यन्तम्, **दूयन्ते चेत्**-चेत् संतप्यन्ते, **च**-पुनः, **यद्यपि**-यदपि, **त्वदीयैः**-तावकीनैः, **ज्योत्स्नाजालैः**-कौमुदीकदम्बैः, **दूरनिर्वासिते**-दविष्ठमापादिते, नष्टे इति यावत्, **तिमिरनिकरे**-अन्धकारनिकुरम्बे, **अभिसृतिकृताम्**-प्रियतमं सरन्तीनाम्, याति या प्रियं साऽभिसारिका' इति हैमः तथा च भरतः 'हित्वा लज्जाभये श्लिष्टा, मदेन मदनेन वा । अभिसारयते कान्तं, सा भवेदभिसारिका ॥' इति, **योषिताम्**--कामिनीनाम्, **विघ्नः**-अन्तरायः, विहन्यतेऽनेनास्मिन् वा विघ्नः 'स्थादिभ्यः कः' ।५।३।८२। इति कः, 'विघ्नोऽन्तरायप्रत्यूहव्यवायाः' इति हैमः । **स्यात्**-भवेत्, 'चन्द्रे कुलटाचक्राम्बुरुहविरहितमोहाः' इति कविसमयः । स्वभावोक्तिः ॥ ३८ ॥

( ३९ )

सत्यप्येवं त्वया रमणीयं तन्नगरमवश्यं दर्शनीयमित्याह- न प्रस्थेयमिति—

**न प्रस्थेयं तदपि भवताऽ-वीक्ष्य दक्षेक्षणीयं,**
**द्रङ्गं शृङ्गा-रितकुवलयं चित्रसम्पूर्णमेनम् ॥**
**विष्वग्दत्त्वा नयनयुगलं सम्यगालोचनीयं,**
**पश्चात्ताप-स्तुदति हृदयं दर्शनीये ह्यदृष्टे ॥ ३९ ॥**

( अन्वयः ) दक्ष? तदपि भवता ईक्षणीयं शृङ्गारितकुवलयं चित्रसम्पूर्णम् एनं द्रङ्गम् अवीक्ष्य न प्रस्थेयम् ( परम् ) विष्वग् नयनयुगलं दत्त्वा सम्यग् आलोचनीयं हि दर्शनीये अदृष्टे पश्चात्तापः हृदयं तुदति ॥ ३९ ॥

( प्रकाशः ) **दक्ष !**—हे चतुर, **तदपि**—तथापि, **भवता**—त्वया, **ईक्षणीयम्**—दर्शनीयम्, **शृङ्गारितकुवलयम्**—भूषितभूमण्डलम्, **चित्रसम्पूर्णम्**—आश्चर्यसम्भृतम्, अत्यद्भुतमितियावत्, 'चित्रं खे तिलकेऽद्भुते' इति हैमानेकार्थसङ्ग्रहः । **एनम्**—पुरःस्थितम्, **द्रङ्गम्**—नगरम् **अवीक्ष्य**—अनवलोक्य, **न प्रस्थेयम्**—नैव गन्तव्यम्, परम्, **विष्वग्**—परितः, **नयनयुगलम्**—लोचनद्वयम्, **दत्त्वा**—निधाय, **सम्यग्**—समीचीनतया, **आलोचनीयम्**—विलोकनीयम्, यतः, **दर्शनीये**—प्रेक्षणीये, मनोरम इति यावत्, **अदृष्टे**—लोचनगोचरतामनापादिते, **पश्चात्तापः**—अनुशयः 'विप्रतिसारोऽनुशयः पश्चात्तापोऽनुतापश्च' इति हैमः । **हृदयम्**—मानसम्, **तुदति**—व्यथते । अर्थान्तरन्यासः ॥ ३९ ॥

( ४० )

प्रेरयतीतः पञ्चयोजनदूरस्थां श्रीरोहिणीं गत्वा द्रष्टुं तस्मादिति-

**तस्माज्जाल-न्धरपुरवरा-दुत्पतन् शीघ्रगामी,**
**श्रीरोहिण्याः परिसरमथ प्राप्स्यसि त्वं निमेषात्।**
**स्थित्वा तत्र क्षणमियमपि पेक्षणीया समन्तात्,**
**नान्तःशल्यं स भवति सतां सार्थको यो विलम्बः ।४०।**

( अन्वयः ) अथ शीघ्रगामी त्वं तस्मात् जालन्धरपुरवरात् उत्पतन् निमेषात् श्रीरोहिण्याः परिसरं प्राप्स्यसि, तत्र क्षणं स्थित्वा इयमपि समन्तात् प्रेक्षणीया ( यतः ) यः सार्थकः विलम्बः सतां स अन्तःशल्यं न भवति ॥ ४० ॥

( प्रकाशः ) अथ–एतदनन्तरम्, **शीघ्रगामी**–अचिरगन्ता, **त्वम्**–आयुष्मान्, **तस्मात्**–पूर्वोपवर्णितात्, **जालन्धरपुरवरात्**–जालन्धराभिधेयश्रेष्ठनगरात्, जालोरपत्तनादितियावत्, **उत्पतन्**–उद्गच्छन्, **निमेषात्**–नयननिमीलनोन्मीलनमितमात्रसमयेन, क्षणादितियावत्, **श्रीरोहिण्याः परिसरम्**–श्रीरोहिणीनगर्याः पर्यन्तभुवम्, परितः सरन्ति संचरन्ति अत्र परिसरः 'पुंनाम्नि–' ।५।३।१३०। इति घः 'पर्यन्तभूः परिसरः स्यात्' इति हैमः। शिरोहीपुरीसमीपमितियावत् **प्राप्स्यसि**–उपेष्यसि, **तत्र**–तदुपपुरम्, **क्षणम्**–ईषत्कालम्, **स्थित्वा**–विश्रम्य, **इयमपि**–असावपि, **समन्तात्**–सर्वतोभावेन, **प्रेक्षणीया**–निरीक्षणीया, यतः **यः**–यो विलम्बः, **सार्थकः**–सप्रयोजनः, **विलम्बः**–अतिकालः, **सताम्**–सज्ज-

नानाम्, स–स विलम्बः, अन्तःशल्यम्–हृदयदाही, तापकर इति यावत्, न भवति–नो जायते ॥४०॥

( ४१ )

कुतः श्रीरोहिणीनगरी दर्शनीयेति चेत्तत्राह–तस्यामिति–

**तस्यां चैकं सुखमुडुपते ! धार्मिकाणां महीयो**
**यच्चैत्यानां शुचिरुचिमता–मस्ति पङ्क्तिव्यवस्था ॥**
**तन्मध्यस्थे न भवति पथि प्रस्थितानां प्रयासो**
**दूरादेव प्रणतशिरसां देवदेवप्रणामे ॥ ४१ ॥**

( अन्वयः ) उडुपते ! तस्यां धार्मिकाणाम् एकं महीयः सुखं यत् शुचिरुचिमतां चैत्यानां पङ्क्तिव्यवस्था अस्ति; तन्मध्यस्थे पथि दूरादेव प्रणतशिरसां प्रस्थितानां देवदेवप्रणामे प्रयासः न भवति ॥ ४१ ॥

( प्रकाशः ) उडुपते !–ग्रहेश !, तस्याम्–श्रीरोहिणीनगर्याम्, धार्मिकाणाम्–पुण्यभाजाम्, एकम्–अद्वितीयम्, महीयः–महत्तरम्, अतिशयेन महत् महीयः 'गुणाङ्गाद्वेष्ठेयसू' ।७।३।९। इतीयसुः, 'महतो महीयान्' इति श्रुतेः, सुखम्–शर्म, सौख्यमितियावत्, आस्ते, किं तत् ? इत्याह यदिति, यत्–यतः, शुचिरुचिमताम्–धवलकान्तिकलितानाम्, चैत्यानाम्–अर्हन्मन्दिराणाम्, चीयते चैत्यम् 'शिक्यास्या–' ( उणा॰ ३६४ ) इति ये साधुः, पङ्क्तिव्यवस्था–श्रेणिशृङ्खला, अस्ति–वर्तते, तन्मध्यस्थे पथि–चैत्यालीमध्यवर्तिमार्गे, दूरादेव–विप्र-

कृष्टादपि, दुनोति दुःखेन ईयते गम्यते वा दूरम् 'खुरक्षुर-' ( उणा० ३९६ ) इति रे निपात्यते, **प्रणतशिरसाम्**-अवनतमस्तकानाम्, विहितशिरोऽञ्जलिबद्धप्रणामानामिति यावत्, **प्रस्थितानाम्**-गच्छताम्, **देवदेवप्रणामे**-अर्हन्नमस्कारे, **प्रयासः**-प्रयत्नः, **न भवति**-नो जायते, । अनुप्रासः ॥४१॥

( ४२ )

जिनमन्दिरसमीपवर्तिवर्त्मनैव त्वयापि गन्तव्यमित्याह-**तेनैवेति**—

**तेनैवाथ त्वमपि विचरि-ष्यस्यवश्यं पथेन्दो !,**
**श्रद्धाशाली स्फुटमुभयत-श्चैत्यमालाश्रितेन ॥**
**नामं नामं जिनभगवता-माकृतीश्चैत्यसंस्थाः,**
**पश्यन्नेका-न्तरमवहितः सुष्ठु सव्यापसव्यम् ॥४२॥**

( अन्वयः ) अथ इन्दो ! श्रद्धाशाली अवहितः त्वमपि चैत्यसंस्थाः जिनभगवताम् आकृतीः नामं नामम् एकान्तरं सव्यापसव्यं सुष्ठु पश्यन् स्फुटम् उभयतः चैत्यमालाश्रितेन तेनैव पथा अवश्यं विचरिष्यसि ॥ ४२ ॥

( **प्रकाशः** ) **अथ**-अनन्तरम्, **इन्दो !**-चन्द्र !, **श्रद्धाशाली**-श्रद्धया शालते शोभते इति श्रद्धालुः, आस्तिक इति यावत्, **अवहितः**-अनन्यचेताः, **त्वमपि**-श्रीमानपि, **चैत्यसंस्थाः**-विहारनिहिताः, 'चैत्यविहारौ जिनसद्मनि' इति हैमः, **जिनभगवताम्**-वीतरागपरमात्मनाम्, **आकृतीः**-प्रतिमाः, आक्रियते व्यज्य-

तेऽनया जातिरित्याकृतिः ‘आकृतिस्तु जातौ रूपे वपुष्यपि’ इति हैमानेकार्थसङ्ग्रहः, **नामंनामम्**–नत्वानत्वा, **एकान्तरम्**–प्रत्यन्तरम्, ईषदीषद्दूरम्, **सव्यापसव्यम्**–वामदक्षिणभागम्, **सुष्ठु**–सम्यक्, **पश्यन्**–अवलोकमानः, **स्फुटम्**–प्रकाशम् ‘स्फुटे स्पष्टं प्रकाशम्’ इति हैमः, **उभयतः**–पार्श्वद्वयतः, **चैत्यमालाश्रितेन**–जिनप्रासादश्रेणीसंवलितेन, **तेनैव**–पूर्वप्रदर्शितेनैव, **पथा**–मार्गेण, **अवश्यम्**–नूनम्, **विचरिष्यसि**–विहरिष्यसि, ॥४२॥

( ४३ )

तत्रास्ति पण्याङ्गनानां प्राचुर्यमिति ततो दूरस्थितये सावधानीयति **एकमिति**—

**एकञ्चैत–द्वचनममलं मामकीनं न चित्ता–**
**दुत्तार्यं स्वी–कृतनिजसुहृ–त्कार्यसिद्धेर्निदानम् ॥**
**पण्यस्त्रीणा–मिह हि नगरे सन्निवेशो गरिया–**
**नास्ते तस्मा–द्धृतिमतिहरा–द्दूरमेवाभिगच्छेः ॥४३॥**

( अन्वयः ) मामकीनं स्वीकृतनिजसुहृत्कार्यसिद्धेर्निदानम् अमलम् एकम् एतद् वचनं चित्तात् न उत्तार्यम् इह हि नगरे पण्यस्त्रीणां गरीयान् सन्निवेशः आस्ते धृतिमतिहरात् तस्मात् दूरमेव अभिगच्छेः ॥ ४३ ॥

( **प्रकाशः** ) **मामकीनम्**–मदीयम्, ममेदं मामकीनम् ‘वा युष्मदस्मदो–’ ।६।३।६७। इति ईनम् ममकादेशश्च, **स्वीकृतनिजसुहृत् कार्यसिद्धेर्निदानम्**–निजसुहृदः कार्यम् तस्य सिद्धिः

स्वीकृता चासौ निजसुहृत्कार्यसिद्धिस्तस्याः, अङ्गीकृतस्वकीयमित्र-कर्तव्यनिष्पत्तेरादिकारणम्, 'निदानन्त्वादिकारणम्' इत्यमरः, **अमलम्**–निर्दुष्टम्, **एकम्**–अनन्यम्, **एतद्वचनम्**–पुरोऽभिधीय-मानं वचः, **चित्तात्**–अन्तःकरणतः, **न उत्तार्यम्**–नो बहिष्कार्यम्, किन्तदित्याह–**इह हि नगरे**–अमुष्मिन्नेव श्रीरोहिणीपुरे, **पण्यस्त्रीणाम्**–पण्येन स्त्री तासां गणिकानाम्, 'गणिका वेश्या पण्यपणाङ्गना' इति हैमः, **गरीयान्**–महीयान्, **सन्निवेशः**–संस्थानम्, निवास इति यावत्, 'संस्थानं संनिवेशः स्यात्' इति हैमः, **आस्ते**–वर्तते, **धृतिमतिहरात्**–धैर्यधिषणाविध्वंसकात्, **तस्मात्**–तत्स्थानात्, **दूरमेव**–अगोचरमेव, **अभिगच्छेः**–यायाः ॥४३॥

( ४४ )

अथ द्वाभ्यां तत्रत्यानां वाराङ्गनानां वर्णनं निरूपयति दोष-मुखेन काचिदिति—

**काचिन्नाग्याः श्रयति समतां भोगिलोकोपगूढा,**
**हन्त्री काचित् कलयति कलां तत्र किंपाकवल्ल्याः ॥**
**काचिद्गर्तां तुलयति युवभ्रंशहेतुः पणस्त्री,**
**काचिद्ध्यान्ध्य-प्रथननिपुणा याति वात्यासखीत्वम्॥**

( अन्वयः ) भोगिलोकोपगूढा काचित् नाग्याः समतां श्रयति, हन्त्री काचित् तत्र किम्पाकवल्ल्याः कलां कलयति, युवभ्रंशहेतुः काचित् पणस्त्री गर्तां तुलयति, ध्यान्ध्यप्रथननिपुणा काचित् वात्यासखीत्वं याति ॥४४॥

( प्रकाशः ) भोगिलोकोपगूढा–कामिजनाश्लिष्टा, काचित्–कापि वेश्या, नाग्याः–सर्पिण्याः, समताम्–सादृश्यम्, श्रयति–अनुकरोति, यथा नागी भोगि-( नाग )लोकोपगूढा तथेयमपीति भावः, 'भोगी भुजङ्गभुजगौ' इति हैमः, हन्त्री–विनाशयित्री, काचित्–काचन, तत्र–तासु वेश्यासु, 'सप्तमी चाविभागे निर्धारणे' ।२।२।१०९। इति सप्तमी, किम्पाकवल्ल्याः–महाकाललतायाः, कुत्सितः प्राणहरः पाकोऽस्य विषवृक्षत्वात् किम्पाकस्तस्य वल्ली तस्याः 'महाकालस्तु किम्पाकः' इति हैमः । कलां कलयति–समानतामाश्रयति, यथा रमणीव रमणीया समीचीनस्वादुरूपरससुरभिस्पर्शसमञ्चितफलभरभरिता किम्पाकनामधेया विषवल्लरी भवति परं तदीयफलभक्षणानन्तरमचिरेण चिरनिद्रां श्रयन्ति जनाः तथैवेयमपीत्याशयः । युवभ्रंशहेतुः–तरुणजनपतननिदानम्, काचित् पणस्त्री–कापि रूपाऽऽजीवा, 'पण्यपणाङ्गना.... रूपाजीवा' इति हैमः, गर्ताम्–परिखाम्, तुलयति–सदृशति, यथा गर्तापतितो नोद्धर्तुं प्रभवति तथाऽत्र पतितः पतित एव । ध्यान्ध्यप्रथननिपुणा–मतिमान्द्यविस्तारणपटुः, काचित्–काचन, वात्यासखीत्वम्–महावातमित्रताम्, वातानां समूहो वात्या 'पाशादेश्च ल्यः' ।६।२।२५। इति ल्यः, ल्त्वित्वात्स्त्रीत्वम्, याति–एति, यथा वातुलेनान्ध्यं भवति तथाऽनया ध्यान्ध्यं प्रसरतीति भावः ॥ ४४ ॥

( ४५ )

**काचित्तीक्ष्णै–र्नयनविशिखै–र्मर्म यूनां भिनत्ति,**
**नर्मालापै–र्हरति हृदयं काचिदाकूतहृद्यैः ॥**

**काचित्साचि-स्मितविकसितै-र्मोहयत्यल्पबुद्धीन्,**
**धैर्यं काचित् पटुकुचतटो-द्धाटनैर्लुण्टति द्राक् ॥४५॥**

( अन्वयः ) काचित् तीक्ष्णैः नयनविशिखैः यूनां मर्म भिनत्ति, काचित् आकूतहृद्यैः नर्मालापैः हृदयं हरति, काचित् साचिस्मितविकसितैः अल्पबुद्धीन् मोहयति, काचित् पटुकुचतटोद्धाटनैः द्राक् धैर्यं लुण्टति ॥ ४५ ॥

( प्रकाशः ) **काचित्**–काचन, **तीक्ष्णैः**–निशितैः, **नयनविशिखैः**–अक्षिशरैः, कटाक्षशरसन्धानैरितियावत्, **यूनाम्**–वयःस्थानाम्, 'वयस्थस्तरुणो युवा' इति हैमः, **मर्म**–सन्धिस्थानम्, **भिनत्ति**–विदारयति, **काचित्**–कापि, **आकूतहृद्यैः**–मनोहारिभावैः 'आकूतं मतभावाशया अपी'ति हैमः, **नर्मालापैः**–परीहासोक्तिभिः, **हृदयम्**–मानसम्, **हरति**–आकर्षयति, **काचित्**–काचन, **साचिस्मितविकसितैः**–तिर्यगीषद्धासविकासैः, **अल्पबुद्धीन्**–मन्दमतीन्, **मोहयति**–आवर्जयति, **काचित्**–कापि, **पटुकुचतटोद्धाटनैः**–स्फुटस्तनप्रदेशप्रदर्शनैः, **द्राक्**–शीघ्रम्, **धैर्यम्**–चित्तस्थैर्यम् 'स्थिरचित्तोन्नतिर्या तु तद्धैर्यमिति गीयते' इत्युक्तेः, 'मनसो निर्विकारत्वं धैर्यं सत्स्वपि हेतुषु' इत्युक्तमनोविकाराभावम्, **लुण्टति**–अपहरति ॥

( ४६ )

एतादृशवेश्यावासतो दूरगमनं श्रेयस इति भूयोभूयः कथयतीन्दुं तस्मादिति ।

**तस्मादासां युवजनपृष-द्रागुराणामवश्यं,**
**दूरात्त्यागो भवति हि नृणां श्रेयसेऽमुत्र चात्र ॥**

**तत्राप्यङ्गी-कृतनिजसुहृ-द्व्याहृतेस्त्वादृशस्य,**
**व्यासङ्गो नो-चित इति हितं द्विस्त्रिरेतद्वदामि ॥४६॥**

( अन्वयः ) तस्मात् युवजनपृषद्वागुराणाम् आसां दूरात्यागः नृणाम् अमुत्र अत्र च श्रेयसे हि अवश्यं भवति, तत्रापि अङ्गीकृतनिजसुहृद्व्याहृतेः त्वादृशस्य व्यासङ्गः नोचितः इति एतत् हितं द्विस्त्रिः वदामि ॥ ४६ ॥

( प्रकाशः ) **तस्मात्**-तत्कारणात्, पूर्वोदितनिखिलदोषग्रहग्रस्तत्वादितियावत्, **युवजनपृषद्वागुराणाम्**-युवजनश्चासौ पृषत् तस्य वागुराणाम्, तरुणनरहरिणपाशकानाम्, 'पृषन्मृगे पुमान्' इति मेदिनी, वान्ति पतन्ति मृगा अस्यां वागुरा मृगबन्धनरज्जुः 'श्वशुर-' ( उणा० ४२६ ) इत्युरे निपात्यते 'वागुरा मृगजालिके'ति हैमः, **आसाम्**-वाराङ्गनानाम्, **दूरात्**-विप्रकृष्टात्, **त्यागः**-वर्जनम्, **नृणाम्**-मनुष्याणाम्, 'नुर्वा' ।१।४।४८। इति वैकल्पिकदीर्घविधानेन नात्र दीर्घता, **अमुत्र**-प्रेत्य, परलोके इतियावत्, अमुष्मिन् अदसः सप्तम्यन्तात् 'सप्तम्याः' ।७।२।९४। इति त्रपि 'आद्वेरः' ।२।१।४१। इत्यत्त्वे 'मोऽवर्णस्य' ।२।१।४५। इतिमत्वे 'मादुवर्णोऽनु' ।२।१।४७। इत्युत्वे अमुत्र, 'प्रेत्यामुत्र भवान्तरे' इति हैमः, यथा 'अमुत्र भविता यत्ते तच्चिन्तय शुभाशुभम्'। **अत्र च**-इहलोके च, **श्रेयसे हि**-कल्याणायैव, **अवश्यं भवति**-खलु सम्पद्यते, **तत्रापि**-तस्मिन्नपि, **अङ्गीकृतनिजसुहृद्व्याहृतेः**-निजसुहृदो व्याहृतिः अङ्गीकृता निजसुहृद्व्याहृतिर्येन तस्य, स्वीकृतस्वीयस्नेहिसन्देशस्य, **त्वादृशस्य**-भवादृशस्य,

व्यासङ्गः–आसक्तिः, स्वीयकार्यत्यागेनान्यत्र बद्धचित्ततेतियावत्, नोचितः–न साम्प्रतम्, इति–अस्मात्कारणात्, एतत् हितम्–इदं श्रेयोवचनम्, द्विस्त्रिः–द्वित्रिवारम्, 'द्वित्रिचतुरः सुच्' ७।२।११०। इति सुच्, वदामि–निवेदयामि ॥ ४६ ॥

( ४७ )

श्रीरोहिणीपुरीतोऽदूर एवार्बुदाचलस्तं द्रष्टुमाह–तस्या इति ।

**तस्याः पुर्या भवति पुरतो नातिदूरेऽर्बुदाद्रि-**
**र्द्रष्टव्योऽसौ तरुपरिवृतोऽदभ्रमभ्रङ्कषाग्रः ॥**
**नादैर्गीतै-रिव जनमनां-स्याहरन् कीचकानां,**
**गन्धर्वाणा-मिव नवमरु-च्चालनाद् घूर्णमानैः ॥४७॥**

( अन्वयः ) तस्याः पुर्याः पुरतः नातिदूरे तरुपरिवृतः अभ्रङ्कषाग्रः गन्धर्वाणां गीतैरिव नवमरुच्चालनाद् घूर्णमानैः कीचकानां नादैः जनमनांसि आहरन् इव अर्बुदाद्रिः भवति असौ अदभ्रं द्रष्टव्यः ॥ ४७ ॥

(प्रकाशः) तस्याः पुर्याः—श्रीरोहिणीनगर्याः, पुरतः–अग्रे, नातिदूरे–निकटे, योजनत्रयमात्रव्यवहिते इतियावत्, तरुपरिवृतः–शाखिसमञ्चितः, अभ्रङ्कषाग्रः–अभ्रं गगनं कषति अभ्रङ्कषम् अग्रं यस्य सः अभ्रङ्कषाग्रः 'कूलाभ्रकरीषात्कषः' ।५।१।११०। इति खः खित्त्वान्मः, अम्बरतलस्पर्शिशिखरः, गन्धर्वाणाम्–देव-गायनानाम्, 'हाहादयस्तु गन्धर्वा गान्धर्वा देवगायनाः' इति हैमः, गीतैरिव–गेयैरिव, नवमरुच्चालनाद्–मन्दमन्दपवनप्रक-

म्पनात्, **घूर्णमानैः**–आन्दोलयद्भिः, विचितरङ्गन्यायेन संसरद्भिः, **कीचकानां नादैः**–वंशविशेषाणां स्वनैः, 'कीचका वेणवस्ते स्यु-र्ये स्वनन्त्यनिलोद्धताः' इत्यमरः, **जनमनांसि**–लोकहृदयानि, **आहरन्निव**–आकर्षयन्निव, **अर्बुदाद्रिः**–अर्बुदाचलः, **भवति**–वर्तते, **असौ**–सोऽयम्, **अदभ्रम्**–अतिशयम्, भूरीतियावत् 'भूर्य-दभ्रं पुरुस्फिर' मिति हैमः। **द्रष्टव्यः**–निरीक्षणीयः, त्वयेतिशेषः, उत्प्रेक्षानुप्रासौ ॥ ४७ ॥

( ४८ )

तत्रेन्दोः कृशाङ्गं कुरङ्गं चारयितुं प्रेरयति–शृङ्ग इति—

**शृङ्गेऽमुष्यो-न्नतिभृति सर-स्तीरभूमिप्ररूढान्,**
**दूर्वाङ्कुरान् किल कवलयि-ष्यत्यसौ ते कुरङ्गः।**
**भूयःकाल-क्षुदुदयकृश-श्चारणीयोऽयमिन्दो!**
**सम्मिश्राम्भो-भरतृणतति-र्दुर्लभा खेऽटतोऽस्य।४८।**

( अन्वयः ) असौ ते कुरङ्गः उन्नतिभृति अमुष्य शृङ्गे सर-स्तीरभूमिप्ररूढान् दूर्वाङ्कुरान् किल कवलयिष्यति इन्दो! भूयःकालक्षुदुदयकृशः अयं चारणीयः (यतः) खे अटतः अस्य सम्मिश्राम्भोभरतृणततिः दुर्लभा ॥ ४८ ॥

( **प्रकाशः** ) **असौ**–प्रत्यक्षदृश्यमानः, **ते**–तव, **कुरङ्गः**–कौ रङ्गतीति कुरङ्गः, सारङ्गः, **उन्नतिभृति**–अत्युन्नते, **अमुष्य**–अर्बुदा-चलस्य, **शृङ्गे**–शिखरे, **सरस्तीरभूमिप्ररूढान्**–सरोवरतटभूभागो-त्पन्नान्, **दूर्वाङ्कुरान्**–हरिततृणप्ररोहान्, **किल**–खलु, **कवल-**

**यिष्यति**–अत्स्यति, **इन्दो !**–चन्द्र !, **भूयःकालक्षुदुदयकृशः**–चिरसमयबुभुक्षाप्रादुर्भावदुर्बलः, क्षुधाक्षामकुक्षिरितियावत्, **अयम्**–हरिणः, **चारणीयः**–यथाकामं भोजनीयः, कुत इत्याकाङ्क्षायामाह–**सम्मिश्रेति** यतः **खे**–गगने, **अटतः**–परिभ्रमतः, **अस्य**–मृगस्य, **सम्मिश्राम्भोभरतृणततिः**–सनीरनीवारनिचयः, **दुर्लभा**–दुष्प्राप्या, कदाचित् प्रचण्डपवनप्रेरितं शुष्कतृणमाप्नुयात् परं सलिलसम्मिश्रस्य तस्यासम्भव एव गुरुत्वात्तावदूर्ध्वमसम्भावितगतेः। उत्प्रेक्षा ॥ ४८ ॥

( ४९ )

तत्रत्यनिकुञ्जवर्णनम्–कूजद्भिरिति ।

**कूजद्भिर्ये श्रुतिसुखकराः कोकिलैर्मल्लिकाना–**
**मामोदैश्च प्रसृमरतरैः प्राणिनो मोदयन्ति ।**
**उद्गच्छद्भि–र्नवनवतृणै–र्वर्य्यवैडूर्य्यबद्ध–**
**क्षोणीपीठा इव विदधते शं निकुञ्जा द्रुमाणाम् ॥४९॥**

( अन्वयः ) **ये कूजद्भिः कोकिलैः श्रुतिसुखकराः मल्लिकानां च प्रसृमरतरैः आमोदैः प्राणिनः मोदयन्ति ( ते ) द्रुमाणां निकुञ्जाः वर्य्यवैडूर्य्यबद्धक्षोणीपीठा इव उद्गच्छद्भिः नवनवतृणैः शं विदधते** ॥ ४९ ॥

**( प्रकाशः )** ये–तत्पर्वतवर्तिनः, **कूजद्भिः कोकिलैः**–कूजनं कुर्वद्भिः परपुष्टैः, **श्रुतिसुखकराः**–श्रवणानन्दप्रदाः; **मल्लिकानाम्**–विचकिलानाम्, 'मल्लिका स्याद्विचकिलः' इति हैमः, **प्रसृमरतरैः**–

विशेषविस्तारमापन्नैः, 'सृघस्यदो मरक्' ।५।२।७३। इति मरक् प्रस्मरः, आमोदैः-सुगन्धैः, प्राणिनः-सचेतनान्, मोदयन्ति-सन्तोषयन्ति, एतत्तु तत्र सर्वदा भवति परन्तु अधुना वर्षाकाले ते द्रुमाणां निकुञ्जाः-तरूणां कुडङ्गाः, वर्य्यवैडूर्य्यबद्धक्षोणीपीठा इव-श्रेष्ठवैडूर्य्याख्यनीलमणिविशेषखचितपृथ्वीपीठवत्, उद्गच्छद्भिर्नवनवतृणैः-प्रादुर्भवद्भिर्नूतननूतननीवारैः, शं-सुखम्, सुषमाम्, विदधते-प्रकुर्वन्ते। यथा वैडूर्य्यमणिनिबद्धसिंहासनाऽवस्थानं भवति प्रमोदाय तथा हरिततृणास्तरणाच्छादितभूप्रदेशोपवेशनमपि। उपमा।

( ५० )

अतिगहनेऽस्मिन् पर्वते लघीयाँस्ते मृगः पथभ्रष्टो मास्म भवत् प्रहतचैतन्यश्च न च स्यात्ते तदन्वेषणजनितविलम्ब इत्याह सूक्तद्वयं तेष्विति—

**तेषूच्चैर्मा-स्मभवदभितः स्वर्वधूप्रस्तुतैस्तै-**
**र्वीणानादै-रपहृतमना दूरकृष्टो मृगस्ते ।**
**मा भूत्खेद-स्तदनु च तद-न्वेषणे वा विलम्बो,**
**गन्तुं त्यक्त्वाऽऽश्रितमणुमपि त्वादृशा नोत्सहन्ते ।५०।**

( अन्वयः ) तेषु उच्चैः अभितः स्वर्वधूप्रस्तुतैः तैः वीणानादैः अपहृतमनाः ते मृगः दूरकृष्टः मास्मभवत्, तदनु च तदन्वेषणे ( तव ) खेदः विलम्बो वा माभूत्, ( यतः ) त्वादृशा अणुमपि आश्रितं त्यक्त्वा गन्तुं नोत्सहन्ते ॥ ५० ॥

( प्रकाशः ) तेषु-श्रीअर्बुदाचलीयकुडङ्गेषु, उच्चैः-उच्चै-

स्तराम् अतिगहनाग्रेतनभाग इति यावत्, **अभितः**—समन्ततः, सर्वदिक्षु इति भावः, **स्ववधूप्रस्तुतैः**—देवाङ्गनागीतैः, **तैः**—प्रसिद्धैः, **वीणानादैः**—घोषवतीनिर्घोषैः, 'वीणा पुनर्घोषवती' इति हैमः, **अपहृतमनाः**—आकर्षितहृदयः, **ते मृगः**—तव सारङ्गः, **दूरकृष्टः**—विप्रकृष्टहृतः, **मास्मभवत्**—नो भवतु, 'सस्मे ह्यस्तनी च' ।५।४।४०। इति ह्यस्तनी 'अड्धातो' ।४।४।२९। इत्यडभावः, मास्मभवत्, **तदनु च**—तदनन्तरन्तु, **तदन्वेषणे**—तच्छोधने, तव **खेदः**—क्लेशः, **विलम्बो वा**—अथवा प्रतीक्षा, अतिकाल इतियावत्, **माभूत्**—मास्म जायत, यतः **त्वादृशाः**—भवदनुरूपाः, **अणुमपि**—लघीयांसमपि, **आश्रितम्**—स्वसन्निहितम्, नैजमिति भावः, **त्यक्त्वा**—विहाय, **गन्तुम्**—प्रयातुम, **नोत्सहन्ते**—नैव सज्जा भवन्ति ॥५०॥

( ५१ )

**तस्मात् स्वस्मान् नयनविषया-न्नायमत्यन्तदूरं,**
**गन्तुं सह्यो नवघनतृणा-स्वादविक्षिप्तचेताः ॥**
**यन्निर्मग्ना अपि करिवरा अर्बुदाद्रेः कुडङ्गे-**
**ष्वप्राणाः स्यु-र्बहलविटपि-ष्वन्यजन्तोः कथा का ? ॥**

( अन्वयः ) तस्मात् स्वस्मात् नयनविषयात् नवघनतृणा-स्वादविक्षिप्तचेताः अयम् अत्यन्तदूरं गन्तुं सह्यः न, यत् बहलविटपिषु अर्बुदाद्रेः कुडङ्गेषु निर्मग्नाः करिवराः अपि अप्राणाः स्युः ( तदा ) अन्यजन्तोः का कथा ? ॥ ५१ ॥

**( प्रकाशः ) तस्मात्**—उक्तवक्ष्यमाणकारणात्, **स्वस्मात् नयनविषयात्**—निजलोचनगोचरतः, **नवघनतृणास्वादविक्षिप्त-**

चेताः—प्रत्यग्रप्रचुरघासलेहनोन्मत्तमानसः, अयम्—असौ मृगः, अत्यन्तदूरम्—अतिशयविप्रकृष्टम्, गन्तुम्—गमनाय, सह्यः—सोढव्यः, न—नैव, निजाक्षिसमक्षमेव चारणीयः परं न दृष्टिपथबहिर्भूतः करणीय इति भावः, यत्—यस्मात् कारणात्, बहलविटपिषु—नीरन्ध्रवृक्षेषु, 'नीरन्ध्रं बहलं दृढम्' इति हैमः, अर्बुदाद्रेः—अर्बुदाचलस्य, कुडङ्गेषु—निकुञ्जेषु, निर्मग्नाः—निपतिताः, करिवराः अपि—हस्तिश्रेष्ठा अपि, अप्राणाः—नष्टचैतन्याः, स्युः—भवेयुः, तदा अन्यजन्तोः—इतरप्राणिनः, हस्तिव्यतिरिक्तक्षुद्रचेतसाम्, का कथा?—वार्तैव का? नेहातिशयोक्तिः शङ्क्या तस्य तादृशगहनत्वात् ॥५१॥

( ५२ )

यत्र चण्डरोचीरोचिषामप्यप्रवेशस्तद्गहनतायां किमु वक्तव्यमित्याह यद्यपीति—

**यद्यप्येत-द्घनघनगतं नान्धकारं करास्ते,**
**हन्युर्माभू-त्तदपि हि भवान् स्वे मृदुत्वे विषण्णः।**
**यत्रोष्णांशो-रपि खरकराः कुण्ठतामाश्रयन्तेऽ-**
**नङ्गक्रीडा-सदसि दिविषत्-पुँश्चलीनां दिवापि ॥५२॥**

( अन्वयः ) यद्यपि ते कराः एतद्घनवनगतम् अन्धकारं न हन्युः तदपि भवान् स्वे मृदुत्वे विषण्णः माभूत्, हि यत्र दिविषत्पुँश्चलीनाम् अनङ्गक्रीडासदसि दिवापि उष्णांशोरपि खरकराः कुण्ठताम् आश्रयन्ते ॥ ५२ ॥

( प्रकाशः ) यद्यपि—यदपि, ते कराः—शीतरश्मेस्ते रश्मयः,

**एतद्घनवनगतम्**–अदःसान्द्रगहनस्थितम्, **अन्धकारम्**–तिमिरम्, **न हन्युः**–नहि प्रणाशयेयुः, **तदपि**–तथापि, **भवान्**–श्रीमान्, **स्वे मृदुत्वे**–आत्मीयकोमलतायाम्, **विषण्णः**–खिन्नः, **माभूत्**–न जातु जायताम्, **हि**–यतः, **यत्र**–यस्मिन्, **दिविषत्पुँश्चलीनाम्**–स्वर्वेश्यानाम्, **अनङ्गक्रीडासदसि**–मदनविनोदमन्दिरे, **दिवापि**–अहन्यपि, **उष्णांशोरपि**–चण्डरोचिषोमार्तण्डस्यापि, **खरकराः**–तीक्ष्णदीधितयः, **कुण्ठताम्**–मदन्ताम्, विफलतामितियावत्, **आश्रयन्ते**–प्राप्नुवन्ति, यत्र प्रचण्डप्रतापभानवीयभानूनामप्यप्रवेशस्तत्र तव किरणानामप्रवेशो न शोचनीयतेत्याशयः ॥५२॥

( ५३ )

अथ सूक्तषट्केन तत्रत्यचैत्यजातं सव्यतिकरं सकटाक्षं वर्णयति तत्रेति–

**तत्र श्रीमान् विमलवसतौ भाति नाभेयदेवः,**
**सेवायात-त्रिदशनिकरः पूर्णपादोपकण्ठः ॥**
**नेमिस्वामी दिशति च शिवा-न्याननतानां निविष्टः,**
**साक्षादिन्द्रा-लय इव वरे वस्तुपालस्य चैत्ये ॥५३॥**

( अन्वयः ) तत्र विमलवसतौ सेवायातत्रिदशनिकरः पूर्णपादोपकण्ठः श्रीमान् नाभेयदेवः भाति, च साक्षात् इन्द्रालये इव वरे वस्तुपालस्य चैत्ये निविष्टः नेमिस्वामी आनतानां शिवानि दिशति ॥ ५३ ॥

( **प्रकाशः** ) **तत्र**–अर्बुदाचले, **विमलवसतौ**–श्रेष्ठिविमल-

मन्त्रिनिर्मापितमहामन्दिरे, **सेवायातत्रिदशनिकरः**–प्रतिपत्त्यर्थमागतसुरसमूहः, यस्य प्रभोः पूजायै देवा अपि आगच्छन्तीतिभावः **पूर्णपादोपकण्ठः**–पूर्णं पादस्योपकण्ठं समीपं यस्य सः,व्याप्तचरणसमीपः, सर्वदा शतशो जनास्तत्र मन्दिरे प्रभुपार्श्वे तिष्ठन्तीत्याशयः। **श्रीमान् नाभेयदेवः**–नाभिनन्दनश्रीऋषभदेवप्रभुः, **भाति**–विराजते, च–पुनः **साक्षादिन्द्रालय इव**–प्रत्यक्षदेवराजसदने यथा, **वरे**–प्रधाने, **वस्तुपालस्य चैत्ये**–मन्त्रिप्रवरश्रीवस्तुपालसम्पादिताहॅन्मन्दिरे, श्रीलुणीगवसताविति यावत्, 'चैत्यविहारौ जिनसद्मनि' इति हैमः, **निविष्टः**–प्रतिष्ठितः, **नेमिस्वामी**–शिवासुतः श्रीनेमिनाथजिनः, **आनतानाम्**–प्रणतानाम्, प्राणिनामिति शेषः, **शिवानि**–मङ्गलानि, श्रेयांसीति यावत्, **दिशति**–वितरति, सम्पादयतीति भावः ॥ ५३ ॥

( ५४ )

**रूप्यस्वच्छो-पलदलमयौ चित्रदोत्कीर्णचित्रौ,**
**चञ्चच्चन्द्रो-दयचयचितौ कल्पितानल्पशिल्पौ ॥**
**जीयास्तां तौ विमलनृपते-र्वस्तुपालस्य चोच्चौ,**
**प्रासादौ तौ स्थिरतरयशो-रूपदेहाविव द्वौ ॥ ५४ ॥**

( अन्वयः ) रूप्यस्वच्छोपलदलमयौ, चित्रदोत्कीर्णचित्रौ, चञ्चच्चन्द्रोदयचयचितौ, कल्पितानल्पशिल्पौ, विमलनृपतेः वस्तुपालस्य च उच्चौ तौ द्वौ प्रासादौ तौ स्थिरतरयशोरूपदेहाविव जीयास्ताम् ॥ ५४ ॥

**( प्रकाशः )** **रूप्यस्वच्छोपलदलमयौ**–रजतकल्पधवला-

श्मखण्डरूपौ, 'आरस' पदवाच्यपाषाणसम्पादिताविति यावत्, चित्रदोत्कीर्णचित्रौ—आश्चर्यदायिचित्रकरोल्लिखितालेख्यौ, तत्र तत्र मन्दिरे विशिष्टपाषाणे विविधमनोविनोददा अद्भुताकृतय उल्लिखिताः सन्तीतियावत्, चश्चच्चन्द्रोदयचयचितौ—देदीप्यमानवितानविशेषविस्तारविभूषितौ, 'अथोल्लोचो वितानं कदकोऽपि च। चन्द्रोदये' इति हैमः, कल्पितानल्पशिल्पौ—सम्पादितभूरिचित्रविशेषौ, विमलनृपतेर्वस्तुपालस्य च—नरवृषभश्रेष्ठिश्रीविमलमन्त्रिमन्त्रिवरश्रीवस्तुपालयोः, उच्चौ—गगनाङ्गणगतौ, उच्चैस्तराविति यावत्, तौ—विश्वविश्रुतौ, द्वौ प्रासादौ—द्विसङ्ख्यविहारौ, तौ स्थिरतरयशोरूपदेहाविव—तत्प्रसिद्धपुरुषद्वयस्य चिरस्थायिवर्णवादस्वरूपशरीराविव, जीयास्ताम्—चिरं विजयेताम् ॥ ५४ ॥

( ५५ )

**एषा भूमि-र्विमलविभुना ब्राह्मणेभ्यो गृहीना,**
**चैत्यं कर्तुं रिपसुरजिता रूप्यमास्तीर्य विष्वक् ॥**
**ऐतिह्यानि त्वमिति जरतां कुर्वतां मित्रगोष्ठीं,**
**तत्र श्रोष्य-स्यनुसृतभव-च्चन्द्रिकाणां मुखेभ्यः ॥५५॥**

(अन्वयः) रिपुसुरजिता विमलविभुना चैत्यं कर्तुम् एषा भूमिः विष्वक् रूप्यम् आस्तीर्य ब्राह्मणेभ्यः गृहीता, इति ऐतिह्यानि त्वम् अनुसृतभवच्चन्द्रिकाणां मित्रगोष्ठीं कुर्वतां जरतां मुखेभ्यः श्रोष्यसि ॥ ५५ ॥

(प्रकाशः) रिपुसुरजिता—प्रासादोपद्रवकारिमिथ्यादृग्गतिक्रूरवीरनाथनामकदुष्टदेवविजेत्रा, इदमत्रैदम्पर्यं पठ्यते हि विमल-

प्रबन्धादिषु, कश्चिद्- वीरनाथनामा क्षेत्रपालः क्रूरदेवो विमलमन्त्रि-विधीयमानप्रासादस्य विध्वंसनाय षण्मासानुपद्रवं कृतवान्, दिवा सूत्रधारैः प्रासादश्चायं चायं यावदुच्छ्रुतीं नीयते नक्तं तावत् सर्वं वीरनाथेनाधमसुरेण पात्यते, एवं षण्मास्यां जातायां खिन्नेषु सूत्रधारादिषु वीरतैकशिरोमणिर्भीमभूपतिप्रदत्तराजोपपदः समाराधिततत्क्षेत्राधिष्ठाञ्यम्बादेवीदत्तसाहाय्यको विमलनामा मन्त्रीशः षण्मास्यन्ते ' उद्यमः साहसं धैर्यं, बलं बुद्धिपराक्रमौ। षडेते यस्य विद्यन्ते, तस्माद्देवोऽपि शङ्कते ॥ ' इति कृतनिश्चयः साहसैकसेवधी रजन्यां गृहीतखड्गः प्रदीपपृष्ठिस्थित उपद्रवायायान्तं तं प्रचण्डवीर्यनादेन हक्कारितवाँस्ततो भीतोऽसौ भीमपराक्रमोऽतिक्रूरोऽपि वीरनाथो वराकीभूय स्थितवान्, विमलेन च बलिदानाद्युक्तिपूर्वमाश्वासितोऽम्बादेवीं शरणीकृत्य तया सम्बोधितो धृतिमापेति स रिपुसुरजित् इति प्रोच्यते। **विमलविभुना**-नरपतितुल्यमन्त्रिवरश्रीविमलश्रेष्ठिना, चैत्यं **कर्तुम्**-विहारं विधातुम्, **एषा भूमिः**-असौ पृथ्वीप्रदेशः, अधुना यत्र मन्दिरमास्ते तदधस्तनी भूमिः, **विष्वक्**-परितः, **रूप्यम्**-रजतम्, **आस्तीर्य**-आच्छाद्य, **ब्राह्मणेभ्यः**-विप्रेभ्यः, ब्रह्मणोऽपत्यं ब्राह्मणः ' ङसोऽपत्ये ' ।६।१।१८। इत्यणि ' जातौ ' ।७।४।५८। इत्यत्रानपत्य एवेति नियमात् ' अवर्मणोऽमनो-' ।७।४।५९। इत्यन्तस्वरादिलोपो न भवति, ब्रह्म-अणति वा पृषोदरादित्वात्, **गृहीता**-अङ्गीकृता, यत्र हि चैत्यसम्पादनाय निर्णयः कृतः सा भूमिर्भूदेवायत्ताऽऽसीत्, महता यत्नेन नवीनचतुष्कोणरूप्यमुद्रामा-

स्तीर्य तेभ्यः सा स्वीकृतेति, **इति ऐतिह्यानि**-एवं विधानि इतिहाससम्बन्धिवृत्तानि, **तत्र**-अर्बुदाचले, **त्वम्**-श्रीमान्, **अनुसृतभवच्चन्द्रिकाणाम्**-प्रसृतश्रीमज्ज्योत्स्नानाम्, येषां वदनाद्युपरि शशिकिरणकलापो निपतति तेषामितिभावः, **मित्रगोष्ठीम्**-सुहृद्विनोदवार्ताम्, **कुर्वताम्**-विदधताम्, **जरताम्**-स्थविराणाम्, 'वृद्धः प्रवयाः स्थविरो जरन्' इति हैमः, **मुखेभ्यः**-वदनेभ्यः, **श्रोष्यसि**-आकर्णयिष्यसि ॥५५॥

( ५६ )

**द्रष्टव्यः स्या-दयमपि सखे ! भीमसाधोर्विहार-**
**स्तार्तीयीक-स्त्रिदशसदन-स्फारगर्वापहश्रीः ॥**
**एवं चैत-त्रिभुवनमति-क्रम्य शोभाविशेषैः,**
**प्रासादाना-मिह समुदितं प्रीतिगोष्ठ्यै त्रिकं किम् ।**

( अन्वयः ) सखे ! अयं तार्तीयीकः त्रिदशसदनस्फारगर्वापहश्रीः भीमसाधोः विहारः अपि द्रष्टव्यः स्यात्, एवं च इह शोभाविशेषैः, त्रिभुवनम् अतिक्रम्य प्रासादानां त्रिकं प्रीतिगोष्ठ्यै समुदितं किम् ॥ ५६ ॥

( प्रकाशः ) **सखे !**-मित्र ! **अयम्**-पुरा दृश्यमानः, **तार्तीयीकः**-तृतीयः, ' त्रेस्तृ च ' ।७।१।१६६। इति तीयः त्रेस्तृ च ' **तीयाट्टीकण्-** ' ।७।२।१५३। इति तीयान्ताट्टीकण् तार्तीयीकः, **त्रिदशसदनस्फारगर्वापहश्रीः**-अमरभवनचञ्चदहङ्कारविनाशकलक्ष्मीः, प्रासादस्यास्य समृद्धिसमीपे देवालयमपि हीनप्रभमितिभावः **भीमसाधोः**-साहुकारश्रीभीमजीनामश्राद्धश्रेष्ठश्रेष्ठि-

वरस्य, **विहारः**–चैत्यम्, **अपि**–पुनः, **द्रष्टव्यः**–निरीक्षणीयः, **स्यात्**–भवेत्, **एवं च इह**–इत्थमत्र, **शोभाविशेषैः**–रामण्यभेदैः, अतिशयकान्तिभिः, **त्रिभुवनम्**–जगत्रयम्, **अतिक्रम्य**–अतीत्य, **प्रासादानां त्रिकम्**–जिनसदनत्रितयम्, **प्रीतिगोष्ठ्यै**–स्नेहसभायै, गावो नानोक्तयस्तिष्ठन्त्यस्यां गोष्ठी, स्थादित्वात् के 'गोऽम्बा–' ।२।३।२०। इतिषत्वम्, **समुदितं किम्?**–एकत्रीभूतं किम् । उत्प्रेक्षा।

( ५७ )

**आस्ते चैत्यं खरतरकृतं नातिदूरे यदेषां,**
**तत्रोत्तुङ्गे चतसृषु दिशा–स्वर्हतो वन्दमानः ॥**
**साक्षाद्दृष्टं समवसरणं यद्विदेहावनीषु,**
**तत्संस्कारो–दयसहकृतं संस्मरिष्यस्यवश्यम् ॥५७॥**

( अन्वयः ) एषां नातिदूरे खरतरकृतं यत् चैत्यम् आस्ते तत्र उत्तुङ्गे चतसृषु दिशासु अर्हतो वन्दमानः ( त्वम् ) विदेहावनीषु यत् समवसरणं साक्षात् दृष्टं संस्कारोदयसहकृतं तत् अवश्यं संस्मरिष्यसि ॥ ५७ ॥

( **प्रकाशः** ) **एषाम्**–पुरोदितजिनप्रासादत्रयाणाम्, **नातिदूरे**–न बहुविप्रकष्टे, निकट इतियावत्, **खरतरकृतम्**–खरताराभिधगच्छानुयायिभिः सम्पादितम्, **यत् चैत्यम्**–यद्विहारः, **आस्ते**–वर्तते, **तत्र उत्तुङ्गे**–अत्युन्नते तस्मिन्, **चतसृषु दिशासु**–चतुर्दिक्षु, **अर्हतो वन्दमानः**–जिनेश्वरान्नमस्यमानस्त्वम्, **विदेहावनीषु**–महाविदेहभूमिषु, **यत् समवसरणम्**–यत् जिनेश्वरप्रभोः देशनास्थानम्, **साक्षात् दृष्टम्**–प्रत्यक्षीकृतम्, **संस्कारोदयसहकृतम्**–

उद्बुद्धसंस्कारसहचरम्, तत्–तत्समवसरणम्, अवश्यम्–नूनम्, संस्मरिष्यसि–स्मृतिगोचरमापादयिष्यसि, अयमाशयः–हे चन्द्र । तत्र तेषां मन्दिराणामनतिदूरे समवसणसदृशं खरतरानुयायिकृतमेकमास्ते मन्दिरम्, तद्दर्शनेन तत्र पूर्वं महाविदेहक्षेत्रे साक्षात्समवसरणदर्शनजनितसंस्कार उद्बुद्धो भविष्यसि एकसम्बन्धिज्ञानमपरसम्बन्धिनं स्मारयतीति, एतादृशमेव मया तत्र दृष्टमासीदिति स्मरणमप्यस्य दर्शनेन ते मनसि जनिष्यतीति । स्मरणालङ्कृतिः ॥ ५७ ॥

( ५८ )

**अन्ये चात्रा–मृतकर ! हरि–द्वाससां ये विहारा,**
**द्रष्टव्यास्ते न खलु भवता तत्र वन्द्या जिनार्चाः ॥**
**दिग्वे(क्चै)लानां कटुकमतिनां द्रव्यलिङ्गस्पृशां य–**
**त्राहद्बिम्बं सुविहितमुने–र्वासयोगं विनाऽर्च्यम् ॥५८॥**

( अन्वयः ) अमृतकर ! अत्र च हरिद्वाससाम् अन्ये ये विहाराः ते द्रष्टव्याः भवता तत्र जिनार्चाः न खलु वन्द्याः यत् दिग्वे(क्चै)लानां कटुकमतिनां द्रव्यलिङ्गस्पृशाम् अर्हद्बिम्बं सुविहितमुनेः वासयोगं विना अर्च्यं न ॥ ५८ ॥

( प्रकाशः ) अमृतकर !–अयि सुधाकर !, अत्र च–अस्मिन्नर्बुदाचले, हरिद्वाससाम्–दिगम्बराणाम्, अन्ये ये–इतरे यावन्तः, विहाराः–चैत्यानि सन्तीति शेषः, ते–दिगम्बरजिनमन्दिराणि, द्रष्टव्याः–निरीक्षणीयाः, भवता–श्रीमता, तत्र–तस्मिन् चैत्ये, जिनार्चाः–अर्हत्प्रतिमाः, 'अर्चा तु प्रतेर्मा–' इति हैमः, न खलु–

नैव, वन्द्याः-प्रणमनीयाः, अस्मत्प्रगुरुगुरुश्रीविजयदानसूरीश्वरप्रसादितजल्पपट्टकविवरणात्मके जगद्गुरुश्रीविजयहीरसूरीश्वराज्ञप्तवादपट्टके स्पष्टं तत्प्रतिषेधात्। यत्-यतः, दिग्वेलानाम्-दिगेव वेला-मर्यादा येषान्ते तेषाम् उपलब्धमुद्रितपुस्तकस्थदृश्यमानपाठानुसारेण, दिक्चैलानामिति यदि पाठः स्यात्तदा स्पष्टमेव, आशाम्बराणाम्, दिक्पटकपटकुपथनिपतितानामिति यावत्, **कटुकमतिनाम्**-कटुका-(कडुआ)भिधमतविशेषाणाम्, कटुकमतकदाग्रहग्रहग्रहिलानामिति यावत्, **द्रव्यलिङ्गस्पृशाम्**-नाममात्रमुनिवेषधारिणाम्, **अर्हद्बिम्बम्**-तत्तद्विहितदुर्विधिविधाना जिनमूर्त्तिः, **सुविहितमुनेः**-शास्त्रदर्शितमुनिमार्गमर्यादामाचरतः साधोः, **वासयोगं विना**-सद्गन्धिवासचूर्णनिक्षेपप्रयोगमन्तरा, **अर्च्यं न**-न हि पूजनीयम् ॥५८॥

( ५९ )

ततो नातिदूरस्थमचलदुर्गं तत्रस्थजिनमन्दिरञ्च दर्शनाय वन्दनाय चाह **किञ्चिदिति**—

**किञ्चिद्दूरे भवति च तत-स्तत्र दुर्गोऽचलाख्यो,**
**मौलौ तस्मिन् विलसति चतु-र्द्वारमुत्तुङ्गचैत्यम् ॥**
**यादृक् तत्रो-च्छ्रितमनुपम-स्वर्णरीरीविमिश्रं,**
**न क्ष्मापीठे क्वचिदधिगतं तादृगर्चाचतुष्कम् ॥ ५९ ॥**

( अन्वयः ) ततः तत्र च किञ्चिद्दूरे अचलाख्यः दुर्गः भवति, तस्मिन् मौलौ चतुर्द्वारम् उत्तुङ्गचैत्यं विलसति, तत्र

याद्दक् उच्छ्रितम् अनुपमस्वर्णरीरीविमिश्रम् अर्चाचतुष्कम् ( अस्ति ) ताद्दक् क्ष्मापीठे न क्वचिद् अधिगतम् ॥ ५९ ॥

( प्रकाशः ) ततः–वर्णितचैत्यचयतः तत्र च–अर्बुदाचले हि, किञ्चिद्दूरे–ईषद्विप्रकृष्टे, अचलाख्यः दुर्गः–अचलनामा पर्वतः, कष्टगमनीयत्वाद् दुर्ग एव सः, भवति–वर्तते, तस्मिन् मौलौ–तत्र शिखरे, चतुर्द्वारम्–चतुष्प्रतीहारम्, 'वलजं प्रतीहारो द्वाद्वरि' इति हैमः, उत्तुङ्गचैत्यम्–अत्युन्नतविहारः, अभ्रंलिह-प्रासादः, विलसति–विराजति, तत्र–तस्मिन् चैत्ये, याद्दक्–याद्द-शम्, उच्छ्रितम्–उन्नतम्, महोच्चमिति यावत्, अनुपमस्वर्णरीरी-विमिश्रम्–असमकाञ्चनपीतलोहसम्मिश्रम्, 'रिरी रीरी च रीतिश्च, पीतलोहं सुलोहकम्' इति हैमः । अर्चाचतुष्कम्–बिम्बचतुष्टयम् ऐतिह्येन चतुर्दशशतमणप्रमाणप्रमितं सर्वधातुमयमिति प्रसिद्ध-मस्ति, ताद्दक्–तत्तुल्यम्, क्ष्मापीठे–भूमण्डले, न क्वचिद्–नहि क्वापि, अधिगतम्–सम्प्राप्तम् ॥ ५९ ॥

( ६० )

**नीचैः किञ्चि-द्भवति च ततः कान्तमर्हन्निशान्तं,**
**श्रान्तं भारा-दिव नवरुचां गन्तुमूर्ध्वं प्रवृत्तम् ॥**
**दुर्गस्याधोऽ-प्यथ जिनगृहं श्रीकुमारक्षितीन्दो-**
**र्वन्देथास्ते-ष्वनुपममते! भावतः श्रीजिनार्चाः ॥६०॥**

( अन्वयः ) ततः किञ्चिन्नीचैः च ऊर्ध्वं गन्तुं प्रवृत्तम् (अपि) नवरुचां भारात् श्रान्तम् इव कान्तम् अर्हन्निशान्तं भवति,

अप्यथ दुर्गस्य अधः श्रीकुमारक्षितीन्दोः जिनगृहम् ( अस्ति ) तेषु अनुपममते ! भावतः श्रीजिनार्चाः वन्देथाः ॥ ६० ॥

( प्रकाशः ) ततः–दर्शितमहामन्दिरतः, किञ्चिन्नीचैश्च–ईषदधस्तात्पुनः, ऊर्ध्वं गन्तुम्–उपरितनप्रदेशे प्रयातुम्, प्रवृत्तम् ( अपि )–कृतप्रयत्नमपि, नवरुचां भारात्–अभिनवत्विषां गुरुत्वसम्बन्धात्, श्रान्तमिव–श्रममधिगतमिव, कान्तम्–रमणीयम्, अर्हन्निशान्तम्–जिनमन्दिरम्, भवति–आस्ते, न ह्यधिकभारमागृह्य पर्वतोपरि प्रयातुं पार्यते इति चैत्यमदः रुचीनामधिकभारेण श्रान्तमत्रैव विश्रामाय स्थितमित्याशयः । अप्यथ–पुनरपि, दुर्गस्य अधः–अचलाचलस्य नीचैः, श्रीकुमारक्षितीन्दोः–श्रीकुमारपालभूपालश्रेष्ठस्य, जीवदयाप्रतिपालार्हतनृपचन्द्रेण निर्मापितमिति यावत्, जिनगृहम्–तीर्थंकरप्रासादः, अस्तीतिशेषः, तेषु–तत्र सर्वत्र, अनुपममते !–अतुलधिषण ! भावतः– भक्त्या, प्रणयपरिपूर्णस्वान्तेनेतियावत्, श्रीजिनार्चाः–श्रीमदर्हत्प्रभोः प्रतिमाः, वन्देथाः–नमस्कुर्याः । उत्प्रेक्षानुप्रासौ ॥६०॥

( ६१ )

औषधिपतिस्त्वं तत्र स्थिता औषधीः पोषयेरित्याह-अस्तीति–

अस्त्येषोऽद्रि–श्चिरमुपचितो भूरिदिव्यौषधीभि–
स्तस्मादस्यो–परि किर रसं चन्द्रिकाणां विशिष्य ॥
एताः पुष्टिं दधतु च रया–दौषधीशान ! तेऽङ्ग–
स्पर्शात् स्त्रीणां परममुदितं यौवनं भर्तृसङ्गः ॥ ६१ ॥

( अन्वयः ) एषः अद्रिः भूरिदिव्यौषधीभिः चिरम् उपचितः अस्ति, तस्माद् अस्योपरि विशिष्य चन्द्रिकाणां रसं किर, औषधीशान ! ते अङ्गस्पर्शात् च एताः रयात् पुष्टिं दधतु ( यतः ) स्त्रीणां यौवनं परममुदितं भर्तृसङ्गः, अथवा स्त्रीणां भर्तृसङ्गः परमं यौवनम् उदितम् ॥ ६१ ॥

( प्रकाशः ) **एषः अद्रिः**–असावर्बुदाचलाख्यगिरिः, **भूरिदिव्यौषधिभिः**–अतिशयमनोहरफलपाकान्तवनस्पतिभिः, प्रचुरपवित्रवनराजीभिरितियावत्, **चिरम्**–दीर्घसमयतः, **उपचितः**–समृद्धः, अवयववृद्ध्या बहुलीभूत इति यावत्, **अस्ति**–वर्तते, **तस्माद्**–अतः, **अस्योपरि**–पर्वतस्यास्योपरिष्टात्, **विशिष्य**–विशेषरूपेण, अतिशयेनेति यावत्, **चन्द्रिकाणां रसम्**–ज्योत्स्नासुधासञ्चयम् निजकरामृतमिति यावत्, **किर**–विक्षिप, **औषधीशान !**–औषधिनाथ !, चन्द्र ! **ते अङ्गस्पर्शात् च**–तव शरीरसम्बन्धतस्तु, **एताः**–औषध्यः, **रयात्**–शीघ्रम्, तत्कालमितियावत्, **पुष्टिम्**–पोषणम्, वृद्धिमिति यावत्, **दधतु**–धारयन्तु, प्राप्नुवन्त्वितिभावः, यतः, **स्त्रीणाम्**–योषिताम्, **यौवनम्**–तारुण्यम्, **परममुदितम्**–प्रकर्षप्रमोदान्वितम् तदा यदि चेत्, **भर्तृसङ्गः**–स्वामिसम्बन्धः, यद्वा **स्त्रीणाम्**–तरुणीनाम्, **भर्तृसङ्गः**–दयितसमागमः, **परमं यौवनम्**–उत्कृष्टं तारुण्यम्, **उदितम्**–कथितम्, संसारनिबन्धनशृङ्गारविचारविवेचनचतुरैरितियावत् ॥६१॥

( ६२ )

कुतूहलतोऽपि मिथ्यामतितीर्थानि न द्रष्टव्यानीत्याह-शैल इति

**शैलेऽस्त्यस्मिन् प्रतिपदमहो लौकिकी तीर्थराजी,**
**मिथ्यादृष्टि-क्षितिपतिनति-प्राप्तमिथ्यानुभावा ॥**
**न द्रष्टव्या सुभग ! भवता कौतुकादप्यसौ य-**
**न्मालिन्यं स्या-त्तदभिगमना-च्छुद्धसम्यक्त्वरत्ने।६२।**

( अन्वयः ) अस्मिन् शैले अहो ! प्रतिपदं मिथ्यादृष्टि-क्षितिपतिनतिप्राप्तमिथ्यानुभावा लौकिकी तीर्थराजी अस्ति, सुभग ! भवता असौ कौतुकादपि न दृष्टव्या यत् तदभिगमनात् शुद्धसम्यक्त्वरत्ने मालिन्यं स्यात् ॥ ६२ ॥

( प्रकाशः ) अस्मिन् शैले-पर्वतेऽत्रार्बुदाचले, अहो ! धिक्, प्रतिपदम्-पदे पदे, स्थाने स्थाने इतियावत्, मिथ्यादृष्टि-क्षितिपतिनतिप्राप्तमिथ्यानुभावा--असद्भूतदर्शनानुयायिनरपति-'नमस्करणावाप्तासत्प्रभावा, यदत्र तीर्थे नमनाय नरनायका अपि समागच्छन्तीति प्रभावोऽस्य महान् वर्तते इत्येवं तदनुयायिभिर्विस्तारितालीकवर्णवादा, परन्त्वेतन्नाद्भुतं यादृशं तीर्थं तादृशा नृपाला अपि तत्र गच्छेयुरितिभावः, लौकिकी-लोकसम्बन्धिनी, न तु लोकोत्तरेत्याशयः, तीर्थराजी-तीर्थश्रेणी, अस्ति-वर्तते, सुभग !-प्रिय ! भवता-श्रीमता, असौ-इयम्, कथिततीर्थावलिः, कौतुकादपि-कुतूहलादपि, न द्रष्टव्या-नावलोकनीया, यत्-यतः, तदभिगमनात्-लौकिकतीर्थे प्रत्यभिसरणात्, शुद्धसम्यक्त्वरत्ने-निर्मल-श्रद्धानस्वरूपहीरके, मालिन्यम्-कालिमा, स्यात्-भवेत्, स्पष्टं चैतत् प्रतिपादितं सम्यक्त्वव्रतप्रतिज्ञाप्रतिपादकसूत्रालापके ॥६२॥

( ६३ )

एवं शान्तवृत्त्या विलोक्योऽयं गिरित्याह-इत्थमिति-

**इत्थं स्थित्वा स्थिरतरधिया लोकनीयोऽर्बुदाद्रि-**
**रस्याद्रष्टा जगति हि जनो गण्यते गर्भ एव ॥**
**दृष्ट्वा चैनं व्रज गजपतेः सत्वरैः पादपातै-**
**र्नालस्यं स्या-दुपकृतिकृतां त्वादृशां ह्युत्तमानाम् ॥६३॥**

( अन्वयः ) इत्थं स्थिरतरधिया स्थित्वा अर्बुदाद्रिः लोकनीयः हि अस्य अद्रष्टा जनः जगति गर्भ एव गण्यते, च एनं दृष्ट्वा सत्वरैः गजपतेः पादपातैः व्रज हि उपकृतिकृतां त्वादृशाम् उत्तमानाम् आलस्यं न स्यात् ॥ ६३ ॥

( प्रकाशः ) **इत्थम्**–एवं प्रकारेण, **स्थिरतरधिया**–अविचलबुद्ध्या, प्रशान्तचित्तेनेति यावत्, **स्थित्वा**–स्थितिं विधाय, **अर्बुदाद्रिः**–असावचलः, **लोकनीयः**–द्रष्टव्यः, **हि**–यतः, **अस्याद्रष्टा**–पर्वतस्यास्यानवलोकयिता, येन नायं गिरिर्दृष्टिपथमापादितः सः, **जनः**–प्राणी, **जगति**-विश्वे, संसारे, **गर्भ एव**-अजात एव, अविकसितचैतन्य एव, **गण्यते**–संख्यायते, मन्यत इतियावत्, **च**–पुनः, **एनं दृष्ट्वा**–अमुं गिरिमालोक्य, **सत्वरैः**–शीघ्रैः, त्वरान्वितैरिति यावत्, **गजपतेः**–हस्तिश्रेष्ठस्य, करिवरगतितुल्यगभीरगमनैरितियावत्, **पादपातैः**–चरणनिपातैः, **व्रज**–प्रयाहि, **हि**–यतः, **उपकृतिकृताम्**–परोपकारपरायणानाम्, **त्वादृशाम्**–तव तुल्यानाम्, **उत्तमानाम्**–उत्कृष्टानाम्, **आलस्यम्**–प्रमादः, **न स्यात्**–न हि भवेत्।

( ६४ )

इतः सिद्धपुरमालोक्य राजनगरं चतुर्दशयोजनविप्रकृष्टस्थितं गमनायाह–**रम्यादिति**—

**रम्यादस्मा-द्व्रज नगवरा-न्मारवीनां नवीनां ।**
**श्रीखण्डार्चां वपुषि रचयँ-श्चन्द्रिकाणां तरङ्गैः ॥**
**सिद्धद्रङ्गे क्षणमथ सर-स्वत्युपेते विलम्ब्य ।**
**राजद्रङ्गं भुवनविदितं यास्यसि त्वं निमेषात् ॥६४॥**

( अन्वय: ) चन्द्रिकाणां तरङ्गैः मारवीनां वपुषि नवीनां श्रीखण्डार्चां रचयन् अस्मात् रम्यात् नगवरात्, व्रज, अथ सरस्वत्युपेते सिद्धद्रङ्गे क्षणं विलम्ब्य त्वं निमेषात् भुवनविदितं राजद्रङ्गं यास्यसि ॥ ६४ ॥

( प्रकाशः ) चन्द्रिकाणां तरङ्गैः-कौमुदीवीचीभङ्गैः, ज्योत्स्नाजालैरितियावत्, मारवीनां वपुषि-मरुधरविषयवास्तव्यानां विग्रहे, नवीनां श्रीखण्डार्चाम्-अपूर्वां चन्दनार्चनाम्, देहे निपतिताश्चन्द्रपादाश्चन्दनद्रवलेपसदृशा भान्तीत्याशयः, रचयन्-विदधन्, अस्मात्-अतः, रम्यात्-मनोरमात्, नगवरात्-प्रधानपर्वततः, व्रज-एहि, अथ-गमनानन्तरम्, सरस्वत्युपेते-तन्नामसरित्समन्विते, सरस्वतीसरित्तीरमुपागत इति यावत्, सिद्धद्रङ्गे-सिद्धपुरपत्तने, क्षणम्-निमेषम्, विलम्ब्य-स्थित्वा, त्वम्-श्रीमान्, निमेषात्-ईषत्कालेन, भुवनविदितम्-विश्वविश्रुतम्, राजद्रङ्गम्-राजनगरम्, अहम्मदावादेति प्रसिद्धनामधेयं पुरम्, यास्यसि-गमिष्यसि, प्राप्स्यसीतियावत् ॥६४॥

( ६५ )

तत्र निजजननीकल्पाकल्लोलिनी साभ्रमती त्वामभिनवरङ्गतरङ्गकैराश्लिष्यतीत्याह-तत्रेति—

तत्रालोक्य स्वपतितनयं राजतेजोऽभिरामं,
दर्भाङ्कूर-च्छलपुलकिता त्वामुपस्थास्यतेऽसौ ॥
आमूलाग्रं तरलिततनु-र्वीचिहस्तैरुदस्तै-
र्दूरादालि-ङ्गितुमिव रसात् साभ्रमत्यब्धिकान्ता ॥६५॥

( अन्वयः ) तत्र राजतेजोऽभिरामं स्वपतितनयं त्वाम् आलोक्य असौ अब्धिकान्ता साभ्रमती दर्भाङ्कूरच्छलपुलकिता आमूलाग्रं तरलिततनुः उदस्तैः वीचिहस्तैः रसात् दूरात् आलिङ्गितुम् इव उपस्थास्यते ॥ ६५ ॥

( प्रकाशः ) तत्र–उपराजनगरम्, राजतेजोऽभिरामम्–चन्द्रातपमञ्जुलम्, पार्थिवप्रतापमनोरममित्यपि, राजपदवाच्यत्वाचस्य, तथा चानेकार्थसङ्ग्रहः ' राजा तु पार्थिवे, निशाकरे प्रभौ ' स्वपतितनयम्-निजनाथनन्दनम्, समुद्रात्मजमितियावत्, समुद्रस्य सरित्पतित्वात्, त्वाम्–पुत्रप्रायं श्रीमन्तम्, आलोक्य–दृष्टिपथमासाद्य, असौ–इयम्, समीपस्थितेतिभावः, अब्धिकान्ता–समुद्रदयिता, सरिदितियावत्, साभ्रमती–तदभिधानप्रसिद्धा, अस्याः किञ्चिद्वृत्तं मयूरदूतपञ्जिकायां यथा–' विद्यते मेदपाटदेशप्रदेशे प्रायो द्वादशयोजनपरिमितमेकं महासरस्ततो निर्गतेयं सरित् साबरमतीनाम्नी, सेयं दक्षिणस्यां दिशि प्रवर्धमानप्रवाहा राजनगरं तरङ्गरङ्गितं विधाय स्तम्भतीर्थनिकटवर्तिनं ( खंभातनो अखात ) सरितां पतिं सागरं प्रगल्भाऽपि मुग्धेव मिलति, सोऽपि दक्षिणनायक इव तां स्वेऽङ्के सोल्लासं निवेशयति '। दर्भाङ्कूरच्छलपुलकिता–कुशाङ्कुरव्याजरोमाञ्चिता, आमूलाग्रं तरलिततनुः-मूलतोऽग्रं यावत्

चञ्चलितशरीरा; उदस्तैः–उत्क्षिप्तैः, उच्छलद्भिरितियावत्, उत्पूर्वकाद्दिवादेरस् धातोः क्त इदम्, वीचिहस्तैः–ऊर्मिपाणिभिः, रसात्–स्नेहात्, दूरात्–विप्रकृष्टतः, आलिङ्गितुम्–आश्लेष्टुम्, इव–किम्, उपस्थास्यते–उपस्थिता भविष्यति, समीपमागमिष्यतीतियावत् ॥ ६५ ॥

( ६६ )

सूक्तद्वयेन तां वर्णयति एषेति—

**एषा क्वापि प्रचुरतरभैः काननैः कम्रकूला,**
**क्वापि क्रीड-द्युवतिनिकरै-रप्सरःसेवितेव ॥**
**सद्वेषेव क्वचन वितते-रम्बरैर्धौतमुक्तै-**
**र्मुक्ताशुक्त्या-वलिरुचितरैः काप्यलङ्कारितेव ॥६६॥**

(अन्वयः) एषा क्वापि प्रचुरतरभैः काननैः कम्रकूला, (अस्ति) क्वापि क्रीडद्युवतिनिकरैः अप्सरःसेविता इव, क्वचन धौतमुक्तैः विततैः अम्बरैः सद्वेषा इव, क्वापि मुक्ताशुक्त्यावलिरुचितरैः अलङ्कारिता इव ॥ ६६ ॥

(प्रकाशः) एषा–इयं तटिनी, क्वापि–कुत्रापि स्थले, प्रचुरतरभैः–स्फारस्फिरप्रभान्वितैः, काननैः–[illegible]पिनैः, कम्रकूला–मञ्जुप्रपाता 'कूलं प्रपातः' इति हैमः, अस्ति[illegible]शेषः, एवमग्रेऽपि क्वापि–कुहचन तु, क्रीडद्युवतिनिकरैः–वि[illegible]लासिनीतरुणीनिकुरम्बैः, अप्सरःसेविता इव–किमु स्वर्वधूपासि[illegible], क्वचन–स्थलविशेषे, धौतमुक्तैः–पूर्वं धौतं पश्चान्मुक्तं धौतमुक्तन्तैः, 'पूर्वकालैक'

।३।१।९७। इतिसमासः, प्रक्षालितप्रस्थापितैः, **विततैः**–विस्तृतैः, **अम्बरैः**–वरवसनैः, **सद्वेषा इव**–नेपथ्यविभूषिता किम्, **क्वापि**–कस्मिँश्चित्प्रदेशे तु, **मुक्ताशुक्त्यावलिरुचितरैः**–मौक्तिकतज्जनकशुक्तिपङ्क्तिप्रभूतप्रभाभिः, **अलङ्कारिता इव**–मण्डिता इव, अयमाशयस्तावत्तरङ्गिण्या अस्यास्तीरे स्थलविशेषे सन्ति मनोरमवनखण्डानि प्रदेशे क्वचन क्रीडन्ति सुरसुन्दरीसदृशसुन्दर्यः साकं स्वकीयस्नेहलरमणैः देशे क्वापि रजकप्रमुखैरंशुकानि प्रक्षाल्य शुष्कीकरणार्थं प्रसारितानि राजन्ते, कुत्रचन शुक्तिनिर्गतानि शुक्तिजानि शुक्तिदलानि एवमेव निपतितानि शोभन्ते मण्डनमिवेति । उत्प्रेक्षा ॥६६॥

( ६७ )

**प्रीणात्येषाऽ–खिलपुरजनान् सत्पयःपानदाना–**
**दुत्सङ्गस्थान् रमयति च तान् केलिलीलाविलोलान् ॥**
**दूरादालि–ङ्गति च विततै–र्वीचिहस्तैः पुनीते,**
**पूतानस्याः कथमभिहिता नेयमादौ नगर्याः॥६७॥**

( अन्वयः ) एषा अखिलपुरजनान् सत्पयःपानदानात् प्रीणाति, च केलिलीलाविलोलान् उत्सङ्गस्थान् तान् रमयति, ( तान् ) विततैः वीचिहस्तैः दूरात् आलिङ्गति पुनीते च (इति) इयं नगर्याः अग्रे कथम् अभिहिता न ( स्यात् ) ?

( **प्रकाशः** ) **एषा**–इयं नदी, **अखिलपुरजनान्**–नगरनिवासिनिखिलप्राणिनः, **सत्पयःपानदानात्**–तृषातुरेभ्यः स्वच्छसलिलवितरणात्, तत्कालीनतनसमये सर्वो हि राजनगरीयलोकः साभ्रमतीसलिलमापिबन्नासीदिति सूच्यते । **प्रीणाति**–प्रसन्नयति, तृप्तिमाद-

दातीति यावत्, च–पुनः,केलिलीलाविलोलान्–परीहासविलासविशेषसतृष्णान्, उत्सङ्गस्थान्–क्रोडे संस्थितान्, तान्–पौरजनान्, रमयति–क्रीडयति, पूतान्–पवित्रान्–तान् पौरान्,विततैः–विस्तारितैः, वीचिहस्तैः–कल्लोलकरैः, दूरात्–अनिकटत एव, आलिङ्गति–संश्लेषमादधाति, पुनीते च–पवित्रयति, च, अस्यायमाशयः, इयं हि निर्झरिणी न कर्मणाशादिवत् पापप्रदायिनी परन्तु भागीरथीव सौभाग्यभाग्यभरसंविधायिनीति श्रुतिस्मृतिसमनुयायिनः स्वं सर्वथाऽऽन्तरबहिर्मलमपनेतुमत्र विदधति सवनमार्हतास्तूचिताचरणपुरस्सरमिति तान् धर्मिष्ठान् पूतान् पौरजनान् पवित्रयति पयस्विनीयम् । इति हेतोः इयम्–असौ जलधिजाया, नगर्याः–'अहमदावादे'तिप्रसिद्धाभिधानपुर्याः, आदौ–प्रथमम्, कथम्–कथङ्कारम्, अभिहिता–कथिता, वर्णितेतियावत्, न–नैव स्यात् ! काक्वा तु स्यादेव, अर्थात् प्रथममेवास्य वर्णनमुचितम् ॥६७॥

( ६८ )

सुकोमला अपि ते पादाश्चक्रवाकानामरतिमुत्पादयन्तीति त्वया सदयेन तत्र सरित्तीरे भाव्यमित्याह–नद्या इति—

**नद्याश्चास्याः सुचिरमुभयोः कूलयोः सन्निविष्टा–**
**श्चक्राह्वानां हृदयदयिता–श्चाश्रुभिः क्लिन्ननेत्राः ॥**
**पादैर्मास्माऽ–रतिमुपनयो विप्रयुक्ताः प्रसह्यैः,**
**कण्ठप्राणा नहि विरहिणः कृच्छ्रमीषत्सहन्ते ॥६८॥**

(अन्वयः) अस्याश्च नद्याः उभयोः कूलयोः सुचिरं सन्निविष्टाः

विप्रयुक्ताः अश्रुभिश्च क्लिन्ननेत्राः चक्राह्वानां हृदयदयिताः पादैः अरतिं मास्मोपनयः प्रसह्य एः हि कण्ठेप्राणाः विरहिणः ईषत् कृच्छ्रं न सहन्ते ॥ ६८ ॥

( प्रकाशः ) अस्याश्च नद्याः–पुरोवर्तिन्याः पयोवाहिन्यास्तु, उभयोः कूलयोः–द्वयोस्तीरयोः, उभयस्मिँस्तट इति यावत्, सुचिरम्–दीर्घकालात्, सन्निविष्टाः–उषिताः, संस्थिता इति यावत्, विप्रयुक्ताः–विरहमापन्नाः, निजनाथैस्सहेति शेषः, अश्रुभिश्च क्लिन्ननेत्राः–नयननीरप्लावितेक्षणाः, विरहविधुरताऽस्रोद्गमे हेतुः । चक्राह्वानाम्–रथङ्गाह्वानाम्, 'चक्रवाको रथाङ्गाह्वः' इति हैमः । हृदयदयिताः–प्राणप्रियाः, मध्यमपदलोपिसमासोऽत्र, मनोवल्लभाश्चक्रवाकीः, पादैः–करैः, रश्मिभिरिति यावत्, अरतिम्–उद्वेगम्, 'स्वाभीष्टवस्त्वलाभेन, चेतसो याऽनवस्थितिः । अरतिः सा–' इत्येवंरूपमिष्टवियोगजन्यमनोव्याकुलीभावमितिभावः, एते हि पक्षिणो द्वन्द्वचरास्तथा च कामोद्दीपकत्वत्किरणसन्निपाते स्वस्वामिसम्बन्धमपेक्षन्ते परं नहि रजनीं यावत् परस्परमीलनं भवति तेषां सम्बन्धे आदित्योदय एव निदानं तथा स्वभावत्वादिति स्पष्टमरतेः संभावनेत्याशयः । मास्मोपनयः–न प्रापय, 'सस्मे ह्यस्तनी च' ।५।४।४०। इति ह्यस्तनी, प्रसह्य एः–क्षान्तिपूर्वम्, याहि, यद्वा प्रसह्यैरितिपादैरित्यस्य विशेषणविधयान्वेयं तथा च प्रकर्षेण सह्यैः सहनीयैः कष्टानुभवनीयैरित्यर्थः, हि–यतः, कण्ठेप्राणाः–कण्ठे प्राणः येषान्ते 'अमूर्धमस्तकात्–' ।३।२।२२। इति सप्तम्या लुब् न, गलावरुद्धश्वासाः, विरहिणः–विप्रयोगमधिगताः,

ईषत्कृच्छ्रम्-स्वल्पमपि दुःखम्, क्लेशलेशमपि, कृन्ततीति कृच्छ्रम्-'कृतेः कृकृच्छ्रौ च' (उणा० ३९५) इतिरः, 'दुःखं... कृच्छ्रं कष्टम्' इति हैमः, न सहन्ते-न क्षमन्ते, सोढुमसमर्था भवन्तीति यावत्, स्वभावोक्तिः ॥६८॥

(६९)

अथ सूक्तत्रयेण शृङ्गाररसानुकूलतया तदप्रतिकूलभावेन च प्रवर्तनार्थमाह शशिनम् आरूढानामित्यादि—

**आरूढानां भवनवलभीं गौर्जरीणां त्वदीक्षा-**
**फुल्लाक्षीणां प्रियतमकर-न्यस्तहस्तोत्पलानाम् ।**
**पश्यन्तीनां नगरमभितोऽ-लङ्कृतं चन्द्रिकाभि-**
**र्बन्धो निर्वा-पय निजकरैः सुष्ठु दृक्कैरवाणि ॥६९॥**

(अन्वयः) बन्धो! भवनवलभीम् आरूढानां त्वदीक्षाफुल्लाक्षीणां प्रियतमकरन्यस्तहस्तोत्पलानां चन्द्रिकाभिः अलङ्कृतं नगरम् अभितः पश्यन्तीनां गौर्जरीणां दृक्कैरवाणि निजकरैः सुष्ठु निर्वापय ॥ ६९ ॥

(प्रकाशः) बन्धो!-सुहृत्!, भवनवलभीम्-गृहगोपानसीम्, 'गोपानसी तु वलभी' इत्यमरः, आरूढानाम्-कृतारोहणानाम्, उच्चैः स्थितानामितियावत्, नहि गेहे गेहे स्युश्चन्द्रशाला इति चन्द्रदर्शनार्थं छदि स्थितये संस्थापितकाष्ठमारोहन्ति तद्रसिका इत्याशयः, त्वदीक्षाफुल्लाक्षीणाम्-श्रीमद्दर्शनविकसितनयनानाम्, कदोदेष्यतीन्दुः (२) इतीच्छया सम्पाद्य लोचनव्याकोशं

त्वदभिमुखस्थितानाम्, गूर्जरविषये राकारमणदर्शनस्य शीलत्वात्, उदयत्पूर्णेन्दुरधिकमाह्लादं जनयतीति बहुत्र जनास्तद्दर्शनं विदधति, **प्रियतमकरन्यस्तहस्तोत्पलानाम्**– प्रेयःपाणिप्रस्थापितकरकुमुदानाम्, अनेन स्वामिसंप्रयुक्तत्वकथनेन न चन्द्रस्तासां सन्तापकर इति सूचितम्, **चन्द्रिकाभिः**–कौमुदीभिः, **अलङ्कृतम्**–विभूषितम्, आस्तीर्णरजतकल्पमिति यावत्, **नगरम्**–राजनगरम्, **अभितः**–सर्वतः, चतुरस्रमितियावत्, **पश्यन्तीनाम्**–विलोकमानानाम्, **गौर्जरीणाम्**–प्रसिद्धाभिधानगूर्जरदेशविशेषनिवासिनीनाम्, **दृक्कैरवाणि**–लोचनोत्पलानि, **निजकरैः**–स्वकीयकिरणैः, **सुष्ठु**–सम्यक्, **निर्वापय**–सान्त्वय, निजज्योतिर्भरेण तथा तासामीक्षणानि संपूरय यथास्यात्सर्वथा सौहित्यमित्याशयः ॥६९॥

( ७०-७१ )

**क्रीडाहर्म्यं प्रियसहचरी-प्रेरणाभिः प्रविष्टाः**
**शय्योत्सङ्गं प्रणयचटुभिः प्रेयसा प्रापिताश्च ।**
**व्रीडोद्रेकाद् गृहमणिमुपा-हृत्य कर्णोत्पलेन,**
**कान्तोपान्ते तमसि कथम-प्यासते या विमुग्धाः॥७०॥**

**माकार्षीस्त्वं तरुणकिरणै-र्जालमार्गप्रविष्टै-**
**स्तासां कान्त-प्रसभहृतस-चीवराणां प्रकाशम् ।**
**किं कुर्य्युः सं-वरितुमनलं-भूषणवस्तास्त्वदंशून्,**
**मौग्ध्यादेवा-नवगतधवा-क्ष्यब्जसंवृत्त्युपायाः ॥७१॥**

( अन्वयः ) याः विमुग्धाः प्रियसहचरीप्रेरणाभिः क्रीडा-

हर्म्यं प्रविष्टाः च-प्रेयसा प्रणयचटुभिः शय्योत्सङ्गं प्रापिताः, व्रीडोद्रेकात् कर्णोत्पलेन गृहमणिम् उपाहत्य तमसि कान्तोपान्ते कथमपि आसते, त्वं जालमार्गप्रविष्टैः तरुणकिरणैः कान्तप्रसभहृतसच्चीवराणां तासां प्रकाशं माकार्षीः, ( यत् ) त्वदंशून् संवरितुम् अनलं-भूष्णवः मौग्ध्यादेव अनवगतघवाक्ष्यब्जसंवृत्युपायाः ताः किं कुर्युः ॥ ७०-७१ ॥

( प्रकाशः ) याः विमुग्धाः—याः-' प्रथमावतीर्णयौवन--मदनविकारा रतौ वामा; कथिता मृदुश्च माने, समधिकलज्जावती मुग्धा' ॥ ( सा. द. ) इत्युक्तस्वरूपा नवोढाः, प्रियसहचरीप्रेरणाभिः—स्निग्धसखीप्रेरकोक्तिभिः, क्रीडाहर्म्यम्—केलिसदनम्, विलासनिवास इतियावत्, प्रविष्टाः—अन्तर्गताः, च—पुनः, प्रेयसा—प्रियतमेन, प्रणयचटुभिः—स्नेहलोक्तिभिः, प्रेमपरिपूर्णवचनैः, 'चटुचाटु-प्रियप्रायम्' इति हैमः, चटुशब्दस्य प्रियवचसि शक्तत्वेऽपि प्रणयेति विशेषणसन्निधानाद्वचनमात्रतावसेया, शय्योत्सङ्गम्—शयनीयक्रोडम्, तल्पान्तरिति यावत्, प्रापिताः—नीताः, व्रीडोद्रेकात्—लज्जाधिक्यात्, कर्णोत्पलेन—श्रवणस्थितसरसिजेन, गृहमणिम्—दीपम्, 'दीपः प्रदीपः कज्जलध्वजः। स्नेहप्रियो गृहमणिः' इति हैमः। उपाहत्य-प्रहत्य, निर्वाप्येतियावत्, तमसि-अन्धकारे, कान्तोपान्ते-स्वामिसमीपे, निजनाथनिकट इति यावत्, कथमपि-केनापि प्रकारेण, आसते—उपविशन्ति, वर्तन्त इति यावत्, त्वम्—श्रीमान्, जालमार्गप्रविष्टैः—गवाक्षाध्वनाऽन्तर्गतैः, 'वातायनो गवाक्षश्च जालके' इति हैमः, तरुणकिरणैः—युवमयूखैः, पूर्णपादैरितियावत्, कान्तप्रसभहृतसच्चीवराणाम्—कान्तेन प्रसभं हृतं सच्चीवरं यासां तासाम्, दयित-

बलात्कृष्टसमीचीनवसनाम्, **तासाम्**—नवोढनायिकानाम्, **प्रकाशम्**-उद्योतम्, **माकार्षीः**—नो विदध्याः, यतो हि, **त्वदंशून्**—भवद्भानून्, **संवरितुम्**—पिधातुम्, आच्छादायितुमितियावत्, **अनलंभूष्णवः**—असमर्थाः, भवतीत्येवं शीलो भूष्णुः 'भूजेः ष्णुक्' ।५।२।३०। इति ष्णुक्, **मौग्ध्यादेव**—अकौशल्यात्खलु, **अनवगतधवाक्ष्यब्जसंवृत्युपायाः**—अविदितदयितनयनकमलावरणप्रकाराः, एतादृशप्रसङ्गे कराभ्यां नाथनयननिमीलनं विधातव्यमित्यनभिज्ञाः, **किं कुर्युः**—किं विदध्युः, किंकर्तव्यविमूढा भवेयुरितियावत्, तासामुपरि दयां विधाय अथ च तादृशं तमस्कृत्यं तमस्येवोचितमिति विचिन्त्य तत्र प्रकाशः न कर्तव्य इति भावः ॥ ७०–७१ ॥

( ७२ )

**तत्राट्टानां ततिषु निहिता भूरिरत्नप्रकारा-**
**स्तारास्तारा-धव ! तव करैः सुष्टु संयोगमेत्य ॥**
**प्राप्तोल्लासा इव नवरुचो दर्शनीया भविष्य-**
**न्त्युल्लासं हि प्रथयति चिरा-द्बन्धुवाहानुषङ्गः ॥७२॥**

( अन्वयः ) ताराधव ! तत्र अट्टानां ततिषु निहिताः ताराः भूरिरत्नप्रकाराः तव करैः सुष्टुसंयोगम् एत्य प्राप्तोल्लासा इव नवरुचः दर्शनीया भविष्यन्ति हि चिराद् बन्धुवाहानुषङ्गः उल्लासं प्रथयति ॥ ७२ ॥

( प्रकाशः ) **ताराधव !**—नक्षत्रनाथ !, **तत्र**—राजनगरे, **अट्टानां ततिषु**—हट्टावलिषु, 'अट्टो हट्टाट्टालकयोः' इत्यनेकार्थसङ्ग्रहः **निहिताः**—स्थापिताः, **ताराः**—मनोहराः, निर्मला इतियावत्,

नक्षत्ररूपा इत्यपि, भूरिरत्नप्रकाराः—प्रचुरमाणिक्यादिहीरकविशेषाः, तव करैः—श्रीमतः किरणहस्तैः, सुष्ठु—सम्यक्, संयोगम्—सम्बन्धम्, एत्य—प्राप्य, प्राप्तोल्लासा इव—अधिगताह्लादाः किमु, प्रकाशमुपेता इवेतियावत्, नवरुचः—अभिनवकान्तयः, दर्शनीयाः भविष्यन्ति—ईक्षणीयस्थितिमधिगमिष्यन्ति, हि—यतः, चिरात्—दीर्घसमयेन, बन्धुवाहानुषङ्गः—स्वजनजनभुजसम्बन्धः, 'स्वजनो बन्धुः' 'भुजो बाहुः प्रवेष्टो दोर्बाहाः' इति हैमः, उल्लासम्—आह्लादम्, प्रथयति—विस्तारयति ॥ ७२ ॥

( ७३ )

तत्र राजनगरे ते भगिनी भगवती श्रीर्निश्चलीभूय विलसतीति त्वया सानन्दं सा द्रष्टव्येत्याह—लक्ष्मीरिति—

**लक्ष्मीस्तत्रा-रमति सततं भूरिकोटिध्वजानां,**
**गेहे गेहे बहुविधधनैः क्लृप्तनानास्वरूपा ॥**
**दृष्ट्वा चैनां सुभग ! भगिनीं त्यक्तचाञ्चल्यदोषां,**
**चिन्तातीतं नियतमतुलं प्राप्स्यसि त्वं प्रमोदम् ॥७३**

( अन्वयः ) तत्र भूरिकोटिध्वजानां गेहे गेहे बहुविधधनैः क्लृप्तनानास्वरूपा लक्ष्मीः सततम् आरमति, सुभग ! एनाञ्च त्यक्तचाञ्चल्यदोषां भगिनीं दृष्ट्वा त्वं नियतं चिन्तातीतम् अतुलं प्रमोदं प्राप्स्यसि ॥ ७३ ॥

( प्रकाशः ) तत्र—राजनगरे, भूरिकोटिध्वजानाम्—अयं

कोटिप्रमितधनाधिप इति सूचको ध्वजो यस्य सदनोपरि वर्तते स कोटिध्वजः, तेषाम्, प्रभूतकोटीश्वराणाम्, **गेहे गेहे**–प्रतिहर्म्यम्, केतन्ति निवसन्ति अत्र गेहम् 'कितो गे च' ( उणा० ५८७ ) इति हः। **बहुविधधनैः**–नानाप्रकारद्रविणैः 'द्रविणं धनम्' इति हैमः, **क्लृप्तनानास्वरूपा**–आसादितानेकनिजरूपा, हारार्धहारकटककेयूरकङ्कणकुण्डलकटिसूत्रमुद्रिकामुद्रादिनानारूपेतियावत्, **लक्ष्मीः**-अब्धिसुता, **सततम्**–सर्वदा, **आरमति**–विलसति, 'व्याङ्परे रमः' ।३।३।१०५। इति परस्मैपदम्, **सुभग !**–शुभैश्वर्यशालिन्! प्रियेतियावत्, **एनाश्च**–एतान्तु, 'त्यदामेन देतदः–'।२।१।३३। इत्येनदादेशः, **त्यक्तचाञ्चल्यदोषाम्**–दूरीकृतास्थैर्यविगुणाम्, **भगिनीम्**–स्वसारम्, **दृष्ट्वा**–समीक्ष्य, **त्वम्**–श्रीमान्, **नियतम्**–निश्चितम्, **चिन्तातीतम्**–मनस्तापानुस्यूतविचारणा चिन्ता तया अतीतम्, चिन्तारहितम्, विचारागोचरमिति भावः, **अतुलम्**–निःसीमम्, अनुपममितियावत्, **प्रमोदम्**–आनन्दम्, **प्राप्स्यसि**–अधिगमिष्यसि, एतावत्समयं त्वं सचिन्त आसीः यत् कुटुम्बे मे सर्वेऽपि सगुणाः स्थिराश्च परमियं सहोदरैव चञ्चलतरा किन्त्वत्र तां निश्चपलामालोक्य निश्चिन्तीभूयानन्दमनुभविष्यसीति भावः ॥ ७३ ॥

( ७४ )

तस्य नगरस्य विशालतां वर्णयति **एकैक** इति—

**एकैकोऽस्य ध्रुवमुडुपते ! पाटकोऽन्यैः पुराणां,**
**वृन्दैस्तुल्यो जनपदसमा–न्येव शाखापुराणि ॥**

**धामैकैकं पृथुतरमुरु-ग्रामतुल्यं तदस्य,**
**माहात्म्यं कः कथयितुमलं प्राप्तवाग्वैभवोऽपि ॥७४॥**

( अन्वयः ) उडुपते ! अस्य एकैकः पाटकः ध्रुवम् अन्यैः पुराणां वृन्दैः तुल्यः शाखापुराणि जनपदसमान्येव, एकैकं पृथुतरं धाम उरुग्रामतुल्यं तत् अस्य माहात्म्यं प्राप्तवाग्वैभवोऽपि कः कथयितुम् अलम् ॥ ७४ ॥

( प्रकाशः ) उडुपते !–नक्षत्रनाथ !, अस्य–राजनगरस्य, एकैकः–प्रत्येकः, पाटकः–प्रतोलिकाविशेषः, ध्रुवम्–निश्चयेन, अन्यैः–अपरैः, पुराणाम्–पत्तनानाम्, वृन्दैः–समूहैः, तुल्यः–समानः, शाखापुराणि–उपपुराणि, शाखासमीपवर्ति पुरं शाखापुरम्, यदाह ‘ शाखा वेदिविभागे स्यात्, पादपाङ्गान्तिकेऽपि च’ ‘ शाखापुरं तूपपुरम् ’ इति हैमः। जनपदसमान्येव–राष्ट्रकल्पानि खलु, एकैकम्–प्रत्येकम्, पृथुतरं धाम–अतिविस्तीर्णं वेश्म, उरुग्रामतुल्यम्–बृहन्निवसथसन्निभम्, तत्–एवं स्थिते, अस्य–राजनगरस्यास्य, माहात्म्यम्–गौरवम्, प्राप्तवाग्वैभवोऽपि–अधिगतवचनपाटवैश्वर्योऽपि, कः–को हि जनः, कथयितुम् अलम्–वर्णयितुं समर्थः, न कश्चिदपीति भावः। अलङ्कृतिरतिशयोक्तिः ॥७४॥

( ७५ )

अत्र रत्ननिकरमालोक्य मत्पितुरनेन सर्वस्वं विलुण्टितमिति भ्रमो न विधातव्य इत्याह मुक्तेति—

**मुक्तापुञ्जान् प्रतिपदमुरून् रत्नराशीन् प्रवालाऽ—**
**ङ्कूराञ्छङ्खान् मृगमदसरान् वीक्ष्य भूयो वराँश्च ॥**

**मा ज्ञासीस्त्वं स्वपितुरुदधे-र्हन्त सर्वस्वमात्तं,**
**द्रङ्गो ह्येष प्रकृतिगुणतो ज्येष्ठरत्नाकरोऽस्ति ॥७५॥**

( अन्वयः ) ( अत्र ) प्रतिपदं मुक्तापुञ्जान् उरून् रत्नराशीन् प्रवालाङ्कूरान् शङ्खान् वरान् मृगमदसरान् भूयः वीक्ष्य त्वं हन्त ! स्वपितुः उदधेः सर्वस्वम् ( अनेन ) आत्तम् ( इति ) मा ज्ञासीः, हि एष द्रङ्गः प्रकृतिगुणतः ज्येष्ठरत्नाकरः अस्ति ॥७५॥

( **प्रकाशः** ) अत्र नगरे, **प्रतिपदम्**–पदे पदे, स्थाने स्थान इति यावत्, **मुक्तापुञ्जान्**–शुक्तिजसमूहान्, **उरून् रत्नराशीन्**–महतो मणिसङ्घातान्, **प्रवालाङ्कूरान्**–विद्रुमाङ्कुरान्, **शङ्खान्**–कम्बून्, शाम्यति शङ्खः पुँक्लीबलिङ्गः ‘शमिमनिभ्याम्–’ ( उणा० ८४ ) इति खः, शं सुखं खनति, श्रेयो जनयतीति वा ‘क्वचित्’ ।५।१।१७१। इति डः, **वरान्**–श्रेष्ठान्, **मृगमदसरान्**–मृगमदः–कस्तूरिका तं सरति–अनुसरतीति मृगमदसरस्तान्, कस्तूरिकाकल्पाम्बरादिगन्धद्रव्यनिकरान्, अम्बरप्रमुखसद्गन्धिपदार्थविशेषाणां जनिस्थानं वारांनिधिरिति प्रसिद्धमेव, **भूयः**–प्रभूतम्, अतः परं वराँश्चेत्यस्य प्रकृतेऽवग्रहमाकल्प्य अवराँश्चेति कृत्वा **अवराँश्च भूयः**–अन्यानपि प्रचुरपदार्थानित्यर्थोऽप्यवसेयः, **वीक्ष्य**–नितरामालोक्य, **त्वम्**–श्रीमान्, **हन्त !**–हा, खेदज्ञापकमव्ययम्, **स्वपितुः**–निजजनकस्य, **उदधेः**–रत्नाकरस्य, **सर्वस्वम्**–वसुमात्रम्, निखिलवित्तमितियावत्, अनेन नगरेण **आत्तम्**–गृहीतम्, इति **मा ज्ञासीः**–न ह्यवगच्छेः, हि–यतः, **एष द्रङ्गः**–इदं हि नगरम्, **प्रकृतिगुणतः**–स्वभावतः, निसर्गादेव, **ज्येष्ठरत्नाकरोऽस्ति**–उत्कृष्टमणिखानिर्वर्तते ॥ ७५ ॥

( ७६ )

चिरदर्शनीयस्यास्य लघुदर्शनायैकदेशावलोकनार्थमाह अस्येति-

**अस्य व्यक्त्या निशमनमहो ! वर्षलक्षानुपाति,**
**सामान्येना-मृतकर ! तत-श्चैकदेशो विलोक्यः ॥**
**तस्मिन् दृष्टे निखिलमपि त-दृष्टमेवावधेयं,**
**सर्वं दृष्टं वदति हि जनो वर्णिकादर्शनेन ॥ ७६ ॥**

( अन्वयः ) अमृतकर ! अहो ! अस्य व्यक्त्या निशमनं वर्षलक्षानुपाति, ततश्च एकदेशः सामान्येन विलोक्यः तस्मिन् दृष्टे तत् निखिलमपि दृष्टमेव अवधेयं हि जनः वर्णिकादर्शनेन सर्वं दृष्टं वदति ॥ ७६ ॥

( प्रकाशः ) अमृतकर !-पीयूषपाद !, अहो-अद्भुतम्, अस्य-नगरस्यास्य, व्यक्त्या-पृथक्पृथक्स्थलमादाय, विशेषादितियावत्, निशमनम्-श्रवणमपि, वर्षलक्षानुपाति-लक्षशरदापेक्षि, यदि कश्चिद्विस्तरतोऽस्य नगरस्य वर्णनं शृणुयात्तदा शरदां शतसहस्रसम्मितं समयमपेक्षेतेत्याशयः, ततश्च-एवं हि स्थिते, एकदेशः-कश्चिदेकविभागः, सामान्येन-समष्टिरूपेण, न तु व्यक्त्या, विलोक्यः-निरीक्षणीयः, त्वयेति शेषः, तस्मिन् दृष्टे-अवलोकिते तद्विभागविशेषे, तत्-पुरमेतत्, निखिलमपि-सम्पूर्णं यावत्, दृष्टमेव-खलु निरीक्षितम्, अवधेयम्-विज्ञेयम्, हि-यतः, जनः-लोकः, वर्णिकादर्शनेन-एकदेशावलोकनेन,

सर्वं दृष्टम्--निखिलमवलोकितम्, वदति-कथयति, 'स्थाली-पुलाकन्यायेन' नहि सर्वावलोकनं सम्भवत्यपि तु एकदेशदर्शनेनैव सर्वस्य परिचयो जायते। अर्थान्तरन्यासः ॥ ७६ ॥

( ७७ )

तत्र त्वदागमनेन ज्योतिषां सम्मेलनं भविष्यतीत्याह रत्नेति-

**रत्नज्योतिः कनकरजत-ज्योतिरट्टावलीषु,**
**स्त्रीपुंसाङ्गा-भरणतरुण-ज्योतिरत्र प्रदोषे ॥**
**दीपश्रेणी-प्रकटितपटु-ज्योतिरिन्दो! त्वदीय-**
**ज्योतिर्योगे भवतु विविध-ज्योतिषां सन्निपातः॥७७॥**

(*अन्वयः*) अत्र रत्नज्योतिः अट्टावलीषु कनकरजतज्योतिः स्त्रीपुंसाङ्गाभरणतरुणज्योतिः प्रदोषे दीपश्रेणीप्रकटितपटुज्योतिः (सन्ति) इन्दो! त्वदीयज्योतिर्योगे विविधज्योतिषां सन्निपातः भवतु ॥ ७७ ॥

(**प्रकाशः**) **अत्र**-पुरेऽस्मिन्, **रत्नज्योतिः**-मणिप्रभा, **अट्टावलीषु**-हट्टततिषु, **कनकरजतज्योतिः**-चामीकररूप्यरुचिः, **स्त्रीपुंसाङ्गाभरणतरुणज्योतिः**--नरनारीदेहावयवस्थिता भूषण-नवीनच्छविच्छटा, **प्रदोषे**-सायाह्ने, रजनीमुख इतियावत्, 'प्रदोषो यामिनीमुख' मिति हैमः। प्रारब्धा दोषा रात्रिरस्मिन्निति प्रदोषः, **दीपश्रेणिप्रकटितपटुज्योतिः**-प्रदीपतत्याविष्कृतमनोज्ञ-द्युतिः, एताः कान्तयस्त्वत्र सन्त्येव परं विशेषेण, **इन्दो!**-हिमद्युते!, **त्वदीयज्योतिर्योगे**-श्रीमत्कान्तिसमागमे, विविध-

ज्योतिषाम्–नानाप्रकाररोचिषाम्, सन्निपातः–सम्मेलनम्, भवतु-जायताम् ॥ ७७ ॥

( ७८ )

चन्द्रमसोऽर्थव्यञ्जकत्वं वर्णयति तत्रेति—

**तत्र प्रत्या-पणमनुगृहं दीपकानां कदम्बे,**
**स्तोकं पौरा-णिक इव निशि व्यञ्जयत्यर्थजातम् ॥**
**गत्वा प्रामा-णिक इव महान् व्यञ्जयन् सर्वतोऽर्थं,**
**वैलक्ष्यं तं तरलितकरैः प्रापयिष्यत्यवश्यम् ॥ ७८ ॥**

( अन्वयः ) तत्र प्रत्यापणम् अनुगृहं निशि पौराणिक इव स्तोकम् अर्थजातं दीपकानां कदम्बे व्यञ्जयति प्रामाणिक इव महान् ( त्वं ) गत्वा तरलितकरैः सर्वतः अर्थं व्यञ्जयन् तम् अवश्यं वैलक्ष्यं प्रापयिष्यति ॥ ७८ ॥

( प्रकाशः ) तत्र–राजनगरे, प्रत्यापणम्–प्रत्येकविपणौ, एत्य पणायन्त्यस्मिन् आपणः ' गोचरसंवर–' ।५।३।१३१। इति घः, अनुगृहम्–गेहे गेहे, उभयत्र ' योग्यतावीप्सा–' ।३।१।४०। इत्यव्ययीभावः, निशि–तमस्विन्याम्, पौराणिक इव–यथा पुराणकथाकथके, पुराणज्ञ इति यावत्, पुराणं वेत्ति पौराणिकः ' तद्वेत्त्यधीते '।६।२।११७।इतीकण्, स्तोकम्–किञ्चित् किञ्चित्, अर्थजातम्––पदार्थप्रकरम्, दीपकानां कदम्बे––प्रदीपानां निकुरम्बे, व्यञ्जयति–प्रकाशयति सति, प्रामाणिक इव–प्रमाणप्रदर्शकवत्, महान्–प्रबलः श्रीमान्, गत्वा–तत्रैत्य, तर-

लितकरैः–आन्दोलितकिरणैः, तरल + क्विप् + क्तः–तरलितः, यद्वा भास्वरभानुभिः, तारकादिभ्य इतः ' तरलो भास्वरे चले ' इत्यनेकार्थः, सर्वतः–परितः, अर्थम्–पदार्थम्, व्यञ्जयन्–प्रकटयन्, तम्–दीपकदम्बम्, अवश्यम्–नूनम्, वैलक्ष्यम्–व्रीडाम्, प्रापयिष्यति–गमयिष्यति, यथा पौराणिकः कतिपयाज्ञजनानामन्तिके शास्त्रपदार्थान् यथा तथा ' देव्युवाचवत् ' प्रकटयति निशि तथा दीपसमूहोऽपि परं तत्राकस्मात्कस्यचन प्रामाणिकस्यागमने स विलक्षो भूत्वानुभवति लज्जां तथा भोः रजनीनाथ ! सहसा तत्र श्रीमदुदयेन दीपनिकरोऽपि निस्तेजः स्थास्यतीतिभावः । दृष्टान्तालङ्कारः ॥ ७८ ॥

( ७९ )

राजनगरतः प्रयाणे नवयोजनदूरस्थवटपद्रपुरदर्शनं प्रमोदं जनयिष्यति ते तदेवाह **तस्मादिति**—

**तस्माद्द्रङ्गा–च्छमनककुभि प्रस्थितस्यान्तरा ते,**
**स्वर्गाकारं नगरमपरं लाटदेशस्य पुण्ड्रम् ॥**
**दर्शं दर्शं मनसि परम–प्रीतिरापत्स्यते य–**
**न्नानालक्ष्मी–रुचिरवपुषां तत्र वासो जनानाम् ॥७९॥**

(अन्वयः) तस्मात् द्रङ्गात् शमनककुभि प्रस्थितस्य ते मनसि अपरं लाटदेशस्य पुण्ड्रं स्वर्गाकारं नगरं दर्शं दर्शं परमप्रीतिः आपत्स्यते यत् तत्र नानालक्ष्मीरुचिरवपुषां जनानां वासः ( अस्ति ) ॥ ७९ ॥

( प्रकाशः ) तस्मात् द्रङ्गात्–राजनगराभिधानान्नगरात्,

**शमनककुभि**-यमाशायाम्, दक्षिणस्यां दिशीतियावत्, 'यमराजः श्राद्धदेवः शमनो महिषध्वजः ' इति हैमः। स हि दक्षिणाधिपतिः, **प्रस्थितस्य**-कृतप्रयाणस्य, **ते**-भवतः, **मनसि**-स्वान्ते, **अपरम्**-अन्यत्, **लाटदेशस्य पुण्ड्रम्**-तन्नामजनपदस्य वरतिलकम्, लाटललाटपट्टे तिलकाकारमितियावत्, ' तिलके तमालपत्रचित्रपुण्ड्रविशेषका' इति हैमः। **स्वर्गाकारम्**-अमरनिकेतनकल्पम्, **नगरम्**-पुरम्, **दर्शं दर्शम्**-दृष्ट्वा दृष्ट्वा, **परमप्रीतिः**-अतिशयाह्लादः, **आपत्स्यते**-उद्भविष्यति, **यत्**-यस्माद्धेतोः, **तत्र**-तन्नगरे, **नानालक्ष्मीरुचिरवपुषाम्**-विविधश्रीसुन्दरशरीराणाम्, **जनानाम्**-मनुजानाम्, **वासः**-निवसनम्, वर्तते इति शेषः, श्रीदर्शनेन श्रीमान् प्रसन्नो भवति यतो हि भवतो भगिनी सा, तत्र पुरे तस्या दर्शनं ते भावीत्याशयः॥ ७९॥

( ८० )

सर्वतोऽतिरिच्यास्तेऽदः पुरमित्याह **लङ्केति**—

**लङ्का शङ्कां मनसि दधतीं तोयराशौ ममज्जा-**
**तीते दृग्भ्यो वसति च पदे हन्त! वस्वोकसारा॥**
**पातालं प्राविशदपमदा सापि भोगावतीमां,**
**दृष्ट्वा रम्या-मनुपमतमां वाटपद्रीमभिख्याम्॥८०॥**

(अन्वयः) रम्याम् अनुपमतमाम् इमां वाटपद्रीम् अभिख्यां दृष्ट्वा मनसि शङ्कां दधती लङ्का तोयराशौ ममज्ज, वस्वोकसारा च हन्त! दृग्भ्यः अतीते पदे वसति, अपमदा सा भोगावती अपि पातालं प्राविशत्॥ ८०॥

( प्रकाशः ) **रम्याम्**–मनोरमाम्, **अनुपमतमाम्**–अतुलतमाम्, **इमाम्**–पुरः प्रदर्श्यमाणाम्, **वाटपद्रीमुअभिख्याम्**–वटपद्रेत्याख्याम्, पुरीमितिभावः, **दृष्ट्वा**–निरीक्ष्य, **मनसि**–अन्तःकरणे, **शङ्काम्**–अनिष्टसम्भवनाम्, 'शङ्काऽनिष्टोत्प्रेक्षणं स्यात्' इति हैमः। **दधती**–धारयन्ती, **तोयराशौ**–जलनिधौ, **ममज्ज**–निमग्नाऽभूत्, **वस्वोकसारा च**–अलका तु, इन्द्रपुरी पुनः इतियावत्, 'अलका वस्वोकसारा' इति हैमः। वसुयुक्तानि ओकांसि सारमस्यां वस्वोकसारा, पृषोदरादित्वात् सलोपः, **दृग्भ्यः अतीते**–यत्र नास्ति नयनविषयता तत्र, अगोचरे लोचनानामिति यावत्, **पदे**–स्थाने, **वसति**–वर्तते, **अपमदा**–गतसौन्दर्याभिमाना, **सा**–प्रसिद्धा, **भोगावती**–नागनगरी, 'तेषां भोगावती पुरी' इति हैमः। भोगाः सन्त्यस्यां भोगावती 'अनजिरादि–'।३।२।७८। इति मतौ दीर्घता। **अपि**–पुनः, **पातालम्**–अधोलोकम्, **प्राविशत्**–अविविशत्, प्रयातेतियावत् ॥ ८० ॥

( ८१ )

तत्रत्यमण्डपं वर्णयति मध्य इति—

**मध्येऽस्त्यत्र प्रचुरसुषमो मण्डपोऽत्यन्ततुङ्ग–**
**स्तत्र स्थित्वा चतसृषु दिशा–स्वीक्षणीयं त्वयेन्दो!॥**
**द्रष्टासि द्राक् श्रियमनुपमा–मस्य विष्वक् पुरस्य,**
**रम्यं ह्येत–च्छुचिरुचिचतु–र्द्वारचैत्यानुकारम् ॥८१॥**

( अन्वयः ) अत्र मध्ये प्रचुरसुषमः अत्यन्ततुङ्गः मण्डपः अस्ति इन्दो ! त्वया तत्र स्थित्वा चतसृषु दिशासु ईक्षणीयम्,

**द्राक् अस्य पुरस्य विष्वक् अनुपमां श्रियं द्रष्टासि हि रम्यम्**
**एतत् चैत्यानुकारं शुचिरुचिचतुर्द्वारम् ॥ ८१ ॥**

( प्रकाशः ) **अत्र**–पुरेऽस्मिन्, **मध्ये**–मध्यभागे, **प्रचुरसुषमः**–अधिकातिशयशोभाकलितः; ‘ सुषमा सा( शोभा )ऽतिशायिनी ’ इति हैमः, **अत्यन्ततुङ्गः**–प्रभूतोच्चः, गगनाङ्गणगत इतियावत्, **मण्डपः**–जनाश्रयः, स्तम्भस्थितच्छत्राकारगेहमितियावत्, यत्र जना एकत्रा भवन्ति सः, **अस्ति**–वर्तते, **इन्दो !**–अयि अमृतपाद !, **त्वया**–श्रीमता, **तत्र**–मण्डपे तत्र, **स्थित्वा**–विधायावस्थितिम्, **चतसृषु दिशासु**–दिक्षु सर्वासु, **ईक्षणीयम्**–विलोकनीयम्, **द्राक्**–शीघ्रम्, **अस्य पुरस्य**–वटपद्राभिधस्य नगरस्यास्य, **विष्वक्**–परितः, **अनुपमाम्**–असमाम्, **श्रियम्**–लक्ष्मीम्, समृद्धिम्, शोभाम्, **द्रष्टासि**–विलोकयिता भविष्यसि, **हि**–खलु, **रम्यम्**–मनोज्ञम्, **एतत्**–नगरमदः, **चैत्यानुकारम्**–जिनविहारानुरूपम्, **शुचिरुचिचतुर्द्वारम्**–विशदकान्तिद्वारचतुष्कम्, वर्तते, यथार्हत्प्रासादश्चतुर्द्वारो भवति तथेदं नगरमपि चतुर्द्वारं वर्तते इति ॥ ८१ ॥

( ८२ )

वटपद्रातिनिकटयोजनषट्कमात्रान्तरवर्तिभृगुपुरगमनायाह अत्येति—

**अत्यासन्नं भृगुपुरमितो यास्यसि प्रौढदुर्गम्,**
**दुर्गन्धांशो-ज्झितमतिसुरै-र्भूरिपौरैः परीतम् ॥**

**भूपीठे म-त्सदृशमपरं वर्तते वा नवेति,**
**द्रष्टुं द्रङ्गा-न्तरमिव समा-रूढमुच्चप्रदेशम् ॥ ८२ ॥**

( अन्वयः ) इतः अत्यासन्नं प्रौढदुर्गं दुर्गन्धांशोज्झितम् अतिसुरैः भूरिपौरैः परीतं भूपीठे मत्सदृशम् अपरं द्रङ्गान्तरं वर्तते वा नवेति द्रष्टुम् उच्चप्रदेशं समारूढं भृगपुरं यास्यसि ॥८२॥

( **प्रकाशः** ) **इतः**–अस्मात्पुरात्, **अत्यासन्नम्**–अतिनिकटम्, **प्रौढदुर्गम्**–उन्नतकोट्टम्, दुःखेन गम्यतेऽस्मिन् दुर्गम्, 'सुगदुर्गमाधारे' ।५।१।१३२। इति साधुः, **दुर्गन्धांशोज्झितम्**–पूतिगन्धिकलेशरहितम्, **अतिसुरैः**–अमरवराधिकतेजोभिः, **भूरिपौरैः**–प्रचुरनागरैः, **परीतम्**–व्याप्तम्, **भूपीठे**–पृथ्वीमण्डले, **मत्सदृशम्**–मम समानम्, **अपरम्**–द्वितीयम्, वरमिति वा, **द्रङ्गान्तरम्**–अन्यन्नगरम्, **वर्तते वा नवेति**–किमु आस्ते न वा, इति, **द्रष्टुम्**–निरीक्षितुम्, **उच्चप्रदेशम्**–उच्छ्रितभूमिम्, **समारूढम्**–समारोहणं कृतवत्, उपरिगतमितियावत्, **भृगुपुरम्**–तदभिधं पत्तनम्, **यास्यसि**–गमिष्यसि । उत्प्रेक्षा ॥ ८२ ॥

( ८३ )

तत्र स्थितां नर्मदां नदीं वर्णयति तस्योपान्त इति—

**तस्योपान्ते सुखयति नदी नर्मदा नर्मदोर्मि-**
**स्तोमै रोमो-द्गममतिहिमैः कुर्वती नौस्थितानाम् ॥**
**क्रीडद्गन्ध-द्विपमदरसो-द्दामगन्धप्रवाहा,**
**चञ्चत्क्रीडा-वनघनतटा नाव्यनीरा गभीरा ॥८३॥**

( अन्वयः ) तस्य उपान्ते नौस्थितानाम् अतिहिमैः नर्मदोर्मिस्तोमैः रोमोद्गमं कुर्वती क्रीडद्गन्धद्विपमदरसोद्दामगन्धिप्रवाहा चञ्चत्क्रीडावनघनतटा नाव्यनीरा गभीरा नर्मदा नदी सुखयति ॥ ८३ ॥

( प्रकाशः ) तस्य–भृगुपुरस्य, उपान्ते–उपकण्ठे, समीप इति यावत् 'उपान्तं निकटोपकण्ठे' इति हैमः । समीपोऽन्तोऽस्येत्युपान्तम्, **नौस्थितानाम्**–तरीषूपविष्टानाम्, **अतिहिमैः**–अतिशयशीतलैः, **नर्मदोर्मिस्तोमैः**–केलिसम्पादकतरङ्गनिकरैः, अस्या ऊर्मयो नर्मदा अत एवेत्थं नर्मदेत्यनेन सूचितम्, **रोमोद्गमम्**–तनूरूहोल्लासम्, रोमाञ्चमितियावत्, **कुर्वती**–सम्पादयित्री, **क्रीडद्गन्धद्विपमदरसोद्दामगन्धिप्रवाहा**–विलसद्गन्धहस्तिदानवार्युत्कटसुरभिसलिलधारा, द्वाभ्यां पिबति द्विपः 'स्थापास्नात्रः–' ।५।१।१४२। इति कः, गन्धप्रधानो द्विपः गन्धद्विपः सरितोऽस्याः सलिलप्रवाहे गन्धहस्तिनो विलसन्तीति तेषां मदजलेनास्या वारि समुत्कटगन्धि वर्तते इतिभावः, **चञ्चत्क्रीडावनघनतटा**–परिस्फुरत्केलिकाननिरन्तरतीरा, अस्या रोधसि निबिडं देदीप्यमानानि लीलोपवनानि सन्तीत्याशयः । **नाव्यनीरा**–तरीसंतरणयोग्यसलिला, नावा तार्यं नाव्यम्, 'नौ विषेण तार्यवध्ये' ।७।१।१२। इति यः, नाव्यं नीरं यत्र सा नाव्यनीरा, **गभीरा**–गहना, **नर्मदा नदी**–इन्दुजा तटिनी, रेवातरङ्गिणीतियावत्, 'रेवेन्दुजा पूर्वगङ्गा नर्मदा मेखलाद्रिजा' इति हैमः । **सुखयति**–आनन्दयति ॥ ८३ ॥

( ८४ )

आस्तामत्र युवयोस्तातसुतयोः सम्बन्धः साधीयानित्याह आलोक्येति–

**आलोक्य द्राग् भुवनममृतै–स्तर्पयन्तं भवन्तं,**
**तातं भ्रात–र्भवतु मुदिता नर्मदा ते तनूजा ॥**
**प्राप्तोल्लासो भवतु च भवा–नप्युपेत्य क्षणेन,**
**संसारे य–ज्जनितजनक–प्रेमबन्धो गरीयान् ॥८४॥**

( अन्वयः ) भ्रातः ! अमृतैः भुवनं तर्पयन्तं भवन्तं तातम् आलोक्य द्राक् ते तनूजा नर्मदा मुदिता भवतु च क्षणेन भवान् अपि उपेत्य प्राप्तोल्लासः भवतु, यत् संसारे जनितजनकप्रेमबन्धः गरीयान् ( अस्ति ) ॥ ८४ ॥

( प्रकाशः ) भ्रातः !–बन्धो !, अमृतैः–पीयूषैः, भुवनम्–जगत्, तर्पयन्तम्–प्रीणयन्तम्, भवन्तम्–श्रीमन्तम्, तातम्–पितरम्, आलोक्य–निरीक्ष्य, द्राक्–शीघ्रम्, ते–तावकीना, तनूजा–दुहिता, नर्मदा–इन्दुजा, 'नर्मदा सोमोद्भवा' इत्यमरः। मुदिता–आनन्दिता, भवतु–जायताम्, च–पुनः, क्षणेन–निमेषात्, भवान् अपि–श्रीमानपि, उपेत्य–तन्निकटं गत्वा, प्राप्तोल्लासः–अधिगतानन्दः, भवतु–जायताम्, यत्–यतो हि, संसारे–भवे, जनितजनकप्रेमबन्धः–तातसुतप्रणयग्रन्थिः, अपत्यस्नेहसम्बन्धः, गरीयान्–महान् सर्वतोऽधिकः श्रेष्ठ वर्तते इतियावत्। अर्थान्तरम् ॥ ८४ ॥

( ८५ )

भृगुपुरतः श्रीसूर्यपुरं पञ्चयोजनमात्रविप्रकृष्टमत्रत्यसर्वो हि प्रदेशोऽनूपः शाद्वलश्च, श्रीमान् शनैः शनैरवलोकयन्निदं सूर्यपुरोपान्तं यायादित्याह–तत्रेति––

**तत्र स्थित्वा भृगुपुरमहा–वप्रवातायनाग्रे,**
**दृष्ट्वा हृष्टो निजतनुभुवो धावनोद्वल्गनानि ॥**
**गच्छेः स्वच्छे तरणिनगरो–पान्तभूमिप्रदेशे,**
**श्रीश्रीपूज्य–क्रमविहरण–ध्वस्तपापप्रवेशे ॥ ८५ ॥**

( अन्वयः ) तत्र भृगुपुरमहावप्रवातायनाग्रे स्थित्वा निजतनुभुवः धावनोद्वल्गनानि दृष्ट्वा हृष्टः ( त्वम् ) श्रीश्रीपूज्यक्रमविहरण–ध्वस्तपापप्रवेशे स्वच्छे तरणिनगरोप्रान्तभूमिप्रदेशे गच्छेः ॥ ८५ ॥

( प्रकाशः ) तत्र–तस्मिन्, भृगुपुरमहावप्रवातायनाग्रे–भृगुकच्छनगरश्रेष्ठकोट्टगवाक्षपुरः, स्थित्वा–अवस्थितिं विधाय, निजतनुभुवः–स्वीयदुहितुः, नर्मदायाः, धावनोद्वल्गनानि–द्रुतद्रुततरगमनानि, तरङ्गभङ्गभङ्गिप्रयाणानि, दृष्ट्वा––अवलोक्य, हृष्टः–प्रीतः सन् त्वम्, श्रीश्रीपूज्यक्रमविहरणध्वस्तपापप्रवेशे–श्रीमद्भट्टारकाचार्यपादप्रचारप्रणष्टदुरितागमे, अत्र हि प्रदेशे सूरिपादैः प्रभूतं विहृतमिति नात्र पापप्रवेशो भवतीतिभावः, स्वच्छे–निर्मले, तरणिनगरोपान्तभूमिप्रदेशे–सूर्यपुरसमीपवर्ति क्षेत्रसन्निवेशे, गच्छेः–यायाः, विवक्षातः कारकाणीति प्रकृते गम्धातोः कर्मणोऽधिकरणत्वेन विवक्षितत्वात्सप्तमी ॥ ८५ ॥

( ८६ )

तत्रत्यं विविधविटपिविलासं वर्णयति खर्जूरीणामिति—

**खर्जूरीणां विपिनपटली तुङ्गतालद्रुमाणां,**
**तत्र श्रेणि-स्तपनतनया-तीरभूमिप्ररूढा ॥**
**मन्दं मन्दं प्रसृमरमरुत्-कम्पिता मौलिकम्पैः,**
**श्लाघामन्तः सृजति नगर-स्यास्य लोकान्तरस्य ।८६।**

( अन्वयः ) तत्र तपनतनयातीरभूमिप्ररूढा खर्जूरीणां विपिनपटली तुङ्गतालद्रुमाणां श्रेणिः मन्दं मन्दं प्रसृमरमरुत्कम्पिता अस्य नगरस्य लोकान्तरस्य ( च ) मौलिकम्पैः अन्तः श्लाघां सृजति ॥ ८६ ॥

( प्रकाशः ) तत्र-सूर्यपुरसमीपप्रदेशे, तपनतनयातीरभूमिप्ररूढा-तापीतटभूभागोद्गता, खर्जूरीणाम्-तन्नामविख्यातवृक्षविशेषाणाम्, विपिनपटली-काननकलापः, तुङ्गतालद्रुमाणाम्-उच्चैस्तरतृणराजवृक्षाणाम्, 'तृणराजस्तलस्तालः' इति हैमः । श्रेणिः-ततिः, मन्दं मन्दं प्रसृमरमरुत्कम्पिता-शनैः शनैः वहमानपवमानान्दोलिता, प्रसरतीत्येवं शीलः । प्रसृमरः 'सृघस्यदो मरक्' ।५।२।७३। इति मरक्, अस्य-पुरःस्थितस्य, नगरस्य-पुरस्य, लोकान्तरस्य च-अन्यज्जनस्यापि, मौलिकम्पैः-शिरोविधूननैः, अन्तःश्लाघाम्-मनसि प्रशंसनम्, हृदयह्लादमितियावत्, सृजति-जनयति ॥ ८६ ॥

( ८७ )

तापीमनुकारयति स्वर्गगङ्गया पोतेति—

**पोतश्रेणी-परिचयमिषा-त्तीरवेल्लद्विमाना,**
**मज्जद्वृन्दा-रकवरवधू-र्नागरैर्नागरीभिः ॥**
**स्वादुस्वच्छ-स्फटिकरुचिरा-म्भोभरैरुत्तरङ्गा,**
**तापी तत्र श्रयति तटिनी स्वर्गगङ्गानुकारम् ॥८७॥**

(अन्वयः) तत्र पोतश्रेणीपरिचयमिषात् तीरवेल्लद्विमाना, नागरैः नागरीभिः मज्जद्वृन्दारकवरवधूः, स्वादुस्वच्छस्फटिकरुचिराम्भोभरैः उत्तरङ्गा तापीतटिनी स्वर्गगङ्गानुकारं श्रयति ।८७।

(प्रकाशः) तत्र—सूर्यपुरोपान्ते, **पोतश्रेणीपरिचयमिषात्**—तरीततिसम्बन्धव्याजात्, **तीरवेल्लद्विमाना**—तीरे वेल्लन्तो विमाना यस्याः सा, तटविराजदमररथा, प्रचलन्ति प्रभूताः पोता अस्यास्तीरे ते च विमानकल्पा भान्तीतिभावः, **नागरैः नागरीभिः**—पुरनिवासिनरनारीभिः, **मज्जद्वृन्दारकवरवधूः**—स्नानं विदधन्निर्जरनायकनायिका, प्रवाहेऽस्याः प्रमज्जन्नरनार्यः सुररमणरमणीसदृशाः शोभन्त इत्याशयः, प्रशस्तं वृन्दमस्त्येषां वृन्दारकाः 'वृन्दादारकः' ।७।२।११। इत्यारकः, **स्वादुस्वच्छस्फटिकरुचिराम्भोभरैः**—मधुरामलचन्द्रकान्तकान्तिकान्तसलिलसमूहैः, **उत्तरङ्गा**—समुच्छलल्लहरीललामा, **तापीतटिनी**—दिनपतिदुहिता तरङ्गिणी, **स्वर्गगङ्गानुकारम्**—नभोमन्दाकिनीसादृश्यम्, **श्रयति**—अवाप्नोति । उपमा ॥ ८७ ॥

( ८८ )

समुद्रेण सहास्याः सङ्गमस्त्वया न दरीदृश्य इत्याह **एनामिति**—

**एनां सङ्ग-च्छति जलनिधिः प्रत्यहं द्विस्त्रिरस्याः,**
**सौभाग्येना-तिशयगुरुणा कार्मणेनेव वश्यः ॥**
**अभ्रच्छन्न-स्त्वमपि भविता-स्येतयोर्योगकाले,**
**पित्रोः पश्यन् क इह सुरतं लज्जते नो जडोऽपि ।८८।**

( अन्वयः ) अस्याः अतिशयगुरुणा सौभाग्येन कार्मणेन वश्यः इव जलनिधिः प्रत्यहं द्विस्त्रिः एनां सङ्गच्छति, एतयोः योगकाले त्वमपि अभ्रच्छन्नः भवितासि, ( यतः ) इह पित्रोः सुरतं पश्यन् जडोऽपि कः नो लज्जते ॥ ८८ ॥

( **प्रकाशः** ) **अस्याः**–तापीतटिन्याः, **अतिशयगुरुणा**–महत्तरेण, **सौभाग्येन कार्मणेन**–स्वामिस्नेहसम्पादकभाग्यविशेषरूपमूलकर्मणा, सन्दिष्टं कर्मैव कार्मणं वृद्धपरम्परोपदेशात् ' कर्मणः सन्दिष्टे ' ।७।२।१६७। इति स्वार्थिकोऽण् ' कार्मणं मूलकर्म ' इति हैमः । **वश्यः**–स्वाधीनः, **इव**–किमु, **जलनिधिः**–मकराकरः, **प्रत्यहम्**–सदैव, **द्विस्त्रिः**–द्विवारं त्रिवारम्, ' द्वित्रिचतुरः सुच् ' ।७।२।११०। इति सुच्, **एनाम्**–पुरो विलसन्तीं तापीनदीम्, **सङ्गच्छति**–सङ्गममनुभवति, संपूर्वकस्य गम् धातोः ' समोगमृच्छि–' ।३।३।८४। इति कथं नाम नात्मनेपदतेति न शङ्क्यम्, कर्मासत्त्वे तद्विधानात्, प्रकृते तु कर्मणः सद्भावात्तदप्राप्तेः। **एतयोः**–अनयोस्तापीसमुद्रयोः, **योगकाले**–सङ्गमसमये, **त्वमपि**–श्रीमाँस्तु, **अभ्रच्छन्नः**–मेघलीनः, **भवितासि**–भविष्यसि, यतः **इह**–संसारे, **पित्रोः**–जननीजनकयोः, **सुरतम्**–सम्भोगम्, मदनविलासमितियावत्, **पश्यन्**–विलोकमानः, **जडोऽपि कः**–

अपटुबटुरपि कः प्राणी, नो लज्जते-नहि जिह्रेति अर्थात् सर्वेऽपि व्रीडामनुभवन्ति ॥ ८८ ॥

( ८९ )

आचार्यपादविहरणतोऽत्रत्या भूमिर्दोषापेता समृद्धिभूयिष्ठा च वर्तते इत्याह तत्रेति—

**तत्र श्रीम-त्तपगणपतेः सद्विहारानिलोर्मि-**
**प्लुष्टातङ्कां फलदलसुम-स्फातिसम्पन्नवृक्षाम् ।**
**इष्टानेहः-परिगतघनो-द्भासिभूयिष्ठशस्यां,**
**द्रक्ष्यस्यर्ह-त्समवसरणा-पास्तदोषामिव क्ष्माम् ॥८९॥**

( अन्वयः ) तत्र श्रीमत्तपगणपतेः सद्विहारानिलोर्मिप्लुष्टातङ्कां फलदलसुमस्फातिसम्पन्नवृक्षाम् इष्टानेहःपरिगतघनोद्भासिभूयिष्ठशस्याम् अर्हत्समवसरणापास्तदोषाम् इव क्ष्मां (त्वं) द्रक्ष्यसि ॥ ८९ ॥

( प्रकाशः ) तत्र-श्रीसूर्यपुरप्रदेशे, **श्रीमत्तपगणपतेः**-श्रीमत्तपागच्छस्वामिनः, श्रीतपागणगगनाङ्गणगगनमणेरितियावत्, **सद्विहारानिलोर्मिप्लुष्टातङ्काम्**--शोभनचरणसञ्चरणसमीरलहरी-क्लान्तक्लमाम्, **फलदलसुमस्फातिसम्पन्नवृक्षाम्**-फल-पत्र-पुष्प-वृद्धि-समृद्धि-समन्वितद्रुमाम्, 'स्फातिर्वृद्धौ' इति हैमः। **इष्टानेहःपरिगतघनोद्भासिभूयिष्ठशस्याम्**-अभीष्टसमयसमागत-स्तनयित्नुविकासिबहुतरधान्याम्, काले वर्षति मेघ इति शस्य-निष्पत्तिः साधीयसी भवत्यत्रेत्याशयः। न ईहते चेष्टते अनेनाघ्रात इत्यनेहाः 'नञ ईहे-' (उणा० ९७५) इत्यस्, 'समयो दिष्टा-

नेहरौ' इति हैमः। बहोर्णीष्ठे भूय्' ।७।४।४०। इति भूयादेशे भूयिष्ठः, **अर्हत्समवसरणापास्तदोषाम् इव**–यथा तीर्थपतिदेशनास्थानदूरीकृतापायाम्, यत्र जिननाथस्य विहरणमुपदेशभूमिश्च भवति तत्र सपादयोजनशतप्रमितप्रदेशे पूज्यपरमात्मपादप्रभावात् रोगवैरेतिमार्यतिवृष्ट्यवृष्टिदुर्भिक्षस्वपरचक्रभयादयो दोषा न सम्भवन्ति तथेतिभावः। **क्ष्माम्**–वसुन्धराम्, **त्वम् द्रक्ष्यसि**–प्रत्यक्षं प्रापयिष्यसि॥ उपमा॥ ८९॥

( ९० )

तत्र कम्राः कदल्यो नितान्ता वनान्ताश्च सन्तीत्याह **नम्रीभूता इति**—

**नम्रीभूताः प्रतिपदमहो लुम्बिवृन्दैः फलानां,**
**स्वर्णैर्योषा इव धनवतां सन्ति कम्राः कदल्यः॥**
**स्निग्धच्छायै–र्मधुरफलदै–र्मण्डपैर्गोस्तनीनां,**
**गेहैर्ग्रामा इव सुमनसां तत्र कान्ता वनान्ताः॥९०॥**

( अन्वयः ) तत्र अहो प्रतिपदं फलानां लुम्बिवृन्दैः नम्रीभूताः कम्राः कदल्यः स्वर्णैः धनवतां योषा इव स्निग्धच्छायैः मधुरफलदैः गोस्तनीनां मण्डपैः कान्ताः वनान्ताः सुमनसां गेहैः ग्रामा इव सन्ति॥ ९०॥

( प्रकाशः ) **तत्र**–सूर्यपुरोपान्तप्रदेशे, **अहो**–अद्भुतम्, **प्रतिपदम्**–स्थाने स्थाने, **फलानां लुम्बिवृन्दैः**–लम्बायमानफलसमूहैः, मध्यस्थितेषत्स्थूलयष्टिकामवलम्ब्य परीतोऽधाऽधः कदलीफलानि शतशो भवन्तीतिभावः, **नम्रीभूताः**–अनम्रा नम्रा अभव-

न्निति नम्रीभूताः, फलभारेणावनता इतियावत्, कम्राः–मनोज्ञाः, कदल्यः–रम्भाः, स्वर्णैः–कनकाभरणभारैः, धनवताम्–श्रीमताम्, योषा इव–यथा कामिन्यः, 'पोषायोषित्' इति हैमः। हिरण्यालङ्कारकलापनम्रीभूतकम्रलक्ष्मीपतिललनावत् कदल्योऽपि राजन्त इतिभावः। स्निग्धच्छायैः–स्निग्धा छाया येषान्ते तैः, रसिकप्रतिबिम्बैः, मसृणप्रभैरिति यावत्, 'स्निग्धे मसृणचिक्कणे' इति हैमः। मधुरफलदैः–स्वादुफलार्पकैः, गोस्तनीनाम्–मृद्वीकानाम्, गोस्तनाभा–गोस्तनी 'द्राक्षा तु गोस्तनी मृद्वीका' इति हैमः, मण्डपैः–जनविश्रामस्थानैः, कान्ताः–मनोरमाः, वनान्ताः–विपिनविभागाः, सुमनसाम्–प्रज्ञाशालिनाम्, पण्डितानामितियावत्, गेहैः–सदनैः, ग्रामा इव–लघुपत्तनानि यथा, यथा विबुधानां निवासैर्ग्रामा राजन्ते तथा द्राक्षाणां मधुरमण्डपैर्वनखण्डा अपीतिभावः, सन्ति–वर्तन्ते। उपमा॥ ९० ॥

( ९१ )

सूक्तद्वयेन तत्रत्यमुद्यानं वर्णयति दीप्तेति—

**दीप्ता पुष्पै–रविरलदला मण्डली चम्पकानां,**
**तत्रोद्याने तुलयति फलै–र्लक्षिता पल्लवैश्च ॥**
**नागश्रेणी–ममसृणसृणिं हेमघण्टावलीढां,**
**[चित्रैर्गुच्छै–र्विविधभरणै–र्मण्डितां वस्त्रखण्डैः] ९१**

( अन्वयः ) तत्र उद्याने पुष्पैः दीप्ता अविरलदला फलैः पल्लवैश्च लक्षिता चम्पकानां मण्डली अमसृणसृणिं हेमघण्टावलीढां चित्रैर्गुच्छैः विविधभरणैः वस्त्रखण्डैः मण्डितां नागश्रेणीं तुलयति ॥ ९१ ॥

( प्रकाशः ) तत्र–सूर्यपुरदेशे, उद्याने–आक्रीडे, उपवन इति यावत्, ' आक्रीडः पुनरुद्यान ' मिति हैमः, । पुष्पैः दीप्ता–प्रसूनैः प्रकाशिता, अविरलदला–सघनपत्रा, पूर्णपर्णेतियावत्, फलैः पल्लवैश्च लक्षिता–फलकिसलयकलापाभिव्यक्ता, ' नवे तस्मिन् किसलयं किसलं पल्लवः ' इति हैमः । चम्पकानां मण्डली–हेमपुष्पकानां चक्राकारेण समूहस्थितिः, ' चम्पको हेमपुष्पकः ' इति हैमः । अमसृणसृणिम्–कठिनाङ्कुशाम्, न मसृणः अमसृणस्तादृशः सृणिर्यत्र ताम्, ' मसृणोऽकठिने स्निग्धे, इत्यनेकार्थसङ्ग्रहः, ' अङ्कुशः सृणिः ' इति हैमः । हेमघण्टावलीदाम्–कनकवरकिङ्किणीकलिताम्, चित्रैर्गुच्छैः–नानाविधस्तबकैः, विविधभरणैः–अनेकप्रकारालङ्करणैः, वस्त्रखण्डैः–वसनविभागैः, मण्डिताम्–विभूषिताम्, नागश्रेणीम्–करिवरावलिम्, तुलयति–सदृशयति ॥ उपमा ॥ ९१ ॥

( ९२ )

**उद्यानानां नगरमभितः सन्ततिर्भाति नाना–**
**वृक्षैर्लक्षै–र्विविधसुमनः–संवितानां लतानाम् ॥**
**क्रीडद्दम्पत्युचितकदली–मन्दिरैर्बालकानां,**
**गेहैः क्रीडा–भवनसरसी–दीर्घिकावापिकाभिः ॥९२॥**

( अन्वयः ) नगरम् अभितः उद्यानानां सन्ततिः विविधसुमनःसंवितानां लतानां लक्षैः नानावृक्षैः क्रीडद्दम्पत्युचितकदलीमन्दिरैः बालकानां गेहैः क्रीडाभवनसरसीदीर्घिकावापिकाभिः भाति ॥ ९२ ॥

( प्रकाशः ) नगरम् अभितः–सूर्यपुरं परितः, ' सर्वोभयाभिपरिणा तसा ' ।२।२।३५। इति द्वितीया, उद्यानानाम्–आक्रीडानाम्, उपवनानामिति यावत्, सन्ततिः–श्रेणी, विविधसुमनःसंवितानाम्–नानाप्रकारप्रसूनपरीतानाम्, लतानाम्–वल्लरीणाम्, ' व्रततिर्वल्लरी लता ' इति धनञ्जयनाममाला, लक्षैः नानावृक्षैः–शतसहस्रसङ्ख्यैरनेकप्रकारैः पादपैः, क्रीडद्दम्पत्युचितकदलीमन्दिरैः–विलसज्जायापतियोग्यरम्भासदनैः, बालकानां गेहैः–शिशूनां हर्म्यैः, क्रीडाभवनसरसीदीर्घिकावापिकाभिः–लीलावाससरोवरादिजलाशयविशेषैः, शतत्रयधनुःप्रमितायत–परिमाणा दीर्घिका, शतचतुष्टयप्रमितस्तु द्रोणस्ततो दशगुणा वापिका, यदुक्तम्, ' शतेन धनुर्भिः पुष्करिणी, त्रिभिर्दीर्घिका चतुर्भिर्द्रोणः, पञ्चभिस्तडागः, द्रोणाद्दशगुणा वापी' इति, भाति–विराजति॥९२॥

( ९३ )

तत्र तपनतनयातटिनीतटस्थिततरीततिराश्चर्यजननीत्याह पोतानिति—

**पोतान् पोता–निव जलनिधेः कुक्षिनिक्षिप्तनाना–**
**वस्तुस्तोमाँश्चतुर ! भविता पश्यतस्ते विलम्बः ॥**
**जाग्रज्जैत्र–ध्वजपरिगता–ञ्जङ्गमद्रङ्गतुल्यान्,**
**पश्यन्नेता–न्न भवति जनः कोऽत्र विक्षिप्तचेताः ॥९३॥**

( अन्वयः ) चतुर ! कुक्षिनिक्षिप्तनानावस्तुस्तोमान् जलनिधेः पोतानिव पोतान् पश्यतः ते विलम्बः भविता, अत्र

जाग्रज्जैत्रध्वजपरिगतान्, जङ्गमद्रङ्गतुल्यान् एतान् पश्यन् कः जनः विक्षिप्तचेताः न भवति ॥ ९३ ॥

( प्रकाशः ) चतुर !–दक्ष ! दक्षदुहितृदयित !, कुक्षिनिक्षिप्तनानावस्तुस्तोमान्––क्रोडनिहितानेकप्रकारपदार्थप्रकरान्, अनेन बालस्वभावो वर्णितः जलनिधेः–समुद्रस्य, पोतानिव–पृथुकवत्, पुनाति गात्रमितिपोतः, पोतान्–प्रवहणान्, ' वोहित्थं वहनं पोतः' इति हैमः। पश्यतः–दरीदृश्यतः, ते–तव, विलम्बः–भूयान्काललक्षेपः, भविता–भविष्यति, जाग्रज्जैत्रध्वजपरिगतान्–प्रस्फुरद्विजयशीलपताकापरिकलितान्, जेतैव जैत्रः प्रज्ञादित्वादण्, जङ्गमद्रङ्गतुल्यान्–चराचरनगरनिभान्, एतान्–प्रत्यक्षस्थितान् पोतान्, पश्यन्–विलोकमानः, कः जनः–को हि प्राणी, विक्षिप्तचेताः–अद्भुतदर्शनजन्याश्चर्येणास्वस्थस्वान्तः, विस्फारितविलोचनः विचलितचित्तश्च जायते जनोऽकल्पितावलोकनेनेत्याशयः, न भवति–न खलु जायते, अर्थात् सर्वोऽपि लोकः प्रभवत्येव ॥ ९३ ॥

( ९४ )

सूर्यपुरस्य प्राकारं वर्णयति दुर्ग इति—

दुर्गो भर्गो–ज्ज्वलवपुरिहो–त्कन्धरश्चन्द्रशाला–<br>
दम्भात्सौध–च्छदिरुपचितो मौक्तिकच्छत्रशाली ॥<br>
नानायन्त्र–प्रहरणधरो युद्धसज्जोग्रशस्त्रः,<br>
क्षत्रस्यैष श्रयति सुषमां धैर्यगर्वोद्धुरस्य ॥९४॥

( अन्वयः ) इह भर्गोज्ज्वलवपुः चन्द्रशालादम्भात् उत्क-

न्धरः सौधच्छदिरुपचितः मौक्तिकच्छत्रशाली नानायन्त्रप्रहरणधरः युद्धसज्जोग्रशस्त्रः एष दुर्गः धैर्य्यगर्वोद्धुरस्य क्षत्रस्य सुषमां श्रयति ॥ ९४ ॥

( प्रकाशः ) इह–श्रीसूर्यपुरपरितः, **भर्गोज्ज्वलवपुः**–सूर्यमण्डलस्थितप्रभाप्रतिमप्रभया विशदकायः, 'आदित्यान्तर्गतं वर्चो भर्गाख्यम्' इति याज्ञवल्क्यः, **चन्द्रशालादम्भात्**–शिरोगृहव्याजात्, प्राकारोपरि क्वचित्क्वचिच्चन्द्रशालाशालिसदनानि भवन्तीतिभावः, **उत्कन्धरः**–उन्नतग्रीवः, **सौधच्छदिरुपचितः**––प्रासादपटलपरिपुष्टः, छाद्यतेऽनेन च्छदिः क्लीबलिङ्गः 'रुच्यर्चि–' (उणा० ९८९ ) इतीस् ' छदेरिस्मन्–' ।४।२।३३। इति ह्रस्वः, ' पटलच्छदिषी समे ' इति हैमः । **मौक्तिकच्छत्रशाली**–मुक्तासंशोभितातपवारणविराजितः, भवति हि प्राकारे शुक्तिजराजिरचनारम्यं छत्रं विशिष्टपाषाणसम्पादितं यत्र हि विश्रामार्थं स्थीयते जनैरितिभावः, छाद्यत इति च्छत्रम्, उणादित्वात्त्रट् पूर्ववद्ध्रस्वश्च, **नानायन्त्रप्रहरणधरः**–विविधयन्त्रायुधभृत्, **युद्धसज्जोग्रशस्त्रः**–युद्धाय सज्जानि उग्रशस्त्राणि यत्र सः, रणसन्नद्धतीक्ष्णास्त्रः, **एष दुर्गः**–अयं प्राकारः, **धैर्य्यगर्वोद्धुरस्य**–धीरताभिमानोन्नतस्य, **क्षत्रस्य**–क्षत्रियस्य, ' क्षतात् किल त्रायत इत्युदग्रः, क्षत्रस्य शब्दो भुवनेषु रूढः ' इति रघुवंशः, **सुषमाम्**–रामण्यम्, **श्रयति**–अनुकरोति, यथा राजन्यस्तेजसा जाज्वल्यमानशरीरः उन्नतग्रीवः प्रासादपटलोपेतः मुक्ताछत्रशाली नानायन्त्रशस्त्रशाली समरसन्नद्धतीव्रप्रहरणो भवति तथायं दुर्गोऽपीति भावः ॥

॥ उपमा ॥ ९४ ॥

( ९५ )

श्रीसूर्यपुर एको विभागो गोपीपुरेत्याख्यया ख्यातिमधिगतवान्नास्ते तत्र निदानं तन्निकटवर्तिगोपीनामसरस्तत्खलु ग्रन्थकारसमये सुन्दरं महच्चासीदिति कृतवर्णनतोऽनुमीयते तथाहि गोपीति—

**गोपीनाम्नः किमिह सरसो वर्णयामो महत्त्वं,**
**यत्क्षीराब्धेः कलयति कलां मथ्यमानस्य नो चेत् ॥**
**आस्ते कुक्षौ किमिह निहितो मेरुरद्यापि किंवा,**
**वीचिक्षोभो मथनजनित-त्रासतोऽत्रागतस्य ॥९५॥**

( अन्वयः ) इह गोपीनाम्नः सरसः महत्त्वं किं वर्णयामः यत्मथ्यमानस्य क्षीराब्धेः कलां कलयति नो चेत् इह कुक्षौ अद्यापि किं मेरुः निहितः आस्ते किंवा मथनजनितः अत्र आगतस्य वीचिक्षोभः ( आस्ते ) ॥ ९५ ॥

( प्रकाशः ) इह—सूर्यपुरे, **गोपीनाम्नः**—गोपीतिप्रसिद्धाभिधानस्य, **सरसः**—सरोवरस्य, **महत्त्वम्**—श्रेष्ठताम्, रमणीयतामितियावत्, **किं वर्णयामः**—किंतावत् कथयामः, **यत्**—यत्सरः, **मथ्यमानस्य क्षीराब्धेः**—मथनमापाद्यमानस्य दुग्धाम्बुधेः, **कलाम्**—शोभाम्, विभूतिमितियावत्, **कलयति**—अङ्गीकरोति, **नो चेत्**—नैवं सति, तत्र सरसि घूघूरवो महान् तरङ्गभङ्गश्च भवत इत्यत्र किं कारणम्, तदर्थमुत्प्रेक्षते उत्तरार्धेन—**इह कुक्षौ**—सरसो मध्यभागेऽत्र, **अद्यापि**—एतद्दिनावधिरपि, **किं मेरुः**—किमुत मन्दरमहीधरः, **निहितः**—संस्थापितः, **आस्ते**—वर्तते, **किंवा**—किमथवा, **मथनजनितत्रासतः**—विलोडनोत्पादितभयतः, **अत्र**—इह, **आगतस्य**—

समायातस्यास्य सरसः, इदं हि सरः क्षीराब्धेः शिशुरूपेणासीत् तत्सन्निधावेव परं यदा क्षीरोदस्य मथनमभूत्तदा भयभीतमेतत् ततो पलाय्यात्र भीतिरहितप्रदेशे समागतमित्यधुनापि तद्भयजनितकम्पेनात्र तरङ्गाणि समुच्छलन्ति महता वेगेनेत्याशयः, वीचिक्षोभः–तरङ्गाणामतिवेगसञ्चारः, आस्त इति शेषः । उत्प्रेक्षा ॥ ९५ ॥

( ९६ )

नगरं नानाविधवर्णरूपेण निरूपयति नीलेति–

**नीलच्छायं क्वचिदविरलै–र्नागवल्लीदलौघैः,**
**शुभ्रच्छायं क्वचन कुसुमै–र्विस्तृतैर्विक्रयाय ॥**
**पिङ्गं चङ्गै–रतिपरिणतैः कुत्रचिच्चेक्षुदण्डै–**
**र्नानावर्णं पुरमिदमिति द्योतते सर्वदापि ॥९६॥**

( अन्वयः ) क्वचित् अविरलैः नागवल्लीदलौघैः, नीलच्छायं क्वचन विक्रयाय विस्तृतैः कुसुमैः शुभ्रच्छायं कुत्रचिच्च अतिपरिणतैः चङ्गैः इक्षुदण्डैः पिङ्गम् इति इदं पुरं सर्वदापि नानावर्णं द्योतते ॥ ९६ ॥

( प्रकाशः ) **क्वचित्**–स्थलविशेषे, **अविरलैः**–सघनैः, **नागवल्लीदलौघैः**–ताम्बूललतायाः पलाशकलापैः, अनेन अत्रत्य प्रदेशे ताम्बूलपत्राणां प्रचुरोत्पत्तिर्जनाश्च तदास्वादने बद्धस्पृहा इति व्यज्यते, पातालानीतत्वात् नागस्य वल्ली नागवल्ली, **नीलच्छायम्**–हरित्प्रभम्, यद्यपि नीलशब्दस्य श्यामवर्णे शक्तत्वेऽपि प्रकृते तात्पर्यानुपपत्तितः पीतनीले लक्षणावसेयाऽथवा सेनो भीमसेन इति–नीलः पीतनील इति हरिदर्थो विज्ञेयः, **क्वचन**–कस्मिँश्चत्स्थाने,

विक्रयाय-मूल्यमासाद्य परार्पणव्यापाराय, विस्तृतैः-व्यासतः स्थितैः,कुसुमैः-प्रसूनैः, शुभ्रच्छायम्-उज्ज्वलकान्ति, कुत्रचिच्च-कुहचन तु, अतिपरिणतैः-बहुपक्वैः, चङ्गैः-हृदयङ्गमैः, इक्षुदण्डैः-पुण्ड्रयष्टिभिः, पिङ्गम्-पीतरक्तम्, अतिपरिणता हि त इक्षुदण्डाः कपिलवर्णा भवन्तीतिभावः, इति-एवंस्थिते, इदं पुरम्-नगरमेतत्, सर्वदापि-अनिशमेव, नानावर्णम्-विविधरूपम्, द्योतते-राजते, चित्रवच्चकास्तीति यावत् ॥ ९६ ॥

( ९७ )

पूर्वसूक्तेन केवलमत्र पत्रपुष्पपुण्ड्रप्रमुखमेव विक्रीयते नान्यदिति मा भूद्भ्रमोऽत आह पोतोत्तीर्णेति—

**पोतोत्तीर्णा-म्बुधिपरतटो-द्भाविनो वस्तुवृन्दान्,**
**द्राक् सङ्ख्यातुं क इह गणना-कोविदोऽपि क्षमेत ॥**
**इष्टे मातुं क इव विरजः-स्वर्णमाणिक्यपुञ्जान्,**
**गुञ्जानेमा-रुणतररुची-श्चाङ्कुरान् विद्रुमाणाम् ॥९७॥**

( अन्वयः ) इह पोतोत्तीर्णाम्बुधिपरतटोद्भाविनः वस्तुवृन्दान् गणनाकोविदोऽपि कः द्राक् सङ्ख्यातुं क्षमेत विरजः स्वर्णमाणिक्यपुञ्जान् च गुञ्जानेमारुणतररुचीन् विद्रुमाणाम् अङ्कुरान् कः मातुम् इष्टे इव ॥ ९७ ॥

( प्रकाशः ) इह-सूर्यपुरे, पोतोत्तीर्णाम्बुधिपरतटोद्भाविनः-प्रवहणसमागतसमुद्रपश्चिमकूलसम्भूतान्, सागरावरतीरसञ्जातान् तरीद्वारा आनीतांश्चेतियावत्, वस्तुवृन्दान्-पदार्थ-

प्रकरान्, गणनाकोविदोऽपि–सङ्ख्यानसङ्ख्यावानपि, गणितज्ञप्रवरोऽपि, कः–को जनः, द्राक्–अविलम्बेन, सङ्ख्यातुम्–गणयितुम्, क्षमेत–स्यात्समर्थः, विरजःस्वर्णमाणिक्यपुञ्जान्–निर्मलहिरण्यमाणिक्यप्रमुखमणिविशेषनिकरान्, च–पुनः, गुञ्जानेमारुणतररुचीन्–कृष्णलार्धातिरक्तकान्तीन्, गुञ्जाया नेमस्तद्वदरुणतरा रुचिर्येषान्ते तान्, 'कृष्णला तु गुञ्जा' 'खण्डेऽर्धशकले भित्तं नेमशल्कदलानि च' इति हैमः विद्रुमाणाम्–प्रवालानाम्, अङ्कुरान्–अङ्कूरान्, अग्रभागानितियावत्, कः–कः प्रमाता, मातुम्–प्रमातुम्, ईष्टे–सामर्थ्यमवाप्नुयात्, इव–यथा, यथाऽत्रत्यकनकमणिमाणिक्यप्रवालाङ्कूरादिपुञ्जान् गणयितुं न कश्चिदीशस्तथाऽब्धिपरतटागतान्यपदार्थप्रकरानपि सङ्ख्यातुं न कश्चित्समर्थः ॥ ९७ ॥

( ९८ )

अत्रत्यां टङ्कशालां निरूपयति रूप्येति—

**रूप्यस्वर्ण–प्रकरघटन–प्रोत्थितैष्टङ्कशाला–**
**गर्भोद्भूत–प्रतिरवशतै–स्तारतारैष्टकारैः ॥**
**नात्र क्वापि प्रभवितुमलं दुष्टदौर्गत्यभूतः,**
**पूतः क्षौद्रे ह्युपशमविधौ मन्त्रसारष्टकारः ॥९८॥**

( अन्वयः ) अत्र क्वापि रूप्यस्वर्णप्रकरघटनप्रोत्थितैः टङ्कशालागर्भोद्भूतप्रतिरवशतैः तारतारैः टकारैः दुष्टदौर्गत्यभूतः प्रभवितुम् अलं न हि क्षौद्रे उपशमविधौ मन्त्रसारः टकारः पूतः ॥ ९८ ॥

( प्रकाशः ) अत्र–सूर्यपूरे, क्वापि–कुत्रचिदपि स्थाने, रूप्य-

**स्वर्णप्रकरघटनप्रोत्थितैः**–रजतकनकसमूहसङ्घटनसमुत्थितैः, मुद्रादिकरणे टङ्काघातेनोद्भूतैरितियावत्, **टङ्कशालागमोद्भूतप्रतिरवशतैः**–मुद्रामुद्रणालयान्तरालप्रादुर्भूतप्रतिशब्दशतैः, **तारतारैः**–अत्युच्चैः, **टकारैः**–टंटम् इत्यात्मकैः, **दुष्टदौर्गत्यभूतः**–दुःखदायिदारिद्र्यपिशाचः, **प्रभवितुम्**–उपद्रोतुं, **अलम्**–समर्थः,**न हि**–नैव, भवतीतिशेषः, **हि**-यतः, **क्षौद्रे**–अधमसबन्धिनि, **उपशमविधौ**–शान्तिप्रकारे, **मन्त्रसारः**–मन्त्रवरः, **टकारः**-टङ्कारः, शिवेन सम्पाद्य प्रलयताण्डवं टङ्कारमन्त्रेण सर्वे भूतपिशाचादयः स्ववशीकृता इतिपुराणे, ' टङ्कारबलगर्वितः, इति विशेषणमपि शिवस्य प्रसिद्धं साहित्ये, **पूतः**–पवित्रः, अप्युत्तम इतियावत् ॥ ९८ ॥

( ९९ )

सूर्यपुरीयश्राद्धजनवर्णनम् यत्रेति—

**यत्र श्राद्धा-स्ततसुमनसो विश्वमान्या वदान्याः,**
**सङ्ख्यातीता अमितविभवाः प्रौढशाखाप्रशाखाः ॥**
**कुत्राप्याद्या-द्यरकजनिताः संस्थिताः कल्पवृक्षाः,**
**प्रादुर्भूता-स्तपगणपति-प्रौढपुण्यानुभावात् ॥९९॥**

( **अन्वयः** ) यत्र ततसुमनसः विश्वमान्याः वदान्याः अमितविभवाः प्रौढशाखाप्रशाखाः सङ्ख्यातीताः श्राद्धाः (सन्ति) कुत्रापि आद्याद्यरकजनिताः संस्थिताः कल्पवृक्षाः तपगणपति-प्रौढपुण्यानुभावात् प्रादुर्भूताः ॥ ९९ ॥

( **प्रकाशः** ) **यत्र**–यस्मिन् सूर्यपुरनगरे, **ततसुमनसः**–विस्तृतप्रशस्तचित्तान्विताः, सुरेभ्योऽप्यधिका इति यावत्, विश्व·

मान्याः-भुवनाभिमताः, वदान्याः-दानशौण्डाः, अमितविभवाः-प्रमाणातीतैश्वर्यशालिनः, प्रौढशाखाप्रशाखाः-प्रवृद्धपुत्रपौत्रादिसंन्ततिपरिवाराः, सङ्ख्यातीताः-गणनातीताः, श्राद्धाः-श्रमणोपासकाः सन्तीतिशेषः, कुत्रापि-स्थलविशेषे तु, आद्याद्यरकजनिताः-प्रधानप्रथमारकोत्पादिताः, यद्वा एकान्तसुषमसुषमसुषमदुःषमाख्यप्रथमप्रमुखत्रयारजनिताः, संस्थिताः-इदानीं यावत् स्थितिमापन्नाः, कल्पवृक्षाः-सुरद्रुमाः, तपगणपतिप्रौढपुण्यानुभावात्-श्रीमत्तपागच्छाधिपतिप्रकृष्टसुकृतप्रभावात्, प्रादुर्भूताः-बहिरागताः, अयमाशयः कल्पवृक्षास्तु प्रथमाद्यरकत्रये एव सम्भवन्ति परमत्रैते वाञ्च्छामात्रपरिपूरकाः श्राद्धकल्पवृक्षा अधुना कुतः दृश्यन्ते ? नात्र चित्रं ते कल्पवृक्षा एवैतावत्कालं प्रच्छन्नरूपेणासन् परमाचार्यपादप्रभावात् प्राप्ताः प्रकटतामेते श्राद्धरूपेणेतियावत् । उत्प्रेक्षागर्भितरूपकम् ॥ ९९ ॥

( १०० )

श्रीसूर्यपुरस्यार्हन्मन्दिरवर्णनं शिल्पिप्रष्ठैरिति—

**शिल्पिप्रष्ठै रचितविविधा-नेकविज्ञानहृद्यं,**
**हिङ्गुल्वाद्यैः कनकखचितै-र्वर्णकैर्वर्णनीयम् ॥**
**दत्ताऽऽनन्दं सहृदयहृदां वृन्दमर्हद्गृहाणां,**
**चित्रैश्चित्रं क इह न जनो वीक्ष्य चित्रीयतेऽन्तः ॥१००॥**

( अन्वयः ) इह शिल्पिप्रष्ठैः रचितविविधानेकविज्ञानहृद्यं कनकखचितैः हिङ्गुल्वाद्यैः वर्णकैः वर्णनीयं सहृदयहृदां दत्ता-

नन्दं चित्रैः चित्रम् अर्हद्गृहाणां वृन्दं वीक्ष्य कः जनः अन्तः न चित्रीयते ॥ १०० ॥

( प्रकाशः ) इह–नगरेऽस्मिन्, शिल्पिप्रष्ठैः–कुशलकारुभिः, रचितविविधानेकविज्ञानहृद्यम्–सम्पादितानेकप्रकारप्रचुरशिल्पसुन्दरम्, कनकखचितैः–सुवर्णसमन्वितैः, स्वर्णसम्पृक्तैरितियावत्, 'मिश्रःसम्पृक्तः खचितः' इति हैमः, हिङ्गुल्वाद्यैः–हिङ्गुलप्रमुखैः, रक्तवर्णप्रभृतिभिरितियावत्, वर्णकैः–वर्णैः, स्वार्थेकः, ( रङ्ग इतिभाषायाम् ) वर्णनीयम्–रमणीयम्, निरूपणीयमितियावत्, सहृदयहृदाम्–रसिकहृदयानाम्, सुमनसां मनसामितियावत्, दत्तानन्दम्–अर्पिताह्लादम्, चित्रैः चित्रम्–आलेख्यैरनुपमम्, अर्हद्गृहाणां वृन्दम्–जिनालयकदम्बम्, वीक्ष्य–दृष्ट्वा, कः जनः–कः खलु सचेतनश्चेतनः, अन्तः–मनसि, न चित्रीयते–नो विस्मयमुपैति, विलोक्य विभूतां विहारनिकरमत्रत्यममरा अपि आश्चर्यमुपयन्ति का वार्ता प्राकृतप्राणिनामितिभावः ॥ १०० ॥

( १०१ )

तत्र गोपीपुरमध्यस्थितमुपाश्रयं सूक्तद्वयेन वर्णयति मध्य इति–

**मध्ये गोपी-पुरमिह महान् श्रावकोपाश्रयोऽस्ति,**
**कैलासाद्रि–प्रतिभट इव प्रौढलक्ष्मीनिधानम् ॥**
**अन्तर्वृत्या–हृतमतगुरु–प्रौढतेजोभिरुद्य–**
**ज्ज्योतिर्मध्य–स्थितमघवता ताविषेणोपमेयः ॥१०१॥**

( अन्वयः ) इह मध्ये गोपीपुरं कैलासाद्रिप्रतिभट इव

प्रौढलक्ष्मीनिधानम् अन्तर्वर्त्यार्हतमतगुरुप्रौढतेजोभिः उद्यज्ज्योतिः मध्यस्थितमघवता ताविषेण उपमेयः महान् श्रावकोपाश्रयः अस्ति ॥ १०१ ॥

( प्रकाशः ) इह–श्रीसूर्यपुरे, मध्ये गोपीपुरम्–गोपीपुरस्य मध्यभागे, ' पारे मध्येऽग्रेऽन्तः षष्ठ्या वा ' ।३।१।३०। इति षष्ठीसमासोऽव्ययीभावः, कैलासाद्रिप्रतिभट इव–हिमाचलप्रतिस्पर्धिसुभटवत्, ' कैलासे धनदावासो हराद्रिर्हिमवद्धसः ' इति शेषः, प्रौढलक्ष्मीनिधानम्–प्रकृष्टपद्माश्रयः, यथा धनदप्रतिबद्धा श्रीस्तदावासे कैलासे वसति तथा तत्तुल्येऽत्रोपाश्रयेऽपीतिभावः । अन्तर्वर्त्यार्हतमतगुरुप्रौढतेजोभिः–मध्यस्थितजैनशासनाचार्याणां प्रवृद्धप्रभाभिः, उद्यज्ज्योतिः–चकासत्कान्तिः, प्रसरत्प्रभ इति यावत्, मध्यस्थितमघवता–मध्ये स्थितो मघवान् यत्र तेन, अन्तर्निषण्णविबुधस्वामिना, ताविषेण–स्वर्गेण, ' स्वर्गस्त्रिविष्टपं द्यौ दिवौ भुविस्तविषताविषौ ' इति हैमः । उपमेयः–सादृश्ययोग्यः, यथा स्वर्गे सुरेशः सुराश्च तथाऽत्रोपाश्रये सूरीश्वरः श्राद्धाश्चेतिभावः, महान्–श्रेष्ठः, विशाल इतियावत्, श्रावकोपाश्रयः–श्राद्धावश्यकक्रियाकरणावासः, अस्ति–वर्तते ॥ उपमा ॥ १०१ ॥

( १०२ )

**भित्तौ भित्तौ स्फटिकसरुचौ कुट्टिमे कुट्टिमे च,**
**संक्रामँस्त्वं सुभग ! भविताऽस्यात्तलक्षस्वरूपः ॥**
**युक्तश्चैत–त्तरणिनगरो–पाश्रयस्यान्यथाश्री–**
**र्द्रष्टुं शक्या न खलु वपुषै–केन युष्मादृशापि ॥१०२॥**

( अन्वयः ) सुभग ! स्फटिकसरुचौ भित्तौ भित्तौ कुट्टिमे कुट्टिमे च त्वं संक्रामन् आत्तलक्षस्वरूपः भवितासि, एतच्च युक्तम्, अन्यथा युष्मादृशापि एकेन वपुषा तरणिनगरोपाश्रयस्य श्रीः द्रष्टुं न खलु शक्या ॥ १०२ ॥

( प्रकाशः ) **सुभग !** अयि सौभाग्यसम्पन्न ! शशिन् ! **स्फटिकसरुचौ**–स्फटिकसमानस्वच्छकान्तौ, **भित्तौ भित्तौ**–प्रत्येककुड्ये, 'कुडयं भित्तिः' इति हैमः। **कुट्टिमे कुट्टिमे च**–पाषाणबद्धभूभागे सर्वत्र, **सङ्क्रामन्**–प्रतिबिम्बरूपेणान्तर्वर्तिभवन्, **त्वम्**–श्रीमान्, **आत्तलक्षस्वरूपः**–स्वीकृतशतसहस्रस्वीयाकृतिः, **भवितासि**–भविष्यसि, **एतच्च युक्तम्**–समीचीनं खल्विदम्, **अन्यथा**–नैवं चेत्, **युष्मादृशापि**–भवत्कल्पेनापि, **एकेन वपुषा**–अनन्यशरीरेण, **तरणिनगरोपाश्रयस्य श्रीः**–सूर्यपुरश्रावकोपाश्रयस्य सम्पत्तिः शोभा, **द्रष्टुम्**–निरीक्षितुम्, **न खलु**–नैव, **शक्या**–समर्था, उत्प्रेक्षा ॥ १०२ ॥

( १०३ )

उपाश्रयस्य प्राङ्गणप्रदेशं वर्णयति तस्येति—

**तस्य द्वाराङ्गणभुवि भवान् स्थैर्यमालम्ब्य पश्यन्,**
**साक्षाद्देवा-निव नृजनुषो द्रक्ष्यति श्राद्धलोकान् ॥**
**हस्त्यारूढा-नथ रथगतान् सादिनश्चार्थपौरु-**
**ष्यर्थाञ्छ्रोतुं रसिकहृदयाञ् शीघ्रमाटीकमानान् ॥१०३**

( अन्वयः ) तस्य द्वाराङ्गणभुवि भवान् स्थैर्यम् आलम्ब्य पश्यन् अर्थपौरुष्यर्थान् श्रोतुं रसिकहृदयान् हस्त्यारूढान्

अथ रथगतान् सादिनश्च शीघ्रम् आटीकमानान् नृजनुषः श्राद्धलोकान् साक्षाद् देवान् इव द्रक्ष्यति ॥ १०३ ॥

( प्रकाशः ) तस्य–उपाश्रयस्य, द्वाराङ्गणभुवि–प्राङ्गणप्रदेशे, भवान्–श्रीमान्, स्थैर्य्यमालम्ब्य–निश्चलतां धृत्वा, पश्यन्–विलोकमानः, अर्थपौरुष्यर्थान्–द्वितीयव्याख्यानपौरुषीव्याख्यानानि, श्रोतुम्–आकर्णयितुम्, रसिकहृदयान्–सरसमनसः, हस्त्यारूढान्–गजवरोपविष्टान्, अथ–पुनः, रथगतान्–स्यन्दनस्थितान्, सादिनश्च–अश्ववारांश्च, 'अश्ववारः सादी' इति हैमः, शीघ्रम्–त्वरितम्, आटीकमानान्–आगच्छतः, नृजनुषः–नरजन्मात्मकान्, श्राद्धलोकान्–श्रावकजनान्, साक्षाद्–प्रत्यक्षम्, देवान् इव–विबुधान् यथा, द्रक्ष्यति–अवलोकयिष्यते ॥ १०३ ॥

( १०४ )

**माद्यद्भूरि-द्विपमदरसा-श्वीयलालानिपात-**
**क्लीन्नां खिन्ना-मिव घनजन-व्रातसम्मर्दखेदात् ॥**
**द्वारं स्वस्या-ङ्गणभुवमति-प्रेङ्खितैस्तोरणानां,**
**स्नेहादाश्वा-सयति मरुतां प्रेरणेनेव शश्वत् ॥१०४॥**

( अन्वयः ) माद्यद्भूरिद्विपमदरसाश्वीयलालानिपातक्लीन्नां घनजनव्रातसम्मर्दखेदात् खिन्नाम् इव स्वस्य अङ्गणभुवं द्वारं शश्वत् तोरणानाम् अतिप्रेङ्खितैः मरुतां प्रेरणेन स्नेहाद् आश्वासयति इव ॥ १०४ ॥

( प्रकाशः ) माद्यद्भूरिद्विपमदरसाश्वीयलालानिपातक्ली-

**नाम्**–अतिशयमदशालिबहुगजराजदानजलतुरगवदनजलपतनार्द्रीभूताम्, **घनजनव्रातसम्मर्दखेदात्**–निबिडलोकसमूहसङ्घर्षहर्षात्, **खिन्नामिव**–विह्वलामिव, **स्वस्याङ्गणभुवम्**–निजप्राङ्गणपृथ्वीम्, **द्वारम्**–प्रतीहारः, **शश्वत्**–अनिशम्, 'सदासनाऽनिशं शश्वत्' इति हैमः, **तोरणानामतिप्रेङ्खितैः**–बहिर्द्वारि मङ्गलाय मणिमौक्तिकादिनिर्मितदामरूपा रचना बध्यते तत् तोरणं तेषामतिशयान्दोलितैः, **मरुतां प्रेरणेन**–समीरणानां प्रसारणेन, **स्नेहात्**–प्रणयतः, **आश्वासति इव**–सान्त्वयति किमु । उत्प्रेक्षा ॥ १०४ ॥

( १०५ )

व्याख्यानमण्डपवर्णनम् मध्य इति—

**मध्ये तस्याः श्रमणवसते-र्मण्डपो यः क्षणस्य,**
**सोऽयं कान्त्याऽनुहरति सभां तां सुधर्मां मघोनः ॥**
**मुक्ताचन्द्रो-दयपरिचित-स्वर्णमाणिक्यभूषा-**
**श्रेणीदीप्तो विविधरचना-राजितस्तम्भशोभी ॥१०५॥**

( अन्वयः ) तस्याः श्रमणवसतेः मध्ये यः क्षणस्य मण्डपः ( अस्ति ) मुक्ताचन्द्रोदयपरिचितस्वर्णमाणिक्यभूषाश्रेणीदीप्तः विविधरचनाराजितस्तम्भशोभी सोऽयं कान्त्या तां मघोनः सुधर्मां सभाम् अनुहरति ॥ १०५ ॥

( **प्रकाशः** ) **तस्याः**–पूर्वदर्शितायाः, **श्रमणवसतेः**–गोपीपुरस्थोपाश्रयस्य, **मध्ये**–अन्तः, **यः**–वर्ण्यमानः यः, **क्षणस्य**–व्याख्यानस्य, उत्सवरूपव्याख्याने क्षणशब्दो रूढोऽवसेयः, **मण्डपः**–

जनाश्रयः, अस्ति, मुक्ताचन्द्रोदयपरिचितस्वर्णमाणिक्यभूषा-श्रेणीदीप्तः-मौक्तिकसम्पादितवितानविशेषनिचितकनकमणिमाणिक्यालङ्कारावलिदेदीप्यमानः, विविधरचनाराजितस्तम्भशोभी-अनेकप्रकारचित्रसङ्घटनासंशोभितस्तम्भशोभाकलितः, सोऽयम्-असौ सभामण्डपः, कान्त्या-प्रभाभरेण, ताम्-प्रसिद्धाम्, मघोनः-सुरेन्द्रस्य, 'श्वन्युवन्मघोनो-' ।२।१।१०६। इति वस्य उः, सुधर्मा सभाम्-सुधर्माभिधानां संसदम्, अनुहरति-अनुकरोति ॥१०५॥

( १०६-१०७ )

सूक्तयुगलेन व्याख्यानपीठं निरूपयति मध्य इति—

मध्ये सिंहा-सनमनुपमं तस्य शक्रासनाभं,
चेतश्चैतत् सुखयति सतां हृद्यपद्यानुकारम् ॥
सालङ्कारं सुघटितमहा-सन्धिबन्धं सुवर्ण,
स्वच्छच्छायं-सुललितचतुष्पादसम्पन्नशोभम् ॥१०६॥

दीप्रोपान्तं स्वसदृशरुचा पादपीठेन नम्र-
क्ष्माभृच्छ्रेणी-मुकुटघटना-कोमलीभूतधाम्ना ॥
पङ्क्त्योड्ना-मिव गुणयुजा मौक्तिकस्वस्तिकेन,
व्योम्नो लक्ष्मीं किल निदधतो-पेन्द्रपादाश्रितेन ॥१०७

( युग्मम् )

( अन्वयः ) तस्य मध्ये अनुपमं शक्रासनाभं सिंहासनं सतां चेतः सुखयति एतच्च हृद्यपद्यानुकारं सालङ्कारं सुघटितमहासन्धिबन्धं सुवर्णं स्वच्छच्छायं सुललितचतुष्पादसम्पन्नशोभं

स्वसदृशरुचा नम्रक्ष्माभृच्छ्रेणीमुकुटघटनाकोमलीभूतधाम्ना गुणयुजा मौक्तिकस्वस्तिकेन ऊडूनां पङ्क्त्या इव किल व्योम्नः लक्ष्मीं निदधता उपेन्द्रपादाश्रितेन पादपीठेन दीप्रोपान्तम् ॥ ॥ १०६-१०७ ॥

( प्रकाशः ) तस्य-उपाश्रयस्य, मध्ये-अन्तराले, अनुपमम्-अतुलम्, शक्रासनाभम्-सौधर्मेन्द्रसिंहासनसदृशम्, सिंहासनम्-मृगपतिचिह्नचिह्नितपीठम् उपविष्टसिंहाकृत्यनुकार्यासनं वा सिंहासनम्। सतां चेतः-सज्जनजनमनः, सुखयति-आह्लादयति, एतच्च-इदं पुनः, हृद्यपद्यानुकारम्-मनोज्ञसोपानपद्धतिसदृशशोभम्, सालङ्कारम्-विभूषणभूषितम्, सुघटितमहासन्धिबन्धम्-सुष्ठुयोजितपरस्परावयवसंयोजनसम्बन्धबन्धनम्, सुवर्णम्-हैमम्, शोभनरूपं, स्वच्छच्छायम्-उज्ज्वलप्रभम्, सुललितचतुष्पादसम्पन्नशोभम्-रमणीयचरणचतुष्टयसमन्वितश्रि, स्वसदृशरुचा-निजानुरूपप्रभया, नम्रक्ष्माभृच्छ्रेणीमुकुटघटनाकोमलीभूतधाम्ना-नमनशीलनरपतिततिशिरोऽलङ्करणरचनामृदुभूततेजसा, गुणयुजा-गुणगणान्वितेन, मौक्तिकस्वस्तिकेन-मुक्ताफलसम्पादितस्वस्तिकचिह्नेन, ऊडूनां पङ्क्त्या इव-नक्षत्राणामावल्या इव, किल-निश्चयेन, व्योम्नः-गगनस्य, लक्ष्मीम्-शोभाम्, निदधता-धारयता, उपेन्द्रपादाश्रितेन-पूज्योपाध्यायपरिकलितेन, पादपीठेन-पादासनेन, दीप्रोपान्तम्-देदीप्यमानसमीपम्, सुखयतीतीहान्वेयम् ॥ १०६-१०७ ॥

( १०८ )

अथ चतुर्दशभिः सुक्तैराचार्यपादान् स्तौति तत्रेत्यादि—

तत्रासीनं परिणततप-स्तेजसा पीनमन्तः-
शुक्लध्यानो-द्भवनवमहो-द्योतितात्मस्वरूपम् ॥
साक्षात्तीर्थ-ङ्करमिव जग-ज्जन्तुजीवातुभूतं,
मूर्त्या शान्ता-द्भुतमधुरया दत्तभव्यप्रमोदम् ॥१०८॥

( अन्वयः ) तत्र आसीनं परिणततपस्तेजसा पीनम् अन्तःशुक्लध्यानोद्भवनवमहोद्योतितात्मस्वरूपं साक्षात् तीर्थङ्करम् इव जगज्जीवातुभूतं शान्ताद्भुतमधुरया मूर्त्या दत्तभव्यप्रमोदम् ॥ १०८ ॥

( प्रकाशः ) तत्र–वर्णितमृगेन्द्रासने, आसीनम्–उपनिषण्णम्, बद्धपद्मासनेन स्थितम्, आस् आनः 'आसीनः' ।४।४।११६। इति आनाकारस्य ईत्त्वे निपातिते आसीनः, यथा 'फलन्ती वर्धते द्राक्षा, पुष्प्यन्ती वर्धतेऽब्जिनी। शयना वर्धते दुर्वा, आसीनं वर्धते बिसम्' इति। परिणततपस्तेजसा पीनम्–प्रकृष्टतपश्चरणोद्भूतद्युतिभरेण परिपुष्टम्, प्या+क्तः 'क्तयोरनुपसर्गस्य' ।४।१।९२। इति प्यः पीत्यादेशे पीनः, अन्तःशुक्लध्यानोद्भवनवमहोद्योतितात्मस्वरूपम्-हृदये उज्ज्वलध्यानानुसन्धानजनिताभिनवप्रभाप्रभासितनिजनिर्मलवृत्तम्, साक्षात्तीर्थङ्करमिव–प्रत्यक्षजिनपतिवत्, तीर्यते संसारसमुद्रोऽनेनेति तीर्थं प्रवचनाधारश्चतुर्विधसङ्घः प्रथमगणधरो वा, यदाहुः–'तित्थं भन्ते! तित्थं तित्थयरे तित्थं, गोयमा! अरिहा ताव नियमा तित्थंकरे, तित्थं पुण चाउवण्णे समणसङ्घे पढमगणहरे वा' तत्करोति तीर्थङ्करः 'हेतुतच्छीलानुकूले'–।५।१।१०३। इति टे 'नवाखित्कृदन्ते'–।३।२।११७। इत्यत्र योगविभागव्याख्यानाद्वैकल्पिको-

मोऽन्तः, जगज्जन्तुजीवातुभूतम्-भुवनजनजीवनौषधरूपम्, 'जीवातुर्जीवनौषधम्' इति हैमः, शान्ताद्भुतमधुरया-प्रशान्ताश्चर्यरसयोगप्रसन्नया, मूर्त्या-आकृत्या, दत्तभव्यप्रमोदम्-अर्पितपरमपदगमनयोग्यात्माह्लादम्, चतुर्दशसूक्तस्थद्वितीयान्तसर्वाणि पदानि पूज्यपादानां विशेषणानि एकविंशतिशतसूक्तस्थश्रीतपगणपतिमित्यनेन विशेष्याणि 'वन्देथाः' इति क्रियान्वयोऽपि तत्रैव।उपमा॥१०८॥

( १०९ )

**अभ्यस्तानां गुरुमुखकजा-दागमानां निधानं,**
**साक्षादाद्यं गणधरमिवा-नेकलब्धिप्रधानम्॥**
**ज्ञानालोक-प्रकटितजग-त्तत्त्वदत्तावधानं,**
**ध्यानं धर्म्यं हृदि निदधतं सिद्धिशय्योपधानम्॥१०९।**

( अन्वयः ) गुरुमुखकजाद् अभ्यस्तानाम् आगमानां निधानं साक्षात् आद्यं गणधरम् इव अनेकलब्धिप्रधानं ज्ञानालोक-प्रकटितजगत्तत्त्वदत्तावधानं धर्म्यं ध्यानं हृदि निदधतं सिद्धिशय्योपधानम् ॥ १०९ ॥

( प्रकाशः ) **गुरुमुखकजाद्**-निजगुरुवरवदनकमलात्, **अभ्यस्तानाम्**-अधीतानाम्, **आगमानाम्**-सिद्धान्तशास्त्राणाम्, **निधानम्**-निधिम्, **साक्षात्**-प्रत्यक्षम्, **आद्यं गणधरमिव**-अक्षीणमहानसादिगणनातीतलब्धिसम्पन्नप्रथमगणधरश्रीइन्द्रभूतिशुभाभिधानगौतमस्वामिनमिव, **अनेकलब्धिप्रधानम्**-नानाप्रभावविशेषविशेषितम्, **ज्ञानालोकप्रकटितजगत्तत्त्वदत्तावधानम्**-चित्प्रकाशप्रकाशितविश्ववस्तुतत्त्वमनोनियोगम्, **धर्म्यं ध्यानम्**-धर्मसम्बद्ध-

स्थिरचित्तचिन्तनम्, धर्मादनपेतं धर्म्यम् 'धर्मपथ्य-' ।७।१।११। इति निपात्यते, हृदि—अन्तःकरणे, निदधतम्—धारयन्तम्, सिद्धिशय्योपधानम्—शिवसुखशयनशिरोधानम्। उपमारूपकान्त्यानुप्रासालङ्काराः ॥ १०९ ॥

( ११० )

**आकर्षन्तं कठिनतपसा लीलया सिद्धिराज्यं,**
**स्वर्गादीनां सुखमनुपमं मन्यमानं तृणाय ॥**
**आचामाम्ला-द्यतिपृथुतपः-कार्श्यतः श्वेतकान्ति,**
**सम्यग्लिप्तं किल धवलया लेश्ययाऽन्तर्बहिश्च ॥११०॥**

( अन्वयः ) कठिनतपसा लीलया सिद्धिराज्यम् आकर्षन्तं स्वर्गादीनाम् अनुपमं सुखं तृणाय मन्यमानम् आचामाम्लाद्यतिपृथुतपःकार्श्यतः श्वेतकान्ति किल धवलया लेश्यया अन्तर्बहिश्च सम्यग्लिप्तम् ॥ ११० ॥

( प्रकाशः ) कठिनतपसा—प्रचण्डतपश्चरणाचरणेन, लीलया—क्रीडामात्रेण, सिद्धिराज्यम्—निःश्रेयससाम्राज्यम्, आकर्षन्तम्—स्वसमीपमानयन्तम्, आकर्षणं विदधतम्, स्वर्गादीनाम्—अमरनिकेतनप्रमुखाणाम्, अनुपमम्—असमानम्, सुखम्—शर्म, तृणाय मन्यमानम्—तुच्छमवगणयन्तम्, 'मन्यस्यानावादिभ्योऽति कुत्सने' ।२।२।६४। इति निन्दागम्ये चतुर्थी आचामाम्लाद्यतिपृथुतपःकार्श्यतः—सकृद्रूक्षान्नमात्रभोजनं यत्र तत्तप आचामाम्लाख्यं तत्प्रमुखप्रचुरविस्तारतपश्चरणजनितवपुष्कृशतायाः, आचामः—प्रस्रावः स एवाम्लो यस्मिंस्तत् आचामाम्लम्, (आयंबिले-

तिभाषायाम् ) श्वेतकान्तिम्–धवलप्रभम्, किल–निश्चयेन, धवलया लेश्यया–शुक्लात्मपरिणामविशेषेण, अन्तर्बहिश्च–अभ्यन्तरे बाह्ये च, सम्यगुलिप्तम्–साधुसम्पादितविलेपनम्, बाह्यया शरीरवर्णकान्त्या मनःपरिणतिरूपया चाभ्यन्तरया शुक्ललेश्यावत्त्वं ख्यापितम् ॥ ११० ॥

( १११ )

**फुल्लाम्भोज-श्वसितमसिति-श्मश्रुकूर्चाङ्कुरोद्या-**
**नं बिभ्राणं सितमुखपटीं चाननाम्भोजहंसीम् ॥**
**हस्ताम्भोजे दधतममलां वैद्रुमीमक्षमालां,**
**रागं प्राप्ता-मिव गुरुगुणै-र्घूर्णमानाञ्च चित्ते ॥१११॥**

( अन्वयः ) फुल्लाम्भोजश्वसितम् असितिश्मश्रुकूर्चाङ्कुरोद्यानं च आननाम्भोजहंसीं सितमुखपटीं बिभ्राणं हस्ताम्भोजे चित्ते घूर्णमानां गुरुगुणैः रागं प्राप्तामिव वैद्रुमीम् अमलाम् अक्षमालां दधतम् ॥ १११ ॥

( प्रकाशः ) फुल्लाम्भोजश्वसितम्–विकसितकमलसमसुगन्धकलितश्वासम्, 'श्वासस्तु श्वसितम्' इति हैमः, असितिश्मश्रुकूर्चाङ्कुरोद्यानम्–श्यामास्यलोमाङ्कुरोपवनम्, श्मनि मुखैकदेशे शेते यद्वाश्म पुंमुखं श्रीयते लक्ष्यतेऽनेनेति श्मश्रु, 'श्मश्रु कूर्चमास्यलोम च मासुरी' इति हैमः, ( दाढी मूछ इति भाषायाम् ) च–पुनः, आननाम्भोजहंसीम्–वदनकमलमरालीम्, सितमुखपटीम्–उज्ज्वलमुखवस्त्रिकाम्, बिभ्राणम्–धारयन्तम्, हस्ताम्भोजे–करकञ्जे, चित्ते–हृदये, घूर्णमानाम्–जञ्जप्यमानाम्, परावर्तमा-

नाम्, गुरुगुणैः-पूज्याचार्यमहाराजसद्गुणैः, रागम्-रक्तताम्, प्राप्ताम् इव-अधिगताम् किम्, वैद्रुमीम्-प्रवालसम्पादिताम्, अमलाम्-स्वच्छाम्, अक्षमालाम्-नमस्कारावलीम्, मालामिति-यावत्, दधतम्-रक्षन्तम्, धारयन्तमितियावत् । उत्प्रेक्षा ॥१११॥

( ११२ )

**अङ्के धर्म-ध्वजमुरुमहः-शोभमानं दधानं,**
**श्रेयोलक्ष्म्या प्रहितमिव स-स्नेहया पुण्डरीकम् ॥**
**प्रायः पद्मा-सनपरिचितं राजहंसोपसेव्यं,**
**स्वाध्यायेना-नुगतवदनं ब्रह्मसब्रह्मरूपम् ॥ ११२ ॥**

( अन्वयः ) अङ्के सस्नेहया श्रेयोलक्ष्म्या प्रहितं पुण्डरीकमिव उरुमहःशोभमानं धर्मध्वजं दधानं प्रायः पद्मासनपरिचितं राजहंसोपसेव्यं स्वाध्यायेनानुगतवदनं ब्रह्मसब्रह्मरूपम् ॥ ११२ ॥

(प्रकाशः) अङ्के-क्रोडे, सस्नेहया-प्रणयपरिपूरितया, श्रेयोलक्ष्म्या-कल्याणकमलया, प्रहितम्-प्रेषितम्, पुण्डरीकमिव-श्वेताम्भोजमिव, उरुमहःशोभमानम्-महातेजोराजमानम्, धर्मध्वजम्-रजोहरणम्, दधानम्-बिभ्रन्तम्, प्रायःपद्मासनपरिचितम्-बहुकालं पद्मासनाख्यप्रसिद्धासनेन बद्धासनम्, राजहंसोपसेव्यम्-महापतिमरालसेवनीयम्, स्वाध्यायेनानुगतवदनम्-सिद्धान्तपाठेन सहगताननम्, सर्वदा स्वाध्यायं सम्पादयन्तमिति-यावत्, ब्रह्मसब्रह्मरूपम्-निर्वाणसन्निभस्वरूपम् ॥ ११२ ॥

( ११३ )

कर्णोपान्ते पलितकपटात् सुष्ठु विज्ञाप्यमानं,
स्थानभ्रंश–व्यथितजरसै–कान्तमेकान्तकान्तम् ॥
स्वामिँल्लोका–नजरममरं स्थानकं प्राप्तुमर्हान्,
कुर्वन् भूमौ विहरसि मया स्थीयतां क्वाधुनेति ॥११३॥

( अन्वयः ) एकान्तकान्तं स्थानभ्रंशव्यथितजरसा कर्णोपान्ते पलितकपटात् एकान्तं 'स्वामिन् ! लोकान् अजरम् अमरं स्थानकं प्राप्तुम् अर्हान् कुर्वन् भूमौ विहरसि अधुना मया क्व स्थीयताम्' इति सुष्ठु विज्ञाप्यमानम् ॥ ११३ ॥

(प्रकाशः) एकान्तकान्तम्–सर्वथा सुन्दरम्, स्थानभ्रंशव्यथितजरसा–स्वस्थितिविनाशजनितदुःखदुःखितया वृद्धावस्थया, 'जराया जरस्वा' ।२।१।३। इति जरसादेशः कर्णोपान्ते–श्रवणसमीपे, पलितकपटात्–श्वेतकेशव्याजेन, एकान्तम्–रहो यथास्यात्तथा, स्वामिन् ! भगवन् ! लोकान्–जनान्, अजरम्–जरारहितम्, अमरम्–मरणरहितम्, स्थानकम्–पदम्, प्राप्तुम्–अधिगन्तुम्, अर्हान्–योग्यान्, कुर्वन्–विदधन्, भूमौ–क्षितितले, विहरसि–विचरसि, अधुना–सम्प्रति, मया–अस्माभिः, क्व–कमाश्रित्य, कुत्र, स्थीयताम्–स्थितिर्विधेया, इति–एवम्, सुष्ठु–सम्यक्, विज्ञाप्यमानम्–निवेद्यमानम् ॥ उत्प्रेक्षा ॥ ११३ ॥

( ११४ )

स्फूर्जद्भाग्यान् कतिचन दृशा स्निग्धया लोकयन्तं,
काँश्चिच्चेष–त्स्मितकलनया स्वायतीन् प्रीणयन्तम् ॥

पूर्वोपात्ता-स्खलितसुकृत-श्रेणिसौभाग्यभाजः,
काँश्चिन्मौलौ करघटनया लब्धसिद्धीन् सृजन्तम् ॥११४

( अन्वयः ) स्फूर्जद्भाग्यान् कतिचन स्निग्धया दृशा लोकयन्तं काँश्चिच्च ईषत्स्मितकलनया स्वायतीन् प्रीणयन्तं पूर्वोपात्तास्खलितसुकृतश्रेणिसौभाग्यभाजः काँश्चित् मौलौ करघटनया लब्धसिद्धीन् सृजन्तम् ॥ ११४ ॥

( प्रकाशः ) स्फूर्जद्भाग्यान्-विलसत्सुकृतान्, कतिचन-कतिपयजनान्, स्निग्धया दृशा-स्नेहभरभरितचक्षुषा, लोकयन्तम्-निरीक्षमाणम्, काँश्चिच्च-कियतः पुनः, ईषत्स्मितकलनया-किञ्चिद्धासदर्शनेन, स्वायतीन्-निजभाविशुभपरिणामान्, प्रीणयन्तम्-प्रसीदयन्तम्, पूर्वोपात्तास्खलितसुकृतश्रेणिसौभाग्यभाजः-पुरा समुपार्जिताव्याहतपुण्यावलिवशीकरणभाग्ययुजः, काँश्चित्-काँश्चन जनान्, मौलौ-शिरसि, करघटनया-हस्तसंस्थापनेन, वासचूर्णप्रक्षेपेणेतियावत्, लब्धसिद्धीन्-सिद्धसमृद्धीन्, सृजन्तम्-सम्पादयन्तम् ॥११४॥

( ११५ )

आशीर्दम्भा-न्नमदसुमतो हस्तविस्तारणेन,
हस्तन्यस्ता-विव निजवशौ धर्मलाभौ ददानम् ॥
कल्याणानां निधिमिव महावारपारं महिम्ना-
माचाराणां भवनभवना-वाकरं सत्क्रियाणाम् ॥११५॥

( अन्वयः ) नमदसुमताम् आशीर्दम्भात् हस्तविस्तारणेन हस्तन्यास्ताविव निजवशौ धर्मलाभौ ददानं कल्याणानां निधिमिव

महिम्नां महावारपारम् आचाराणां भवनम् अवनौ सत्क्रियाणाम् आकरम् ॥ ११५ ॥

( प्रकाशः ) नमदसुमताम्–प्रणमत्प्राणिनाम्, आशीर्दम्भात्–आशीर्वादवितरणव्याजेन, धर्मलाभवचनच्छलेन, हस्तविस्तारणेन--करप्रसारणेन, हस्तन्यस्ताविव--करस्थापितौ किमु, निजवशौ–स्वाधीनौ, धर्मलाभौ–शुभादृष्टप्राप्ती, ददानम्–अर्पयन्तम्, कल्याणानां निधिमिव–यथा श्रेयसां निधानम्, महिम्नां महावारपारम्–तथा प्रभावविशेषाणां प्रकृष्टसागरम्, 'पारावारः सागरोऽवारपारः' इति हैमः, आचाराणां भवनम्–सदाचरणानां निलयम्, अवनौ–भुवि, सत्क्रियाणाम् आकरम्–शुभक्रियाविधीनां खानिम् ॥ ११५ ॥

( ११६ )

अर्हद्धर्मं तनुभृतमिवा–स्तोकलोकोपकृत्यै,
कैवल्यं वा विदितभुवनं पुंस्वरूपोपपन्नम् ॥
प्रत्यक्षं वा सुकृतनिचयं शासनस्यार्हतस्य,
मूलं निःश्रे–यसपदतरो–र्जङ्गमं कल्पवृक्षम् ॥ ११६ ॥

( अन्वयः ) अर्हद्धर्मं तनुभृतम् इव वा अस्तोकलोकोपकृत्यै विदितभुवनं कैवल्यं पुंस्वरूपोपपन्नं वा आर्हतस्य शासनस्य प्रत्यक्षं सुकृतनिचयं निःश्रेयसपदतरोः मूलं जङ्गमं कल्पवृक्षम् ॥ ११६ ॥

( प्रकाशः ) अर्हद्धर्मम्–जैनधर्मम्, तनुभृतमिव–धृतशरीरं किम्, वा–अथवा, अस्तोकलोकोपकृत्यै–घनजनोपकाराय, वि-

दितभुवनम्–विज्ञातविश्वम्, कैवल्यम्–केवलज्ञानम्, पुँस्वरूपोपपन्नम्–पुरुषरूपेणोत्पन्नम् वा–अथवा, आर्हतस्य शासनस्य–जैनेन्द्रप्रवचनस्य, प्रत्यक्षं सुकृतनिचयम्–साक्षात्पुण्यप्राग्भारम्, निःश्रेयसपदतरोर्मूलम्-परमपदपादपस्य मूलम्, जङ्गमं कल्पवृक्षम्–चराचरममरतरुम् ॥ संशयगर्भितोत्प्रेक्षा ॥ ११६ ॥

( ११७ )

कष्टव्रातं नतसुमनसां जापमौनप्रयुक्तै-
र्घ्नन्तं मन्त्रै-रिव पटुतरै-र्हारिहुँकारनादैः ॥
सम्यग्नाम-स्मरणशमिता-शेषपापोपतापं,
लक्षोष्णांशु-प्रतिभटजग-द्व्यापितेजःप्रतापम् ॥११७

( अन्वयः ) जापमौनप्रयुक्तैः पटुतरैः हारिहुँकारनादैः मन्त्रैः इव नतसुमनसां कष्टव्रातं घ्नन्तं सम्यग्नामस्मरणशमिता-शेषपापोपतापं लक्षोष्णांशुप्रतिभटजगद्व्यापि तेजःप्रतापम् ॥ ११७ ॥

( प्रकाशः ) जापमौनप्रयुक्तैः–पुनःपुनरुच्चारण–वाग्व्यापारराहित्यद्वारासाधितैः, पटुतरैः–अतिनिपुणैः, हारिहुँकारनादैः–मनोहारि हुँ हुँ हुँ इत्युद्घोषैः, मन्त्रैः–देवाराधनशब्दविशेषैः, इव–किम्, नतसुमनसाम्–प्रणतविबुधानाम्, कष्टव्रातम्–आपत्प्रकरम्, घ्नन्तम्–विनाशयन्तम्, सम्यग्नामस्मरणशमिताशेषपापोपतापम्–साध्वभिधानस्मृतिमात्रदूरीकृताखिलाऽशुभकर्मजनितसन्तापम्, लक्षोष्णांशुप्रतिभटजगद्व्यापितेजःप्रतापम्–शतसहस्रकिरणप्रतिस्पर्धिविश्वप्रसारिज्योतिरुद्योतम् ॥ ११७ ॥

( ११८ )

धैर्य्येणाति-प्रथितयशसा स्वर्णशैलं जयन्तं,
गाम्भीर्येणा-तिशयगुरुणाऽम्भोनिधिं लज्जयन्तम् ॥
सौन्दर्येणा-प्रतिममहसा मन्मथं तर्जयन्तं,
चारित्राद्यैः सुविदितगुणैर्विश्वमावर्जयन्तम् ॥११८॥

( अन्वयः ) अतिप्रथितयशसा धैर्य्येण स्वर्णशैलं जयन्तम् अतिशयगुरुणा गाम्भीर्य्येण अम्भोनिधिं लज्जयन्तम्, अप्रतिममहसा सौन्दर्येण मन्मथं तर्जयन्तं चारित्राद्यैः सुविहितगुणैः विश्वम् आवर्जयन्तम् ॥ ११८ ॥

( प्रकाशः ) अतिप्रथितयशसा-अत्यन्तविख्यातवर्णवादेन, धैर्य्येण-धीरतया, स्वर्णशैलम्-मेरुपर्वतम्,जयन्तम्-विजयमानम् अतिशयगुरुणा-महत्तरेण, गाम्भीर्य्येण-गभीरतया, अलक्ष्यमनोभावेनेतियावत् 'स्वरे सत्त्वे च नाभौ च, त्रिषु गम्भीरता शुभा' इतिगभीरत्रिकवत्त्वेन, अम्भोनिधिम्-रत्नाकरम्, लज्जयन्तम्-सव्रीडं कुर्वन्तम्, अप्रतिममहसा-अतुलतेजसा, सौन्दर्य्येण-'अङ्गप्रत्यङ्गकानां यः, सन्निवेशो यथोचितम्। सुश्लिष्टः सन्धिबन्धः स्यात्, तत् सौन्दर्यमुदाहृतम्'॥ इत्युक्तप्रकाराङ्गादीनां चारुतया,मन्मथम्-कन्दर्पम्, तर्जयन्तम्-तिरस्कुर्वाणम्, चारित्राद्यैः-शीलप्रमुखैः, सुविहितगुणैः-प्रशस्तसद्गुणैः, विश्वम्-भुवनजनम्, आवर्जयन्तम्-आकर्षयन्तम्, वशीकुर्वन्तम्, व्यतिरेकयपकौ॥११८॥

( ११९ )

मौनध्याना-द्यमलविधिना-राधिताचार्य्यमन्त्रं,
सेव्यं देवै-रुपपदगतै-र्ब्रह्मचर्य्यानुरक्तैः ॥

**नम्रप्राणि-प्रकरविविध-प्रार्थनाकामकुम्भं,**
**दान्तं शान्तं मृदुमपमदं निःस्पृहं वीतदम्भम् ॥११९॥**

( अन्वयः ) मौनध्यानाद्यमलविधिना आराधिताचार्य्यमन्त्रं ब्रह्मचर्य्यानुरक्तैः उपपदगतैः देवैः सेव्यं नम्रप्राणिप्रकरविविध-प्रार्थनाकामकुम्भं दान्तं शान्तं मृदुम् अपमदं निःस्पृहं वीत-दम्भम् ॥ ११९ ॥

( प्रकाशः ) **मौनध्यानाद्यमलविधिना**–तूष्णींभावोत्कट-कोटिकचिन्तनादिविमलविधानेन, सूरिमन्त्राराधने ह्यसौ विधिः-यत् मौनेन स्थेयं न स्त्रीमुखं द्रष्टव्यम् आचामाम्लोपवासादितपो विधातव्यमित्यादि तेन, **आराधिताचार्यमन्त्रम्**–साधितपञ्चप्रस्था-नमयसूरिमन्त्रम्, **ब्रह्मचर्य्यानुरक्तैः**–विशुद्धशीलासक्तैः, **उप-पदगतैः**–श्रीमदाचार्यचरणान्तिके वर्तमानैः, **देवैः**–दिविषदैः, **से-व्यम्**–उपासनीयम्, **नम्रप्राणिप्रकरविविधप्रार्थनाकामकुम्भम्**–प्रणमनशीलजीवजातानेकप्रकारकामनाकामघटम्, यथा कामकुम्भः पूरयति प्राणिनां प्रार्थनां तथासौ सूरिशेखरोऽपीतिभावः **दान्तम्**–वशिवरम्, **शान्तम्**–प्रशमपरिपूर्णम्, **मृदुम्**–सुकोमलस्वभावम्, **अपमदम्**–गलितगर्वम्, **निःस्पृहम्**–निराकाङ्क्षम्, ब्राह्यार्थभिलाष-रहितमितियावत्, **वीतदम्भम्**–छलशून्यम्, निष्कपटमिति-यावत् ॥ ११९ ॥

( १२० )

**विद्यावद्भिः सुभगतनुभि-श्चारुचारित्रवर्य्यैः,**
**श्रीगुर्वाज्ञा-विनयनिपुणैः सेवितं साधुवर्य्यैः ॥**

**श्रद्धालूनां पृथुपरिषदि प्रौढधाम्ना निषण्णं,**
**त्रायस्त्रिंशै-रिव परिगतं संपदीन्द्रं सुराणाम् ॥१२०॥**

( अन्वयः ) विद्यावद्भिः सुभगतनुभिः चारुचारित्रवर्य्यैः श्रीगुर्वाज्ञाविनयनिपुणैः साधुवर्य्यैः सेवितं श्रद्धालूनां पृथुपरिषदि प्रौढधाम्ना निषण्णं सुराणां सम्पदि त्रायस्त्रिंशैः परिगतम् इन्द्रम् इव ॥ १२० ॥

( प्रकाशः ) **विद्यावद्भिः**–विपश्चिद्भिः, विविधशास्त्रावबोधशालिभिरिति यावत्, **सुभगतनुभिः**–शीलसुगन्धसुगन्धिशरीरैः, **चारुचारित्रवर्य्यैः**–विशुद्धचरणकरणाचरणश्रेष्ठैः, **श्रीगुर्वाज्ञाविनयनिपुणैः**–पूज्यपादाचार्यवर्यनिदेशकरणविनम्रतत्परैः, **साधुवर्य्यैः**–मुनिराजैः, **सेवितम्**–उपासितम्, **श्रद्धालूनाम्**–श्रावकानाम्, श्रद्धानशीलः श्रद्धालुः 'शीङ्श्रद्धा–' ।५।२।३७। इत्यालुः, 'श्रद्धालुरास्तिकः श्राद्धः' इति हैमः, **पृथुपरिषदि**–महासभायाम्, **प्रौढधाम्ना**–प्रकृष्टतेजसा, **निषण्णम्**–समासितम्, **त्रायस्त्रिंशैः**–सभास्थानीयैरमरैः, **परिगतम्**–परिवेष्टितम्, सहितमितियावत्, **इन्द्रमिव**–सुरपतिवत् ॥ १२० ॥

( १२१ )

**वन्देथाः श्री-तपगणपतिं सार्वमैदंयुगीनं,**
**पीनं पुण्यप्रभवमुदधे-र्नन्दन ! त्वं लभेथाः ॥**
**प्राच्यैः पुण्यैः फलितमतुलै-स्तावकीनैः सुलब्धं,**
**जन्मैतत्ते नभसि च गति-र्भाविनी ते कृतार्था ॥१२१॥**

( अन्वयः ) ऐदंयुगीनं सार्वं पीनं श्रीतपगणपतिम्, उद-

धेर्नन्दन ! त्वं वन्देथाः पुण्यप्रभवं लभेथाः तावकीनैः अतुलैः प्राच्यैः पुण्यैः फलितं ते एतत् जन्म सुलब्धं च ते नभसि गतिः कृतार्था भाविनी ॥ १२१ ॥

( प्रकाशः ) **ऐदंयुगीनम्**-एतत्कालीनम्, वर्तमानसमयसत्कम्, **सार्वम्**-सर्वज्ञम्, समेषां हितकरमिति यावत्, सर्वेभ्यो हितः सार्वः, 'सर्वाण्णो वा' ।७।१।४३। इति णः, **पीनम्**-पुष्टम्, **श्रीतपगणपतिम्**-श्रीमत्तपागच्छाधिपतिम्, भट्टारकाचार्य-महाराजश्रीविजयप्रभसूरीश्वरमहाराजमितियावत्, **उदधेर्नन्दन !**-जलधिजात ! सुधाकर ! **त्वम्**-श्रीमान्, **वन्देथाः**-नमस्कुर्याः, **पुण्यप्रभवम्**-सुकृतपराक्रमम्, **लभेथाः**-प्राप्नुयाः, **तावकीनैः**-श्रीमदीयैः, **अतुलैः**--अप्रतिमैः, **प्राच्यैः**--पूर्वोपार्जितैः, **पुण्यैः**--शुभादृष्टैः, **फलितम्**-उदयावलिकायामागतम्, **ते**--तव, **एतत्**--अदः, प्रत्यक्षम्, **जन्म**--जनिः, उत्पत्तिः, **सुलब्धम्**--साधुप्राप्तम्, **च**--पुनः, **ते**--श्रीमतः, **नभसि गतिः**--गगनगमनम्, **कृतार्था भाविनी**-सफला भविष्यति ॥ १२१ ॥

## ( १२२ )

श्रीमतां गुरुवरचरणानां दर्शनतो दुष्टदुरितदूरीभवनमाह-**अद्येति**—

**अद्यानर्थै-र्गलितमकलैः पापश(प)ङ्कैर्विलीनं,**
**क्षीणं दोषै-र्गलितमशिवै-र्दुष्टकष्टैः प्रणष्टम् ॥**
**रुग्णं रोगै-र्मृतमनुशयै-र्विप्रयोगैर्विनष्टं,**
**सर्वातङ्को-पशमनिपुणं द्रक्ष्यसि श्रीगुरुं यत् ॥१२२॥**

( अन्वयः ) यत् (त्वं) सर्वातङ्कोपशमनिपुणं श्रीगुरुं द्रक्ष्यसि (तत्) अद्य अनर्थैः गलितम् अकलैः पापपङ्कैः विलीनं दोषैः क्षीणम् अशिवैः गलितं दुष्टकष्टैः प्रणष्टं रोगैः रुग्णम् अनुशयैः मृतं विप्रयोगैः विनष्टम् ॥ १२२ ॥

( प्रकाशः ) यत्–यतः, त्वम्, सर्वातङ्कोपशमनिपुणम्–समस्तसाध्वससान्त्वनसमर्थम्, सकलदरदूरीकरणदक्षमिति यावत्, ' आतङ्क–आशङ्का साध्वसं दरः ' इति हैमः, श्रीगुरुम्–श्रीमदाचार्यवर्यचरणम्, द्रक्ष्यसि–अक्षिसमक्षमापादयिष्यसि, अतः, अद्य–दिवसेऽस्मिन्, अनर्थैः–अनिष्टैः, गलितम्–पतितम्, विनष्टमितियावत्, अकलैः–कलाविरहितैः, पापपङ्कैः–कलुषकर्दमैः, विलीनम्–प्रध्वस्तम्, ' विलीनाशेषपातक ' इति भागवतम्, दोषैः–दुर्गुणैः, क्षीणम्–दुर्बलीभूय विनष्टम् यद्यपि ' क्षेः क्षी चाध्यार्थे ' ।४।२।७४। इत्यनेन भावकर्मभिन्नार्थ एव तस्य नः क्षेः क्षी च विधीयते परं केषाञ्चिन्मतमनुसृत्य भावेऽपि तद्विधानादत्र भावे तदवसेयम्, अशिवैः–अकल्याणैः, गलितम्–स्रस्तम्, दुष्टकष्टैः–अधमव्यथाभिः, प्रणष्टम्–विध्वस्तम्, रोगैः–व्याधिभिः, रुग्णम्–रोगैर्व्याप्तम्, अद्यरोगाणामेव रोगः सञ्जात इति न ते परेषामपकर्तुमीशा इतिभावः, ' सूयत्याद्योदितः ' ।४।२।७०। इति तस्य नः, अनुशयैः–दीर्घद्वेषैः, ' अनुशयः पश्चात्तापे दीर्घद्वेषानुबन्धयोः " इत्यनेकार्थसङ्ग्रहः, मृतम्–मरणमासादितम्, विप्रयोगैः–विरहैः, विनष्टम्–निर्णष्टम्, सर्वे कष्टभावा अद्य विनष्टा इति सर्वत्र शुभमेव वर्तत इत्याशयः ॥ १२२ ॥

( १२३ )

पूज्यपाददर्शनतो नष्टकलङ्कवार्तस्त्वं निष्कलङ्को भविष्यतीत्याह पुण्यादिति—

**पुण्यादस्माद् भृशमुपचितात् किंवदन्ती कलङ्क-**
**स्यैषा यास्य-त्यमृतकर ! भो निष्कलङ्कं भवन्तम् ॥**
**मन्येऽवश्यं शतगुणघृणिं सत्वरं वीक्षिताहे,**
**सर्वाभीष्टं फलति न चिरा-द्दर्शनं हीदृशानाम् ॥१२३॥**

( अन्वयः ) भृशम् उपचितात् अस्मात् पुण्यात् भो अमृतकर ! एषा कलङ्कस्य किंवदन्ती यास्यति, अवश्यं मन्ये शतगुणघृणिं निष्कलङ्कं भवन्तं सत्वरं वीक्षिताहे हि ईदृशानां दर्शनं सर्वाभीष्टं न चिरात् फलति ॥ १२३ ॥

( प्रकाशः ) भृशमुपचितात्—अत्यन्तं परिपुष्टात्, अस्मात् पुण्यात्—श्रीमत्तपागणाधीशदर्शनवन्दनजनितसुकृतात्, भो अमृतकर !—अयि पीयूषपाद !, एषा—विश्वविश्रुता, कलङ्कस्य—कुरङ्गरूपश्यामचिह्नस्य, किंवदन्ती—जनश्रुतिः, यास्यति—गमिष्यति, दूरीभविष्यतीति यावत्, अवश्यं मन्ये—ध्रुवं संभावयामि, शतगुणघृणिम्—इदानीन्तनतः शतसङ्ख्यरश्मिम्, 'केतुघृणिरश्मिपृश्नयः' इतिहैमः, निष्कलङ्कम्—कलङ्कविरहितम्, भवन्तम्—श्रीमन्तम्, सत्वरम्—तत्कालम्, वीक्षिताहे—विलोकयानि, हि—यतः, ईदृशानाम्—एतादृशामसमसुकृतशालिनाम्, दर्शनम्—विलक्षणमीक्षणम्, न चिरात्—अचिरेण, झटितीतियावत्, सर्वाभीष्टम्—समस्तसमीप्सितम्, फलति—प्रसवति जनयतीतियावत् ॥ १२३ ॥

( १२४ )

तत्रत्यं रम्यशब्दमयस्वरूपमानन्दयिष्यति त्वामतः स्थेयं तावत् त्वया तत्रेत्याह हृद्येति—

**हृद्यातोद्यै-र्मुखरमुरजै-र्गायनानाञ्च गीतै-**
**र्गायन्तीनां गुरुगुणगणाँ-श्चारवैः श्राविकाणाम् ॥**
**स्वाध्यायैश्च श्रमणकृतिनां तर्कचर्चाविचारैः**
**शब्दाद्वैते भवति भवता स्थेयमानम्य तत्र ॥ १२४ ॥**

(अन्वयः) हृद्यातोद्यैः मुखरमुरजैः गायनानाञ्च गीतैः गुरुगुणगणाँश्च गायन्तीनां श्राविकाणाम् आरवैः, श्रमणकृतिनां च तर्कचर्चाविचारैः स्वाध्यायैः शब्दाद्वैते भवति तत्र भवता आनम्य स्थेयम् ॥ १२४ ॥

(प्रकाशः) **हृद्यातोद्यैः**—मनोरमवीणादिचतुर्विधवाद्यैः, **मुखरमुरजैः**—अबद्धमुखमृदङ्गैः, मुखमस्त्यस्य मुखरः 'मध्वादिभ्यो रः' ।७।२।२६। इति रः, **गायनानाञ्च गीतैः**—गायकानां पुनः गानैः, गायतीति गायनः 'टनण्' ।५।१।६७। इति टनण् **गुरुगुणगणांश्च**—श्रीमदाचार्यवर्यसुगुणसमूहाँश्च, **गायन्तीनाम्**—गानं कुर्वतीनाम्, **श्राविकाणाम्**—श्रमणोपासिकानाम्, **आरवैः**—मधुरशब्दैः, **श्रमणकृतिनाञ्च**—धीमन्मुनिमतल्लिकानां पुनः, **तर्कचर्चाविचारैः**—ऊहविचारणानुकूलवाक्यव्यूहैः, तरन्त्यनेन संशयविपर्ययाविति तर्कः, 'तर्क ऊहः' इतिहैमः, **स्वाध्यायैः**—मोक्षशास्त्राध्ययनैः, **शब्दाद्वैते**—केवलशब्दस्वरूपे, **भवति**—जायमाने सति, **तत्र**-स्थले तस्मिन्,

भवता--श्रीमता, आनम्य--श्रीमद्गुरुवरचरणौ प्रणम्य, स्थेयम्--स्थातव्यम् ॥ १२४ ॥

( १२५ )

सजातीयाः श्रीमतः पाठकास्तत्र सन्तीति न मे विज्ञप्तिस्ते दुर्विज्ञप्या भविष्यतीत्याह **विज्ञप्तिरिति—**

**विज्ञप्तिर्नो यदपि भवतो दुष्करा नाप्तपुंसां,**
**पार्श्वे किञ्चा-मरहिमकराः पाठकास्ते सगोत्राः ॥**
**संवीक्ष्यैवा--वसरमुचितं तत्र वाच्यं तथापि,**
**नेतारो हि ध्रुवमवसरे प्रेक्षिणि प्रीतचित्ताः ॥१२५॥**

( अन्वयः ) यदपि विज्ञप्तिः भवतः दुष्करा नो ( यतः ) आप्तपुंसां पार्श्वे चामरहिमकराः ते सगोत्राः पाठकाः किं न तथापि तत्र उचितम् अवसरं संवीक्ष्यैव वाच्यं हि नेतारः अवसरे प्रेक्षिणि ध्रुवं प्रीतचित्ताः ॥ १२५ ॥

**( प्रकाशः )** **यदपि**–यद्यपि, **विज्ञप्तिः**–ममाभ्यर्थना, **भवतः**–श्रीमतः, **दुष्करा**–दुःसाध्या, **नो**–नैव, यतः, **आप्तपुंसां पार्श्वे**–सत्त्वसत्यशीलशालिनां महतामाचार्यचरणानां सविधे, **चामरहिमकराः**–चञ्चच्चामरवच्छीतलहस्ताः, **ते सगोत्राः**–तव समानकुलाः, चान्द्रकुला इतियावत्, **पाठकाः**–वाचकाः, उपाध्याया इतियावत्, **किं न**–न सन्ति किमु, अर्थात् सन्त्येव, **तथापि**–तदपि, **तत्र**–श्रीमत्सूरीश्वरान्तिके, **उचितम्**--योग्यम्, **अवसरम्**--समयम्, **संवीक्ष्यैव**--ननु निरीक्ष्य, **वाच्यम्**--कथनीयं कथनीयम्, **हि**--

यस्मात्, नेतारः--स्वामिनः, अवसरे--समुचितसमये, प्रेक्षिणि--विलोकयितरि, निजवक्तव्यं वक्तरीतियावत्, ध्रुवम्--निश्चितम्, प्रीतचित्ताः--प्रसन्नमनसः, भवन्तीतिशेषः ॥१२५॥

( १२६ )

एकान्तावसरे त्वया मदीयवन्दननिवेदनपुरस्सरमभ्यर्थनोपदीकर्तव्या स्थित्वेति—

स्थित्वा तस्मा--द्विजनसमये श्रीगुरोः पादपद्मं,
स्पृष्ट्वा स्वच्छै--र्हिमकरकरै--र्विज्ञ ! विज्ञाप्यमेवम् ॥
शिष्योऽणीयान् विनयविजयो द्वादशावर्तभाजा,
विज्ञप्तिं व्या--हरति महता वन्दनेनाभिवन्द्य ॥१२६॥

( अन्वयः ) तस्मात् विजनसमये स्थित्वा स्वच्छैः हिमकरकरैः श्रीगुरोः पादपद्मं स्पृष्ट्वा विज्ञ ! एवं विज्ञाप्यम्, अणीयान् शिष्यः विनयविजयः द्वादशावर्तभाजा महता वन्दनेन अभिवन्द्य विज्ञप्तिं व्याहरति ॥ १२६ ॥

( प्रकाशः ) तस्मात्--पूर्वोक्तहेतोः, विजनसमये--एकान्तावसरे, स्थित्वा--अवस्थीय, स्वच्छैः--निर्मलैः, हिमकरकरैः--शीतकिरणरूपहस्तैः, श्रीगुरोः--पूज्यपादसूरीश्वराणाम्, पादपद्मम्--चरणकमलम्, स्पृष्ट्वा--संस्पृश्य, विज्ञ !--हे निपुण ! एवम्--वक्ष्यमाणप्रकारेण, विज्ञाप्यम्--विनिवेदनीयम्, अणीयान् शिष्यः--कनीयान् विनेयः, अत्यणुः अणीयान्, शासनीयः शिष्यः 'दृवृग्स्तुजुषेतिशासः' ।५।१।४०। इतिक्यप्, 'इसासः शासः' ।४।४।११८। इतीसादेशः, 'शिष्यो विनेयोऽन्तेवासी' इति हैमः, विनयवि-

जयः—तदाख्याख्यातः, पूज्योपाध्यायप्रवरश्रीविनयविजयगणी, द्वादशावर्तभाजा--यस्मिन् वन्दने आवर्तानां द्वादशकं भवति तेन द्वादशावर्ताभिधेन, महता वन्दनेन—गुरुणा प्रणामविधिना, अभिवन्द्य--प्रणम्य, विज्ञप्तिम्—अभ्यर्थनाम्, व्याहरति--विनिवेदयति ॥ १२६ ॥

( १२७ )

पूज्यपादानां पूर्वपरिचयं तत्कालीनवार्ताञ्च संस्मृत्य स्वानन्दमाविष्करोति यच्छ्रीति—

**यच्छ्रीपूज्य-क्रमयुगमिला-दुर्गमध्ये नतोऽहं,**
**प्रागासं नो-पकृतिमिव त-द्विस्मरामि क्षणार्धम् ॥**
**श्रीतातानां यदुरुकृपया भाषणं स्मर्यमाणं,**
**सर्वाङ्गीणं सपदि पुलको-द्भेदमाविष्करोति ॥१२७॥**

( अन्वयः ) प्राक् इलादुर्गमध्ये अहं यत् श्रीपूज्यक्रमयुगं नतः आसं तत् उपकृतिम् इव क्षणार्धं न विस्मरामि, श्रीतातानाम् उरुकृपया यत् भाषणं ( तत् ) स्मर्यमाणं सपदि सर्वाङ्गीणं पुलकोद्भेदम् आविष्करोति ॥ १२७ ॥

( प्रकाशः ) प्राक्—पुरा, इलादुर्गमध्ये—इडरगढेतिप्रसिद्धपुरे, अहम्—अयं जनः, यत् श्रीपूज्यक्रमयुगम्—पूज्यपादपद्मयमलम्, नतः आसम्—प्रणतोऽभवम्, तदुपकृतिमिव—उपकारवत् तत्, क्षणार्धम्—निमेषार्धमपि, न विस्मरामि—नैव विस्मृतिं नयामि, श्रीतातानाम्—पूज्यश्रीणाम्, उरुकृपया—महानुकम्पया, यत् भाषणम्—यत्सदुपदेशनम्, स्मर्यमाणं तत्—स्मृतिपथमागच्छत् तत्, सपदि—साम्प्रतम्, सर्वाङ्गीणम्—सम्पूर्णशरीरव्यापि,

'सर्वादेः पथ्यङ्ग-' ।७।१।९४। इति ईनः, **पुलकोद्भेदम्**-रोमाञ्चम्, **आविष्करोति**-प्रकटयति ॥ १२७ ॥

( १२८ )

श्रीमतां स्मरणमात्रेण मदीयं मनःस्थैर्य्यं नानुभवतीत्याह तुष्यतीति—

**तुष्यत्युल्ला-सयतिकरणा-न्युल्लसन्त्येव भूयो-**
**भूयो गच्छ-त्युपगुरुपदं गाढमुत्कण्ठते च ।**
**बाष्पक्लिन्ने सृजति नयने गद्गदान् कण्ठनादा-**
**नेतच्चेतः प्रणयरसत-श्चेष्टते नैकधा मे ॥ १२८ ॥**

( अन्वयः ) मे एतच्चेतः प्रणयरसतः नैकधा चेष्टते ( तथाहि ) तुष्यति उल्लसन्ति करणानि उल्लासयति एव भूयोभूयः उपगुरुपदं गच्छति च गाढम् उत्कण्ठते नयने बाष्पक्लिन्ने कण्ठनादान् गद्गदान् सृजति ॥ १२८ ॥

( **प्रकाशः** ) **मे**-मदीयम्, **एतच्चेतः**-मानसमिदम्, **प्रणयरसतः**-प्रेमपीयूषप्रकर्षतः, **नैकधा**-अनेकप्रकारेण, **चेष्टते**-यतते, तथाहि **तुष्यति**-हर्षते, **उल्लसन्ति करणानि**-उल्लासवन्तीन्द्रियाणि, **उल्लासत्येव**-खलु आह्लादयति, **भूयोभूयः**-वारंवारम्, **उपगुरुपदम्**-गुरुवरचरणान्तिकम्, **गच्छति**-प्रयाति, **च**-पुनः, **गाढम्**-बाढम्, अत्यन्तमिति यावत्, **उत्कण्ठते**-उत्सुकं भवति, **नयने**-चक्षुषी, **बाष्पक्लिन्ने**-अश्रुपरिपूर्णे, **कण्ठनादान्**-ग्रीवाग्रभागनिःस्वानान्, **गद्गदान्**-हर्षशोकादिना सकफेन वायुना यथास्थानानुच्चारणाव्यक्तास्फुटरूपान्, **सृजति**-सम्पादयति ॥ १२८ ॥

( १२९ )

गुरुदर्शनदायिनी निद्रा शुभाऽशुभा च विरहे दर्शनविरहापादिकाजागर्य्येति वर्णयति निद्रेति—

**निद्रा दोषो जगति विदितो जागरश्चाप्रमादः,**
**सम्प्रत्येत-न्मम तु हृदये वैपरीत्येन भाति ।**
**निद्रां जाने गुणमनुगुणं दर्शनं वो ददानां,**
**जागर्य्याञ्च प्रगुणमगुणं तत्र विघ्नं सृजन्तीम् ॥१२९॥**

( अन्वयः ) जगति निद्रा दोषः जागरश्च अप्रमादः विदितः सम्प्रति मम तु हृदये एतत् वैपरीत्येन भाति वः अनुगुणं दर्शनं ददानां निद्रां गुणं तत्र प्रगुणं विघ्नं सृजन्तीं जागर्यां च अगुणं जाने ॥ १२९ ॥

( प्रकाशः ) जगति–विश्वे, निद्रा–प्रमीला, दोषः–अवगुणः, जागरश्च–जाग्रद्दशा तु, अप्रमादः–सावधानतारूपसद्गुणः, विदितः–प्रसिद्धः, तथापि, सम्प्रति–अधुना, मम तु हृदये–मदीयान्तःकरणे तु, एतत्–इदम्, वैपरीत्येन–विपरीतप्रकारेण, भाति–भासते, तद्यथा वः–युष्माकम्, अनुगुणं दर्शनम्–अनुकूलं स्वप्नम् ‘ दर्शनं....स्वप्नलोचनयोः ’ इत्यनेकार्थसङ्ग्रहः, ददानाम्–प्रयच्छन्तीम्, निद्राम्–नन्दीमुखीम्, ‘निद्रा प्रमीला शयनं, संवेशस्वापसंलयाः । नन्दीमुखी ’ इति हैमः, गुणम्–सद्गुणम्, तत्र–पूज्यपादानां दर्शने, प्रगुणं विघ्नम्–प्रबलप्रत्यूहम्, प्रगाढमन्तरायम्, सृजन्तीम्–उत्पादयन्तीम्, जागर्य्याम्–प्रबोधदशाम्, च–तु, अगुणम्–दोषम्, जाने–मन्ये ॥ १२९ ॥

( १३० )

शश्वन्नामरटनासक्तरसनान्तःकरणत्वेनाहं निद्राम्युतजागर्मीति-नावगच्छन्ति जना इत्याह **जागर्य्यायामिति—**

**जागर्य्यायां जपति रसना युष्मदाख्यां यथा मे,**
**निद्रायाम-प्युपहितमनस्त्वेन शश्वत्तथैव ।**
**तस्मात् सम्प्र-त्यहनि निशि वा जागरानिद्रयोर्मे,**
**भेदं लोका अपि पटुधियो जानते नापरीक्ष्यम् ॥१३०॥**

( अन्वयः ) यथा जागर्य्यायां मे रसना युष्मदाख्यां जपति तथैव उपहितमनस्त्वेन शश्वत् निद्रायामपि, तस्मात् सम्प्रति अहनि निशि वा मे जागरानिद्रयोः अपरीक्ष्यं भेदं पटुधियः अपि लोकाः न जानते ॥ १३० ॥

( प्रकाशः ) **यथा**—येन प्रकारेण, यद्वदिति यावत्, **जागर्य्यायाम्**—अवबोधदशायाम्, **मे**—मामकीनी, **रसना**—रसज्ञा, जिह्वेतियावत्, **युष्मदाख्याम्**—भवन्नामधेयम्, **जपति**—रटति, पुनः पुनः पठति, **तथैव**—तद्वदेव, **उपहितमनस्त्वेन**—समाहितस्वान्ततया, **शश्वत्**—अनिशम्, **निद्रायामपि**—स्वापसमयेऽपि, **तस्मात्**—अनवरताभिधानरटनकारणात्, **सम्प्रति**—एतत्समये, **अहनि निशि वा**—दिवानक्तं वा, **मे**—मम, **जागरानिद्रयोः**—प्रबोधप्रमीलयोः, अहं जागर्मि उत निद्रामीतिरूपमीतियावत्, **अपरीक्ष्यम्**—परीक्षाया अनर्हम्, **भेदम्**—विभागम्, **पटुधियः अपि**—सदसद्विवेककरणकुशलशेमुषीशालिनोऽपि, चतुरा अपि, **लोकाः**—जनाः, **न जानते**—नावगच्छन्ति ॥ १३० ॥

( १३१ )

विधिवशात्पक्षान्तरमाश्रितोऽप्यहमधुना मलीमसं तं त्यक्त्वा श्रीमन्तमनुसरामीति कृपयाऽनुग्राह्योऽयं जन इति प्रार्थयते प्रान्ते शङ्केति—

**शङ्कातङ्कै–र्मलिनमगुणै–रुत्सृजन् पूर्वपक्षं,**
**सिद्धान्तं स–द्विभव ! भवदा–राधनं संश्रितोऽस्मि ।**
**सम्भाव्यस्तत् परमगुरुभिः स्निग्धया प्रेमदृष्ट्या,**
**येनात्यर्थं फलितसकल–प्रार्थितार्थो भवेयम् ॥१३१॥**

( अन्वयः ) शङ्कातङ्कैः अगुणैः मलिनं पूर्वपक्षम् उत्सृजन् सद्विभव ! सिद्धान्तं भवदाराधनं संश्रितोऽस्मि तत् स्निग्धया प्रेमदृष्ट्या परमगुरुभिः सम्भाव्यः येन अत्यर्थं फलितसकल-प्रार्थितार्थः भवेयम् ॥ १३१ ॥

( प्रकाशः ) शङ्कातङ्कैः–सन्देहसन्दोहसन्तापैः, अगुणैः–दूषणैः, मलिनम्–कलुषितम्, पूर्वपक्षम्–श्रितमपरपक्षम्, उत्सृजन्–त्यजन्, सद्विभव !–समीचीनैश्वर्यशालिन् !, सिद्धान्तम्–निश्चितम्, भवदाराधनम्–श्रीमत्–सेवनम्, संश्रितोऽस्मि–समाश्रितोऽस्मि, तत्–ततः, स्निग्धया–प्रणयपरिपूरितया, प्रेमदृष्ट्या–स्नेहलसमीक्षया, परमगुरुभिः–श्रेष्ठगुरुवरचरणैः, सम्भाव्यः–संभावनीयः, निरीक्षणीय इति यावत्, येन–यतो हि, अत्यर्थम्–अतिशयेन, फलितसकलप्राथितार्थः–सिद्धसमस्तसमीप्सितप्रयोजनः, भवेयम्–स्याम् ॥ १३१ ॥

# प्रकाशकृतां प्रशस्तिः

मृगाङ्कतः किन्न मृगेन्द्रलाञ्च्छनो, विराजते ध्वस्तसमस्तलाञ्च्छनः ॥
देहप्रभापूरितविश्वमण्डलः, शुद्धात्मरूपाह्निनतेन्द्रमण्डलः ॥ १ ॥

वीरप्रभोः पट्टपरम्पराब्धेः, प्रबोधदायी शरदः शशाङ्कः ॥
सूरीशसम्राड् बुधचक्रवर्ती, श्रीनेमिसूरिप्रवरः श्रिये स्तात् ॥ २ ॥

तदीयपट्टाम्बरभानुकल्पः, शास्त्रप्रबोधैकविशारदः सन् ॥
पीयूषपाणिः कविरत्नरत्नो, जीयात् स सूरिर्विजयामृताख्यः ॥ ३ ॥

तस्यैकसेवानिलयो विनेयो, भवानुभावेन न मोहितो यः ॥
हितैकदृष्ट्या स्वसुतेन साकं, चारित्र्यसाम्राज्यमुरीचकार ॥ ४ ॥

पुण्याभिधस्यास्य मुनीश्वरस्य, पादाब्जभृङ्गेण धुरन्धरेण ॥
विवृत्तिरेषा विहिता हिताय, श्रीइन्दुदूतस्य प्रकाशनाम्नी ॥ ५ ॥

आचार्यवर्यैर्विजयोदयाख्य-सूरीश्वरैः पूजितपूज्यपूज्यैः ॥
समस्तविद्याविबुधैरकम्पा-नुकम्पधुर्यैर्लघु शोधितेयम् ॥ ६ ॥

श्रीवैक्रमीये ह्यधिके द्विसह्य-सहस्रवर्षे मृगशीर्षमासे ॥
इन्दोः सुतस्याह्नि सुपूर्णिमायां, पूर्णा विवृत्तिस्तनुतात् प्रकाशम् ॥ ७ ॥

विना प्रकाशं तमसि स्थितस्य, श्रीइन्दुदूतस्य रसैर्भृतस्य ॥
प्रकाशरूपा रुचिरा विवृत्ति-रापुष्पदन्तौ जयताज्जगत्याम् ॥ ८ ॥

# શ્રી જૈન સાહિત્યવર્ધક સભા.

## ( શિરપુર )

**સ્થાપના**—સં. ૧૯૯૫ ના ભાદરવા શુદિ બીજ ને શુક્રવારના રોજ પૂજ્યપાદ આચાર્ય **શ્રી વિજયામૃતસૂરિજી** મહારાજના ઉપદેશથી આ સભાની સ્થાપના સુરતખાતે નેમુભાઈની વાડીમાં કરવામાં આવી હતી. અહિં શિરપુરમાં તેની એક શાખા સં. ૧૯૯૭ ની સાલમાં ખોલવામાં આવી છે.

**ઉદ્દેશ**—પૂર્વાચાર્યોકૃત તેમજ નવીન ન્યાય, વ્યાકરણ, સાહિત્ય-વિષયક ગ્રંથો તથા તેના પરની વ્યાખ્યાઓનું પ્રકાશન કરવું તેમજ જ્ઞાનવૃદ્ધિનાં સાધનોમાં યથાશક્તિ ઉદ્યમવંત રહેવું.

---

## " શ્રી વૃદ્ધિ-નેમિ-અમૃત-ગ્રંથમાલા "

**કાર્ય**—આ ગ્રંથમાળામાં કવિવાચસ્પતિ આચાર્ય શ્રી વિજયામૃત-સૂરિજી તેમજ તેમના શિષ્યોએ રચેલા ન્યાય, સાહિત્ય કે વ્યાકરણ વગેરે વિષયને લગતાં પુસ્તકો છપાવી પ્રસિદ્ધ કરવા.

## શિરપુરના દ્રવ્ય સહાયકોની નામાવલિ.

૫૦૦) શ્રી સકલપંચ શિરપુર.
૫૦૧) શાહ ખૂબચંદ હીરાચંદ.
૨૫૧) શાહ લક્ષ્મીચંદ ધરમચંદ.
૨૫૦) શાહ દગડુશા દેવચંદ.
૨૫૦) શાહ વેલચંદ લક્ષ્મીચંદ.
૨૫૦) શાહ ચંપાલાલ દેવચંદ.
૧૧) શાહ હંસરાજ રાયચંદ.

# ॥ श्रीइन्दुदूतान्तर्गतार्थान्तरन्यासाः ॥

१ नापुण्यानां नयनविषयं यत्प्रियः स्मर्यमाणः ॥१०॥
२ स्वादीयः स्यात् कदशनमपि स्नेहधारोपसिक्तम् ॥१२॥
३ स्वस्थे चित्ते प्रणयमधुरा बुद्धयो ह्युद्भवन्ति ॥१७॥
४ ...प्रायः प्रथितयशसः प्रार्थना भङ्गभीताः ॥१८॥
५ ...वष्तु-र्भवति महिमो-दारसत्त्वैस्तनूजैः ॥२६॥
६ याञ्चाभङ्गे भवति लघुता नैव सा किंत्वमुष्य ॥२७॥
७ विश्वे दोषान् गणयति जनो को हि राज्ञो भगिन्याः ॥३०॥
८ ऽभीष्टं स्थानं व्रजति हि जनः प्राञ्जलेनाध्वना द्राक् ॥३२॥
९ प्रोत्तुङ्गानां भवति महतैवापनेयो विरोधः ॥३५॥
१० पश्चात्ताप-स्तुदति हृदयं दर्शनीये ह्यदृष्टे ॥३९॥
११ नान्तःशल्यं स भवति सतां सार्थको यो विलम्बः ॥४०॥
१२ गन्तुं त्यक्त्वाऽऽश्रितमणुमपि त्वादृशा नोत्सहन्ते ॥५०॥
१३ नार्हद्बिम्बं सुविहितमुने-र्वासयोगं विनार्च्यम् ॥५८॥
१४ ...स्त्रीणां परममुदितं यौवनं भर्तृसङ्गः ॥६१॥
१५ नालस्यं स्या-दुपकृतिकृतां त्वादृशां ह्युत्तमानाम् ॥६३॥
१६ कण्ठे प्राणा नहि विरहिणः कृच्छ्रमीषत्सहन्ते ॥६८॥
१७ उल्लासं हि प्रथयति चिरा-द्बन्धुवाहानुषङ्गः ॥७२॥
१८ सर्वं दृष्टं वदति हि जनो वर्णिकादर्शनेन ॥७६॥
१९ संसारे य-ज्जनितजनक-प्रेमबन्धो गरीयान् ॥८४॥
२० पित्रोः पश्यन् क इह सुरतं लज्जते नो जडोऽपि ॥८८॥
२१ पूतः क्षौद्रे ह्युपशमविधौ मन्त्रसारष्टकारः ॥९८॥
२२ सर्वाभीष्टं फलति न चिरा-द्दर्शनं हीदृशानाम् ॥१२३॥
२३ नेतारो हि ध्रुवमवसरे प्रेक्षिणि प्रीतचित्ताः ॥१२५॥

卐

# विशोधनपत्रम् ।

[ दर्शितदिशा तत्र तत्र विशोधनमवश्यं विधेयम् ]

| अशुद्धम्, | शुद्धम्. | पत्रम्=पङ्क्तिः |
|---|---|---|
| અશ્વોની, | અશ્વોના। | ૨૯-૩૪ |
| ગુણનુરાગથી, | ગુણાનુરાગથી. | ૩૧—૨ |
| यशोऽधिगच्छन्, | यशोऽध्यगच्छन्, | ૩૪—૭ |
| ગુરુપુષ્પ, | ગુરુપુષ્ય, | ૩૬-૨૧ |
| સપ્રભનાભિ, | સુપ્રભનાભિ, | ૪૨-૨૫ |
| तनौ, | नतौ, | ४-१४ |
| पशस्ते, | प्रशस्ते, | १३—९ |
| पादा, | पादो, | १५—५ |
| पाश्वार्चिः, | पश्वार्चिः, | २०—८ |
| भातः, | भ्रातः, | ३०-१२ |
| अमुप्य, | अमुष्य, | ४२-१३ |
| वाक्त्रा. | वक्त्रा, | ५८—३ |
| गर्ता, | गर्तां | ६४-२० |
| अब्धिकान्तां, | अब्धिकान्ता, | ८८—६ |
| ...नुषङ्गाः, | ...नुषङ्गः, | ९६-१५ |
| पोषा, | योषा, | ११७—३ |
| प्राङ्गण-, | प्राङ्गण-, | १३१—३ |
| जगज्जी-, | जगज्जन्तुजी- | १३५—७ |
| ख्यापितम्, | ख्यापितम्, | १३८—५ |

| | | |
|---|---|---|
| -भवना-, | -मवना-, | १४१-२० |
| -पति-, | -प्रति-, | १४३-१० |
| -सन्तापमं्, | -सन्तापम्, | १४३-१९ |
| यपकौ, | -यमकौ, | १४४-२० |
| ब्राह्या-, | -बाह्या, | १४५-१७ |
| -वये-, | -वर्यै | १५८-१३ |
| याश्वा-, | याच्ञा-, | १६०—८ |

एवं विशोधितेऽपि ग्रन्थेऽस्मिन् काश्चनाशुद्धयोऽन्याः स्युस्ताः शुद्धिपथमानेतव्या विचक्षणैरित्यभ्यर्थये भूयोभूयः।

# श्री जैन-साहित्य-वर्धक-सभा

## प्रकाशित ग्रंथाः

| | | | |
|---|---|---|---|
| १ | परमात्मसङ्गीतरसस्रोतस्विनी | ... | ०—६—० |
| २ | सप्तसन्धानमहाकाव्यम् - सटीकम् | | ४—०—० |
| ३ | साहित्यशिक्षामञ्जरी | (दृढपत्रा) | २—०—० |
| | ,, ,, ,, | (श्वेतपत्रा) | १-६—० |
| ४ | वैराग्यशतकम् (विवेचनयुक्तम्) | | १—०—० |
| ५ | तत्त्वार्थसूत्रम् - सानुवादम् | | — — |
| ६ | श्री आदिजिनपञ्चकल्याणकपूजा | ... | ०—४—० |
| ७ | श्री गीरनारजी तीर्थनो परिचय | ... | ०—४—० |
| ८ | सङ्गीतस्रोतस्विनी | | ०—६—० |
| ९ | इन्दुदूतम् (सटीकम्) | ... | २—०—० |
| १० | निह्नववादः | ... | ३—०—० |
| ११ | शिवभूतिः (दिगम्बरमतप्रवर्तक) | | ०—३—० |
| १२ | नयवादः (नयकर्णिकायुक्त) | ... | ०—४—० |
| १३ | आत्मवादः | ... | ०-१०—० |
| १४ | विचारसौरभः | ... | ०—४—० |

प्रकाशनार्थनिर्धारिता ग्रन्थाः

१ लक्षणार्थचन्द्रिका. २ सिद्धान्तलक्षणगूढार्थतत्त्वालोक-प्रकाशः. ३ मुद्रितकुमुदचन्द्रप्रकरणम् - सटीकम्. ४ सूक्ति-सुधास्रोतस्विनी. ५ खण्डखाद्यम् - सटीकम्।